



# संस्कृतभाषा पाठ्यपुस्तकम्

## वेदभूषणतृतीयवर्षम् / प्रथमा तृतीयवर्षम् / कक्षा अष्टमी

## महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षा-बोर्ड

(भारतसर्वकारस्य शिक्षामन्त्रालयेन संस्थापिता मानिता च)

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः ।
ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु ॥
अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥
माता भूमिः पुत्रोऽहं पृथिव्याः ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ।
एकः कारणतां गतः ।
सत्सङ्गतिः कथय किं न करोति पुंसाम् ?
वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
वेदैश्च सर्वैरहमेव वेद्यः ।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ।







महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् , उज्जयिनी (म.प्र.)
(भारतसर्वकारस्य शिक्षामन्त्रालयः)
Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in

# संस्कृतभाषा

## पाठ्यपुस्तकम्

वेदभूषणतृतीयवर्षम् / प्रथमा तृतीयवर्षम् / कक्षा अष्टमी

## महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षा-बोर्ड

(भारतसर्वकारस्य शिक्षामन्त्रालयेन संस्थापिता मानिता च)

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् ,उज्जयिनी (म.प्र.)

(भारतसर्वकारस्य शिक्षामन्त्रालयः)

वेदविद्या मार्ग, चिन्तामण, पो. ऑ. जवासिया, उज्जैन - 456006 (म.प्र.)

Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in

संरक्षकः : भारतसर्वकारस्य माननीयः शिक्षामन्त्रिमहोदयः, प्रतिष्ठानस्य अध्यक्षमहोदयश्च

मार्गदर्शकः : प्रतिष्ठानस्य माननीयः उपाध्यक्षः प्रो. प्रफुल्लकुमारमिश्रो महाभागः

मार्गदर्शकः : प्रतिष्ठानस्य सचिवः प्रो. विरूपाक्षः वि. जड्डीपाल्

विशेषज्ञाः : ..............

लेखकगणः : श्री शेषराज रेग्मी, श्री यतिराज सापकोटा, श्री सुकान्त प्रामाणिक

आवरणं सज्जा च : ..........

चित्राङ्कनम् : ...........

यान्त्रिकसहयोगः : ..........

अक्षरविन्यासः : .........

@ महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी

मूल्यम् : ......

संस्करणम् : .........

प्रकाशिताः प्रतिकृतयः : ...........

पत्रस्य उपयोगः : ८० जी.एस.एम. पत्रे मुद्रितम्

प्रकाशकः : महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्

(भारतसर्वकार- शिक्षामन्त्रालयस्य स्वायत्तशासि संस्थानम्)

email : msrvvpujn@gmail.com,

Web : msrvvp.ac.in

दूरभाषा (०७३४) २५१००७८

# प्रस्तावना

## (2020 राष्ट्रियशिक्षानीतेः आलोके)

राष्ट्रियवेदविद्याप्रतिष्ठानस्य स्थापनां भारतसर्वकार-शिक्षामन्त्रालयः (उच्चतरशिक्षाविभागः) माननीयस्य शिक्षामन्त्रिणः (तदानीन्तन-मानवसंसाधन-विकासमन्त्रिणः) अध्यक्षतायां नवदेहल्यां 1987 वर्षे जनवरीमासस्य 20 दिनाङ्के 1860 सोसायटीपञ्जीकरणाधिनियमान्तर्गततया अकरोत्। भारतसर्वकारः वेदानां श्रुतिपरम्परायाः संरक्षणाय, संवर्धनाय, विकासाय, प्रचाराय, प्रसाराय च प्रतिष्ठानस्य स्थापनायाः संकल्पनं 6-3/85-SKT-IV पत्र-संख्यया 30-03-1987 दिनाङ्के भारत-राजपत्रेऽधिसूचनया प्राकाशयत्। संस्थापना-स्मरणपत्रे सस्वरवेदाध्ययनस्य, श्रुतिपरम्परायाः च संरक्षणाय, वैज्ञानिकरीत्या वेदार्थानां व्याख्यानाय च दायित्वं वेदविद्याप्रतिष्ठानाय प्रदत्तम् आसीत्। 1993 तमे वर्षे मई-मासे राष्ट्रियवेदविद्याप्रतिष्ठानस्य उज्जयिन्यां स्थानान्तरणानन्तरं प्रतिष्ठानस्य नाम महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् इति परिवर्तितम् अभूत्। सम्प्रति प्रतिष्ठानमिदं मध्यप्रदेशसर्वकारेण प्रदत्तायां 23.6 एकड-भूमौ महाकालमन्दिरात् 6 किलोमीटरदूरे उज्जयिनी-नगर्याम् प्रतिष्ठितम् अस्ति।

1986 राष्ट्रियशिक्षानीतौ, 1992 संशोधितशिक्षानीतौ, 1992 कार्यप्रणाल्यां- (प्रोग्राम ऑफ एक्शन) च वैदिकशिक्षायाः संवर्धनार्थं राष्ट्रियवेदविद्याप्रतिष्ठानाय अखिलभारतस्तरीयम् उत्तरदायित्वं प्रदत्तम् अस्ति। भारतस्य प्राचीनज्ञानभाण्डागारस्य, ज्ञानविज्ञानकोषस्य, मौखिकपरम्पराणां शिक्षाप्रदानाय च गुरुशिष्य-परम्परानुरूपं पारम्परिकगुरूणां नियोजनोद्देश्यं 1992 शिक्षानीतेः कार्यप्रणाल्यां (प्रोग्राम ऑफ एक्शन) उल्लिखितमासीत्।

राष्ट्रस्य आकाङ्क्षानुरूपं, राष्ट्रियस्तरे वेदस्य संस्कृतस्य च शिक्षणार्थं, मानकीकृतपरीक्षार्थं च बोर्ड-इत्यस्य स्थापनायाः पक्षे राष्ट्रियसहमतेः, जनादेशस्य, शिक्षणनीतेः, विशिष्टोद्देश्यानां कार्यान्वयन-व्यूहस्य चानुरूपं भारतसर्वकारस्य शिक्षामन्त्रिणाम् अध्यक्षतायां महासभायाः शासिपरिषदश्च समावेशे “महर्षिसान्दीपनिराष्ट्रीयवेदसंस्कृत-शिक्षाबोर्ड्” इत्यस्य स्थापना 2019 तमे वर्षे अभवत्। प्रतिष्ठानस्य नियमावल्यनुरूपं वेदसंस्कृतशिक्षाबोर्ड् अपि वैवेदशिक्षाया एकः

भागः, तथा प्रतिष्ठानस्योद्देश्यानां पूर्तये नियमेषु संकल्पना च कृता वर्तते। "महर्षिसान्दीपनिराष्ट्रीयवेदसंस्कृतशिक्षाबोर्ड्" इत्यस्य कृते भारतसर्वकारात् भारतीयविश्वविद्यलयसंघात्, केन्द्रीयमाध्यमिकशिक्षाबोर्ड् इत्यस्मात्, राष्ट्रियशैक्षिकानुसन्धान-प्रशिक्षणपरिषदः च मान्यता प्राप्ता वर्तते।

भारतसर्वकारस्य शिक्षामन्त्रालयेन 2015 तमे वर्षे श्री एन्. गोपालस्वामी, ऐ.ए.एस् (प्रधान-निर्वाचनायुक्तचरः)-महोदयस्य आध्यक्ष्ये संरचितया समित्या "संस्कृतस्य विकासाय दूरदृष्टिः पथप्रदर्शनं च-दशवर्षाणां परिप्रेक्षायां योजना" इत्यनया अनुशंसितं यत् उच्चतरमाध्यमिकस्तरपर्यन्तं वेदसंस्कृतविषयकशिक्षणस्य पाठ्यक्रमाणां मानकीकरणाय, संवर्द्धनाय, परीक्षामान्यतायै, प्रमाणीकरणाय "वेद-संस्कृतशिक्षाबोर्ड्" इत्यस्य झटिति स्थापना आवश्य करणीया। प्राथमिकस्तरे वेदस्य संस्कृतस्य चाध्ययनम् अभिप्रेरकं, सम्प्रेरकम्, आनन्ददायकं च भवेत् । आधुनिकशिक्षाबोर्ड-व्यवस्थायां पाठ्यमानानाम् आधुनिक-विषयणाम् अपि वेद-संस्कृतपाठशालासु सम्यक् मिलित्वा अध्यापनम् आवश्यकम्। साम्प्रतिकसमाजस्य आवश्यकतानां संपूर्तये, प्राचीनज्ञानस्य सम्यक् उपयोगं कृत्वा वेद-संस्कृतपाठशालानां पाठ्यक्रमसामग्र्यः आधुनिकसमस्यानां निवारणोपायान्वेषणाय विकसिताः स्युः इति च समितेः अनुशंसा आसीत् ।

संस्कृतस्य आधुनिकविषयाणां च सुमेलनेन स्तरानुगुणं पाठ्यसामग्र्याः विकासपुरस्सरं सस्वरवेदपाठे कौशलसंवर्धनस्य, वेदकण्ठस्थीकरणे, वेदमन्त्रोच्चारणे च अखिलभारतस्तरे मानकीकरणस्यावश्यकता वर्तते । यतो हि वेदच्छात्रा अन्ततोगत्वा वेदभाष्याणाम् अध्ययने, वेदार्थचिन्तने समर्था भवेयुः। वेद-संस्कृत-छात्राणां वृत्तिप्राप्ति-लक्ष्यं मनसि निधाय मुख्यधारायाम् अपि भावि अध्ययनं सुशकं भवेत्। समुचितस्तरे वेदविकृतिपाठानामध्ययने ध्यानं दात्तव्यम् इति च वेदपाठशालानां सम्बन्धे समितिः संस्तुतवती। वेदानां सस्वरपाठः आभारतं सर्वत्र राज्येषु समानरूपेण नास्ति इति हेतोः समितेः सदस्यैः चिन्ता प्रकाशिता। अतः वेदानां सस्वरपाठस्य शैल्यादीनां, शिक्षणपद्धतेश्च क्षेत्रीयविविधतानामुपरि हस्तक्षेपम् अकृत्वा

विद्यामानायाः स्थितेः समाधानाय, समीकरणाय शीघ्रं समुचितव्यवस्था प्रतिष्ठानेन करणीया इति च वेदपाठशालानां सम्बन्धे समितिः संस्तुतवती ।

वेदः संस्कृतं चेति द्वयम् अविभक्तम्, एकम् अपरस्य उपोद्वलकं च वर्तते। परं तु आभारतं समेषां वेदपाठशालानां संस्कृतपाठशालानां च परीक्षा-मान्यतायाः, सम्बद्धतायाः च समस्या चिरकालात् सम्मुखं वर्तते, एतदर्थं वेद-संस्कृतयोः परीक्षादिविषये सहैव राष्ट्रस्तरे वेदसंस्कृतबोर्ड् इत्यस्य स्थापना भवेत्। समितिः एतदपि संस्तुतवती यत् बोर्ड-माध्यमेन आयोजयिष्यमाणा परीक्षा विधिसम्मता सर्वकारेण मानिता च भवेत्, शिक्षाया आधुनिकबोर्ड् प्रणाल्या तुल्या च भवेत्। समित्या एवमपि अनुशंसा कृता यत् "महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्" "महर्षिसान्दीपनि-राष्ट्रियवेदसंस्कृतविद्यापरिषद्" इति परीक्षा बोर्ड् संज्ञया उद्घोषितं मानितं च भवेत्, एतस्य मुख्यालयः उज्जयिनी भवेत्। परीक्षाबोर्ड् कार्याणि अतिरिच्य अद्यावधि प्रचलितानां वेदप्रसार-प्रचार-संवर्धन-कार्यक्रमाणाम् अन्येषां वेदाध्ययन-संवर्धन-गतिविधीनाञ्च सञ्चालनं प्रतिष्ठानस्य पक्षतः एव यथापूर्वं भवेत् इति समितिः संस्तुतवती ।

वेदशिक्षायाः संचालनं, संवर्धनं, प्रचारः च भारतस्य गौरवशालिज्ञानपरम्पराया एकं सुविस्तृतं व्यापकं च अध्ययनमस्ति । वेदाध्ययने (संहिताः, विकृतिपाठाः, स्वराणां सम्यक् प्रयोगः ज्ञानादयश्च) सस्वरपाठकौशलम्, मन्त्रोच्चारणम्, संस्कृतज्ञानप्रणाल्याः बहुस्तरीया श्रुतिपरम्परा सम्मिलिता भवति। 2020 राष्ट्रियशिक्षानीतेः (NEP-2020) अनुरूपं पुनर्व्यवस्थापितायां 3 + 4 सप्तवर्षीयायां प्रतिष्ठानस्य पाठ्यक्रमयोजनायां वेदाध्ययननिरतान् पारम्परिकच्छात्रान् मुख्यधारायाम् आनेतुं नीतेः दृष्टौ आधुनिकविषयाः यथा-संस्कृतम्, आंग्लभाषा, मातृभाषा, गणितम्, सामाजिकविज्ञानम्, विज्ञानम्, संगणकविज्ञानम्, दर्शनम्, योगः, वैदिककृषिः इत्यादयः विषयाः नीतिनिर्धारकनिकायेषु वैदिकशिक्षाया उपरि राष्ट्रियसम्मत्यनुरूपम् उपलब्धसमयाधारेण पाठ्यक्रमानुरूपम् अध्येयाः विषयाः समावेशिताः। रा.शि.नी. 2020 इत्यस्य अनुसरणाय प्रतिष्ठानेन प्रवर्तिता अध्ययनस्येयं विशिष्टा

पाठ्यक्रमयोजना भारतीयज्ञानप्रणाल्याः पाठ्यक्रमसामग्रीषु आधुनिकज्ञानविज्ञानैः च सह भारतीयचिन्तनधारायाः, वैदिकज्ञानस्रोतसः च उपयुक्तज्ञानसामग्रीणां समायोजनं वर्तते।

प्रतिष्ठानस्य बोर्ड्-सम्बद्धानां पाठशालानां, गुरुशिष्य-इकाई-इत्यादीनां, गुरुकुलानां च पाठ्यक्रमस्य आधारभूतः मुख्यः विषयः भवति सम्पूर्णवेदशाखाया कण्ठस्थीकरणेन सह सस्वराध्ययनम्। तेन सह नियमानुरूपं संस्कृतभाषा व्याकरणं च, आंग्लभाषा, मातृभाषा, गणितम्, सामाजिकविज्ञानम्, विज्ञानम्, संगणकविज्ञानम्, दर्शनम्, योगः, वैदिककृषिः, समाजोपयोगि-उत्पादकविषयाः (SUPW) इत्यादयः पञ्चान्यूनं यथाचयनं विषया भवन्ति।

इतिहासविद्भिः विदितो विषयो वर्तते यत् महर्षेः पतञ्जलेः काले ऋग्वेदस्य 21 शाखाः, यजुर्वेदस्य 101 शाखाः, सामवेदस्य 1000 शाखाः, अथर्ववेदस्य च 9 शाखाः चेति वेदानां 1131 शाखा आसन्। याते काले बह्वीनां वेदशाखानाम् अध्येतृपरम्परायाः लोपात् बह्व्यः शाखाः कालकवलिता अभूवन्, सम्प्रति केवलं 10 शाखाः अवशिष्यन्ते, तेषु ऋग्वेदस्य एका, यजुर्वेदस्य चतस्रः, सामवेदस्य तिस्रः, अथर्ववेदस्य च द्वे शाखे सस्वरपाठपरम्परायां समुपलभ्यन्ते। एतासामुपरि एव भारतीयज्ञानप्रणाली आश्रिता वर्तते। एतासां 10 शाखानां कण्ठस्थीकरणेन सस्वर-पाठेषु प्रवीणाः पण्डिताः ये वेदपाठपरम्परां वेदज्ञानपरम्पराञ्च पूर्णरूपेण प्राचीनपद्धत्या च संरक्षितवन्तः ते विरला एव तथा अध्येतारोऽपि न्यूनमात्रया एव सन्ति । यावत् श्रुतिपरम्परानुसारेण कण्ठस्थीकरणपूर्वकं वेदशिक्षाम् आश्रित्य मूलरूपेण चिन्तनं न क्रियते, दृष्टिः न दीयते तावत् वेदशिक्षाव्यवस्था सुदृढा न भवति। सामान्यविद्यालयीयाध्ययने वेदस्य सस्वरपरम्पराया अध्येयविषयत्वेन अध्यापनं न भवति, न तु विद्यालयीयपाठ्यक्रमे वेदपाठ्यक्रमसमायोजनाय सञ्चालनाय वा विशेषज्ञता सामान्यबोर्ड्-मध्ये वर्तते। केवलं मुद्रितवेदपुस्तकवाचनं पारम्परिकं वेदाध्ययनं नैव भवति। अत एव एषा स्थितिः वर्तते।

वेदछात्राः ये श्रुतिपरम्परया सस्वरं वेदं गुरुमुखात् परम्परया अधियन्ति, ते सुदूरे ग्रामेषु नगरेषु वा स्थितेषु वेदगुरुकुलेषु, आश्रमेषु, पाठशालासु वा निवसन्ति, पठन्ति च। वेदाध्ययनाय वेदविद्यार्थिनः प्रतिवर्षम् अन्यूनं 1900-2100 होराः उपयुञ्जते। ते आधुनिक-

विद्यालयीयशिक्षणप्रणालेः समयात् द्विगुणितं समयं वेदाध्ययनाय उपयुञ्जते। वैदिकछात्राः गुरोः सम्मुखम् उपविश्य शब्दशः वेदोच्चारणशिक्षणं प्रभुवन्ति, वेदस्य एकैकं शाखायां स्वाध्यायविधया सस्वरम् उच्चारणेन सह कण्ठस्थीकरणमपि अवश्यं कुर्वन्ति। आधुनिकान् च विषयान् यथासामर्थ्यम् अधियन्ति।

अत्रेदं ज्ञातव्यं भवति यत् वेदाध्ययनस्य, वेदमन्त्राणां पाठविधेः, गुरुशिष्ययोर्मध्ये प्रचलितायाः अनूचानायाः वेदानां श्रुति-परम्परायाः, पाठपरम्परायाः एव कारणात् वेदानां श्रुतिप्रचालितं मौखिकप्रसारणं मानवताया अमूर्तसांस्कृतिकनिधिरूपेण विश्वसंस्थायाः यूनेस्को (UNESCO) इत्यस्य मौखिकसांस्कृतिकनिधेः सूच्यां मानितं विद्यते। अतः वैदिकशिक्षायाः प्राचीनताम् अखण्डतां च चिरकालं स्थापयितुं योग्या फलप्रदात्री कार्यनीतिः आवश्यकी वर्तते। अतः प्रतिष्ठानं, प्रतिष्ठानस्य बोर्ड् च 2020 राष्ट्रियशिक्षानीतौ निर्दिष्टैः कौशलविषयैः, व्यावसायिकविषयैः,आधुनिकविषयैः च सह यथा- संस्कृतम्, आंग्लभाषा, मातृभाषा, गणितम्, सामाजिकविज्ञानम्, विज्ञानम्, सङ्गणकविज्ञानम्, दर्शनम्, योगः, वैदिककृषिः, इत्यादिभिः मिलित्वा विशिष्टं सस्वर-वेदपाठ्यक्रमं सर्वासु उपलब्धशाखासु सञ्चालयति, स पाठ्यक्रमः सर्वकारेण मानितः, सर्वकारेण मानितं बोर्ड्-प्रमाणपत्रं च प्रदीयते।

वेदितव्ये परा अपरा चेति द्वे विद्ये अधीत्य मानवः सुखीभवति। अस्मिन् प्रपञ्चे अधीता विद्या अविद्या च सुखेन जीवनयापनार्थं मनुष्यान् समर्थान् करोति, परलोके मुक्तियोग्यान् च विधत्ते। वेदे वर्णितानां भौतिकानां विषयाणां ज्ञानं, भौतिकज्ञानस्य साहाय्यशाखाः, भौतिकरुच्यनुगुणाः विषयाः च अपरा विद्येति नाम्ना कथ्यन्ते। उपनिषत्सु प्रतिपादितम् आत्मचिन्तनम् आत्मनः अन्वेषणं च परा विद्येति नाम्ना कथ्यते। प्राचीनभारते प्रसिद्धाः, वेदाः सहयोगिन्यः ज्ञानविषयिण्यः विद्याः चतुर्दश (14) वर्तन्ते। ता यथा- चत्वारः वेदाः, षड्वेदाङ्गानि, पुराणानि, न्यायः, मीमांसा, धर्मशास्त्रं च । चतुर्दशभिः विद्याभिः सह आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थशास्त्रम् (स्थापत्यवेदः वा) इति चतुरः उपवेदान् संयोज्य 18 विद्याः वर्तन्ते। सहस्रशः वर्षेभ्यः अत्र भरतखण्डे भारतभूमौ सर्वेषां ज्ञानानां, विज्ञानानां, शिक्षणस्य च भाषा

संस्कृतभाषा आसीत्, यतो हि अस्मिन् भरतखण्डे भारतमहाद्वीपे भारतभूखण्डे दीर्घकालं यावत् एकमात्रं भाषितभाषा संस्कृतभाषा एव आसीत्। तस्मात् तदा वेदार्थानां सुलभतया ज्ञानाय जनाः समर्थाः एव आसन्।

प्राचीनस्य तक्षशिला-विश्वविद्यालयस्य विषये वयं सर्वे श्रृणुमः एव। तत्र अष्टादश (18)-शिल्पानां, प्रौद्योगिकविषयाणां च अध्ययनम् अध्यापनं च प्राचलत्, आनुभविकं प्रयोगपूर्वकं शिक्षणं प्राचलत् इति च वयं जानीमः एव। छान्दोग्योपनिषदि[1] केषुचित् नीतिशास्त्रग्रन्थेषु च एतासां विद्यानां विवरणं लभ्यते। तदनीन्तनाः ते 18 व्यावसायिकपाठ्यविषया अद्यापि अध्ययनयोग्यविषया इति ज्ञायन्ते । ते यथा- 1. गायनसङ्गीतम् 2. वाद्यसङ्गीतम् 3. नृत्यम् 4. चित्रकला 5. लेखशास्त्रम् 6. अभियान्त्रिकी 7. मूर्तिकला 8. प्रसूतितन्त्रम् 9. वाणिज्यम्, 10. गणितम् 11. आयुर्वेदः, चिकित्सा 12. कृषिः 13. रथनिर्माणम्, परिवहनम् 14. राज्यशासनम्, प्रशासनिकप्रशिक्षणम्, 15. धनुर्विद्या, दुर्गनिर्माणम्, सैन्यकला च, 16. विविध-वस्तुनिर्माणम्, उत्पादनं च , 17. सर्पविद्या 18. गुप्तनिधेरन्वेषणम् । उपर्युक्तासु कलासु शिल्पेषु च अभियान्त्रिक्याः शिक्षणाय, कौशलसम्पादनाय च प्राचीनकाले प्रशिशिक्षुप्रणाली विकसिता आसीत्।

समग्रे विश्वे प्राचीनसभ्यतासु सर्वदौ गण्यमानायां भारतीयसभ्यतायां शास्त्राणां, ज्ञानस्य, विज्ञानस्य, प्रौद्योगिक्याः च शिक्षणस्य विशाला सुदृढा च परम्परा वर्तते । भारतं प्राचीनकालादेव ऋषीणां, ज्ञानिनां, विदुषां वैज्ञानिकानां च भूमिः अपि वर्तते। अनुसन्धानैः इदं ज्ञातं यत् भारतं विद्यानाम् (विद्या आध्यात्मिकं ज्ञानम् , अविद्या भौतिकं ज्ञानम्) अध्ययने अध्यापने च विश्वगुरुः आसीत् भविष्यति च, समग्रे प्रपञ्चे भारतं सक्रियं योगदानं च सर्वेषु क्षेत्रेषु प्रादात्, ददाति च। प्राचीनकालादेव भारतस्य नानभागेषु आधुनिकविश्वविद्यालयेन तुल्यानां बृहतां शिक्षणकेन्द्राणां गुरुकुलानां च स्थापना अभवत्, तत्र सहस्राधिकाः विद्यार्थिनः नानास्थानेभ्यः नानादेशेभ्यः च आगच्छन्ति स्म। प्राचीनै ऋषिभिः अन्विष्टाः ज्ञान-विज्ञान-प्रौद्योगिक्यभियान्त्रिक्यादीनाम्

---

[1] नाम वा ऋग्वेदो यजुर्वदः, सामवेदः, आथर्वणश्चतुर्थ इतिहासपुराणः पञ्चमो वेदानां वेदः पित्र्यो राशिर्दैवो निधिर्वाकोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्त्रविद्या नक्षत्रविद्या सर्पदेवजनविद्या नाम---। छान्दोग्ये 7.1.4

अध्ययनपद्धतयः, प्रयोगात् परीक्षणविधानानि, सिद्धान्ताः च अनेकेषु विषयेषु विश्व-ज्ञानस्य मूलसिद्धान्तान् स्थापयामासुः, चिन्तनस्य उत्साः च अभूवन्, खगोलविज्ञाने, भौतिक्यां, रसायनविज्ञाने, गणिते, चिकित्साविज्ञाने, प्रौद्योगिक्यां, ध्वन्यनुसन्धाने, व्याकरणे एवम् अन्यत्र च तादृशेषु विविधेषु विषयेषु सिद्धान्तप्रतिपादने प्राचीनकालादेव भारतस्य योगदानम् अतीव महत्त्वपूर्णं वर्तते इति अनुसन्धानेन आविश्वं प्रथितमेव । अतः भव्यस्य भारतस्य नागरिकाः बालकाः बालिकाः च अवश्यमेव ऋषिप्रदत्तं मूलं वैदिकं ज्ञानं प्राप्नुयुः गौरवमनुभूय भारतभाग्यं चिन्तयेयुः, रचयेयुः च । भारत-संसद्भवनस्य मुख्यद्वारि उट्टङ्कितं “वसुधैव कुटुम्बकम्” इति, विविधेषु अवसरेषु गणमान्यैः संवैधानिकप्राधिकरणैः उद्धृतानां वेदमन्त्राणामर्थज्ञानं वेदाध्ययनेन, वेदमन्त्रार्थचिन्तनेन एव सम्भवति। वेदेषु, सम्पूर्णे वैदिकसाहित्ये च सत्, चित्, आनन्द-तत्त्वचिन्तनं समेषां प्राणिनाम् अन्तर्णिहितयाः समानताया उपरि बलं प्रददाति।

वेदाः वैज्ञानिकज्ञानस्य स्रोतांसि वर्तन्ते। अतः बह्वीनाम् आधुनिकसमस्यानां समाधानाय वेदमूलकानां भारतीयज्ञानस्रोतसां श्रद्धया पुनः पुनः अन्वेषणम् आवश्यकम्। वेदानां पाठं, वैदिकज्ञानसामग्रीं, वैदिकदर्शनं वा आध्यात्मिकज्ञानस्य वैज्ञानिकज्ञानस्य च रूपेण यावत् वयं छात्रान् न बोधयामः तावत् आधुनिकभारतस्य अपेक्षा-पूर्त्यर्थं वेदे निहितानां विविधानां ज्ञान-विज्ञान-विचाराणां देशे सर्वत्र, विश्वस्तरे च प्रसारः पूर्णरूपेण नैव भविष्यति।

वेदाध्यापनं वेदशिक्षा वा (वेदपाठः, मौखिकी, श्रुतिपरम्परा वा, वेदज्ञानपरम्परा) केवलं धार्मिक- शिक्षामात्रं नैव । वेदानामध्ययनं नाम धर्मविषयकमेव निर्देशमात्रम् इति कथनं सर्वथा अनुचितमेव। वेदः धार्मिकवाङ्मयमात्रम् एव न, वेदेषु केवलं धार्मिकसिद्धान्तमात्रम् एव न प्रतिपादितम्, अपितु वेदाः ज्ञानविज्ञानकोषाः सन्ति, तत्र ज्ञानं विज्ञानं च वर्तते । मानवजीवनसाफल्याय, आनन्दाय च आवश्यकानां समेषां ज्ञानानां कोषरूपः वेदः, स वेदः सर्वज्ञाननिधिः । अतः वेदशिक्षणं वेदाध्ययनं वा धार्मिकशिक्षणम्, धार्मिकनिर्देशः इति वा चिन्तनं सर्वथा युक्तियुक्तं न विद्यते।

2004 वर्षस्य 6736 नागरिक-प्रतिवेदनसंख्यान्वितम् अभियोगम् (AIR 2013: 15 SCC 677) अनुलक्ष्य 03-07-2013 दिनाङ्के प्रकाशिते माननीयसर्वोच्चन्यायालयस्य निर्णये स्पष्टं यत् वेदाः केवलं धार्मिकग्रन्थाः नैव सन्ति, वेदेषु गणितं, खगोलविज्ञानं, ऋतुविज्ञानं, रसायनविज्ञानं, द्रवचालिकी (हाइड्रोलिक्स) भौतिकविज्ञानं, प्रौद्योगिकी, कृषिः, दर्शनं, योगः, शिक्षा, काव्यशास्त्रं, व्याकरणं, भाषाविज्ञानम् इत्यादयः विषयाः सम्मिलिताः सन्ति इति।

**2020 राष्ट्रियशिक्षानीतेः अनुसरणपूर्वकं प्रतिष्ठानस्य, बोर्ड् इत्यस्य च माध्यमेन वेदशिक्षणम्-**

2020 राष्ट्रियशिक्षानीतौ भारतीयज्ञानप्रणाली नाम्ना संस्कृतज्ञानप्रणाली संज्ञिता अस्ति। तत्र भारतीयज्ञान-प्रणाल्याः महत्त्वं, पाठ्यक्रमे तस्याः समावेशः, विविधविषयाणां संयोजने नम्या दृष्टिः स्पष्टं शिक्षानीतौ प्रकाशिता अस्ति। कलायाः, वाणिज्यस्य, मानविक्याः च छात्रा विज्ञानविषयाध्ययनाय समर्था भविष्यन्ति, प्रौद्योगिकीछात्राः विज्ञानछात्राश्च कलादिविषयान् अध्येतुमर्हन्ति। अध्येतारः सर्वे इच्छानुगुणं व्यावसायिकं, व्यावहारिकं च कौशलं (सॉफ्ट स्किल्स) प्राप्नुयुः इति। कलासु, विज्ञानेषु, इतरेषु क्षेत्रेषु च भारतस्य गौरवशालिनी परम्परा अनया शिक्षणव्यवस्थया संवर्धयितुं शक्यते। भारतस्य समृद्धां प्राचीनसंस्कृतिम्, आधुनिकजीवनपद्धतिं, भारतीयज्ञानप्रणालीं, परम्परां च संयोजयितुं संवर्धयितुं च सर्वकारेण शिक्षानीतिरियं निर्मिता।

भारतस्य शास्त्रीयभाषाणां साहित्यानां च महत्त्वं, प्रासङ्गिकता, सुन्दरता च उपेक्षितुं न शक्यते। संस्कृतं नाम संविधानस्याष्टमानुसूच्यां निर्दिष्टा एका महत्त्वपूर्णा आधुनिकी भाषा वर्तते। समग्रं लैटिन-ग्रीकसाहित्यं च संस्कृतसाहित्येन गुणे परिमाणे च तुलनायां कथमपि समानतां न प्राप्नोति। संस्कृतसाहित्ये गणितम्, दर्शनम्, व्याकरणम्, संगीतम्, राजनीतिः, चिकित्सा, वास्तुकला, धातुविज्ञानम्, नाटकम्, कथा आख्यायिका, कविता इति वाङ्मयविधानां विशालः कोषः वर्तते, स संस्कृतज्ञानप्रणालीरूपेण ज्ञायते। संस्कृतज्ञानप्रणाली न केवलं विश्वज्ञाननिधेः पोषणाय संरक्षणाय च भवेत् अपि तु संस्कृतज्ञानप्रणाली अनुसन्धानैः संवर्धनीया, नवीनैः चिन्तनैः संस्कृतज्ञानप्रणाली अस्माकं शिक्षाप्रणाल्यां सम्यक् उपयुक्ता च भवेत्। विगतेषु बहुषु सहस्राब्देषु विविध-विषयक-विद्वज्जनैः विविधासु सामाजिकपृष्ठभूमिषु कार्याणि कुर्वद्भिः विस्तृतजीवनदर्शनेन

सह संस्कृतज्ञानप्रणाल्या वाङ्मयसर्वस्वं प्ररोपितं निर्मितं च अस्ति। संस्कृतविषयाः रुचियुक्तैः विधिभिः आकर्षकविधानैः प्रासङ्गिकविधिभिः च पाठयिष्यन्ते। अस्याः प्रणाल्या उपयोगः विशिष्टरूपेण ध्वनिरूपेण उच्चारणेन च वर्तते। माध्यमिकस्तरे संस्कृतविषयान् संस्कृतमाध्यमेन पाठयितुं, संस्कृताध्ययनम् आनन्दप्रदं कर्तुं संस्कृतपाठ्यविषयाणां लेखनं सरलमानकसंस्कृतेन (एस्. एस्. एस्.) भविष्यति। वेदानां श्रुतिपरम्परायां मौखिकपरम्परायां वा ध्वन्यात्मकम् उच्चारणं प्रवर्तते, वेदशिक्षायाः आधारः सस्वरोच्चारणं, ध्वन्यात्मकोच्चारणं च वर्तते।

कलाविज्ञानयोः पाठ्यक्रम-पाठ्येतरक्रिययोः शैक्षणिक-व्यावसायिकधारयोश्च मध्ये परस्परं स्पष्टो भेदो न कृतः शिक्षानीत्याम्, एतेषां सम्मिश्रणं पाठ्यचर्यायां भवितुमर्हति। समेषां विषयाणाम् अन्तस्सम्बन्धम् एकताम् अखण्डतां च सुनिश्चित्य अध्ययनाय बहुविषयकः आधारः शिक्षानीत्यां निर्मितः अस्ति, तेन च विज्ञानं, सामाजिकविज्ञानं, कला, मानविकी, क्रीडा एवमादिभिः सह बहुविषयिण्याः समग्रशिक्षाया उपरि बलं प्रदत्तमस्ति। नैतिकता, मानवसम्बद्धानि संवैधानिकमूल्यानि, सहानुभूतिः, परेषां कृते सम्मानः, स्वच्छता, शिष्टाचारः, लोकतान्त्रिकी भावना, सेवाभावना, सार्वजनीनसम्पदां सम्मानः, वैज्ञानिकचिन्तनं, स्वतन्त्रता, उत्तरदायित्वं, नानाविचारवादः, समानता, न्यायः इति भावानाम् उपरि बलं प्रदत्तमस्ति।

2020 राष्ट्रियशिक्षानीतेः 4.23 बिन्दु-संख्यायां अनिवार्यतया अध्येयविषयाणां, कौशलसंवर्धनस्य, शिक्षाक्रमस्य च विषये निर्देशो वर्तते। विद्यार्थिनाम् इच्छानुगणं अध्येयविषयाणां चयनविकल्पाः अधिकतया नमनीयाः भवेयुः, पाठ्यक्रमाः नमनीयाः स्युः । अपि च अधुना झटिति परिवर्तिनि विश्वे विद्यार्थिनः उत्तमाः, यशस्विनः, सफलाः, उद्योगशीलाः, उद्योगयोग्याः, उत्पादकशीलाश्च भवेयुः चेत् केचन अध्येयज्ञानविषयाः कौशलविषयाः अनिवार्याः करणीयाः, वृत्तिसामर्थ्यप्राप्तिः च अनिवार्या विद्यते, छात्रहितदृष्ट्या तत् महत्त्वपूर्णं च।

वैज्ञानिकः चिन्तनस्वभावः, प्रमाणाधारितं चिन्तनं, रचनात्मिकी नवीनता च, सौन्दर्यशास्त्रं कलायाः च भावना, मौखिकं लिखितं च अभिव्यक्तिसामर्थ्यं, संवादकौशलं च, स्वास्थ्यं संपोषणं च, शारीरिकशिक्षा, दैहिकसामर्थ्यं स्वास्थ्यं क्रीडा च, सहयोगः

सामूहिककार्यम्, समस्यायाः समाधानं तार्किकं चिन्तनं, व्यावसायिकाभिप्रकाशः कौशलं च, तन्त्रज्ञानप्रयोगकौशलं, संख्यासाक्षरता, कूटचिह्नसंज्ञानं, संगणकीयं चिन्तनं, नैतिकता, नैतिक-तार्किकक्रिया, मानवीयानां संविधानीयानां मूल्यानां ज्ञानम् अभ्यासश्च, स्त्रीपुंस-संवेदनशीलता, मौलिककर्तव्यम्, नगरिकता-कौशलं मूल्यं च, भारतस्य ज्ञानम्, पर्यावरणसम्बद्धा जागरा, तत्र जलसंसाधन-संरक्षणम्, स्वच्छता, समकालिकविषयाः स्थानीयविषयाश्च, देशेन, राज्यैः, प्रपञ्चेन वा सम्मुखीक्रियमाणानां विषयाणां ज्ञानं, नानाभाषासु कौशलेन सह अत्रोक्तानां कौशलानामपि अध्येयविषयेषु समायोजनं विद्यते । बालकानां भाषाकौशलसंवर्धनाय, समृद्धभाषाणां तत्रस्थानां च कलाकोषाणां च संरक्षणाय सर्वकारीयेषु स्वनिधिपोषितेषु विद्यालयेषु च सर्वेभ्यः छात्रेभ्यः एकां शास्त्रीयभाषां तत्साहित्यं च अधिगन्तुं वर्षद्वयस्य अवसरः भविष्यति।

2020 राष्ट्रियशिक्षानीतेः 4.27 बिन्दु-संख्यायां "भारतस्य ज्ञानम्" इति विषये महत्त्वपूर्णः निर्देशो वर्तते। "भारतस्य ज्ञानम्" इत्यस्मिन् विषये आधुनिकभारतस्य प्रतिस्पर्धानां सफलतया सम्मुखीकरणे, आधुनिकभारतस्य सफलतायै, प्राचीनभारतस्य ज्ञानं योगदानञ्च, भारतीयज्ञानप्रणाली यथा- गणितं, खगोलविज्ञानं, दर्शनं, योगः, वास्तुकला, चिकित्सा, कृषिः, अभियान्त्रिकी, भाषाविज्ञानं, साहित्यं, क्रीडया सह शासनं, राजव्यवस्था, संरक्षणं च इत्यादीनां विषयाणां यत्रापि प्रासङ्गिकता भविष्यति तत्र विषयाणां सम्यक् योजनं भविष्यति । एतेषु औषधपद्धतयः, वनप्रबन्धनं, पारम्परिक (जैविकी) कृषिपद्धतिः, प्राकृतिक-कृषिपद्धतिः, स्वदेशीयक्रिडाः, विज्ञानादिषु क्षेत्रेषु प्राचीनार्वाचीनयोः भारतयोः प्रेरकाणां महापुरुषाणां ज्ञानप्रदाः विषयाः भवन्ति।

2020 राष्ट्रियशिक्षानीतेः 11.1 बिन्दु-संख्यायां समग्रशिक्षां बहुविषयकशिक्षां प्रति च प्रवृत्त्यर्थं निर्देशाः सन्ति। भारते समग्रतया बहुविषयकाध्ययनं काचित् प्राचीना परम्परा विद्यते। तक्षशिला, नालन्दा-प्रभृतिविश्वविद्यालयेषु अध्यापितानि 64 कला-कौशलानि, सङ्गीतकला, चित्रकला इत्यादिकलाविषयाः, रसायनशास्त्रं, गणितम्, इत्यादिवैज्ञानिकक्षेत्राणि, काष्ठतक्षणकार्यम्, वस्त्रसीवनकला, इत्यादिवृत्तिपरकक्षेत्राणि, औषधीयकार्यम्, अभियान्त्रिकी

इत्यादिव्यावसायिकक्षेत्राणि, सम्प्रेषणम्, चर्चा, संवादः इत्यादिव्यावहारिककौशलानि (सॉफ्ट स्किल) च अन्तर्भूतानि । गणितम्, विज्ञानम्, वृत्तिपरकविषयान्, व्यवहारिकविषयान्, व्यावसायिकविषयान् च अन्तर्भाव्य मानवसर्जनस्य सर्वाणि क्षेत्राणि कला इति भारतीयं चिन्तनमस्ति। विविधकलानां यत् ज्ञानम् अस्ति, तत् आधुनिककाले समान्यतः कथ्यते उदारकला (कलानाम् उदारकल्पना ) इति। विविधकला-ज्ञानानां भारतीयशिक्षायां पुनः समायोजनम् अवश्यं भवेत् । ईदृशी शिक्षा एकविंशे (21) शताब्दे अपेक्षिता विद्यते।

2020 राष्ट्रियशिक्षानीतेः 22.1 बिन्दु-संख्यायां भारतीयभाषाणां, कलायाः, संस्कृतेश्च संवर्धनाय निर्देशो भवति। सहस्रेण वर्षैः निरन्तरं विकसितं भारतं विशिष्टस्य संस्कृतेः समृद्धः भाण्डागारः वर्तते। सा भारतसंस्कृतिः कलासु, साहित्यकृतिषु, प्रथासु, परम्परासु, भाषाभिव्यक्तिषु, कलाकृतिषु, ऐतिहासिकेषु, सांस्कृतिकसम्पत्तिस्थलेषु च परिलक्षिता भवति। भारते भ्रमणम्, भारतीयातिथ्यसत्कारस्यानन्दः, भारतस्य सुन्दरहस्तशिल्पानां हस्तनिर्मितवस्त्राणां च क्रयणम्, भारतस्य प्राचीनसाहित्यस्य पठनम्, योग-ध्यानयोः अभ्यासः, भारतीयदर्शनशास्त्रेण प्रेरणा, भारतस्य विभिन्नपर्वसु उत्सवेषु वा भागग्रहणम्, भारतस्य वैविध्यपूर्णसंगीतस्य कलायाश्च प्रशंसनम्, भारतीयचलचित्रणां दर्शनम् इत्यादयः केचनायामाः वर्तन्ते येषां माध्यमेन विश्वस्य कोटिशः जनाः अस्यां भारतीय-सांस्कृतिकविविधतायां सम्मिलिताः भवन्ति। एवम् अस्य आनन्दम् अनुभवन्ति, लाभान्विताः च भवन्ति।

एषा सांस्कृतिकी प्राकृतिकी च सम्पद् वर्तते, तस्याः भारत-सांस्कृतिकसम्पदः संरक्षणम्, संवर्धनम्, प्रसारः च देशस्य सर्वोत्तमं प्राथम्यं स्यात्, यतो हि इयं सांस्कृतिकसम्पत् देशस्य अभिज्ञानाय अर्थव्यवस्थाविकासाय च अत्यन्तं महत्त्वपूर्णा वर्तते।

2020 राष्ट्रियशिक्षानीतेः 22.2 बिन्दु-संख्यायां कलानां विषये निर्देशो वर्तते। भारतीयकलायाः संस्कृतेश्च संवर्धनं न केवलं राष्ट्राय एव आवश्यकं, राष्ट्रियजनानां कृते अपि महत्त्वपूर्णं वर्तते। बालेषु बालिकासु च स्वाभिज्ञता, देश्य-जनेषु मामकीनभावः, अन्यसंस्कृतीनां तदीयलक्षणानां च कृते गौरवबुद्धिं जनयितुं सांस्कृतिकप्रज्ञायाः जागृतिः, अभिव्यक्तिः इत्यादीनां

सामर्थ्यानां विकासस्य अपेक्षा वर्तते। बालकेषु बालिकासु च स्वकीयसांस्कृतिकेतिहासे, कलायां, भाषासु, परम्परासु च स्वकीयभावनाया विकासेनैव गुणपूर्णस्य सांस्कृतिकाभिज्ञानस्य संस्कारः उत्पादयितुं शक्यते। अतः स्वकल्याणाय समाजकल्याणाय राष्ट्रकल्याणाय च सांस्कृतिकी जागृतिः अभिव्यक्तिश्च अधिकं महत्त्वं प्राप्नोति।

प्रतिष्ठानस्य मुख्यः पाठ्यक्रमः सस्वरवेदशिक्षणरूपः (मौखिकी, श्रुतिपरम्परा च-वेदपाठेन वेदज्ञानपरम्परया च सह) वर्तते। तेन सह इतरे अनिवार्या आवश्यकाः आधुनिकविषयाः यथा- संस्कृतभाषा व्याकरणं च, आंग्लभाषा, मातृभाषा, गणितम्, सामाजिकविज्ञानम्, विज्ञानम्, संगणकविज्ञानम्, दर्शनम्, योगः, वैदिककृषिः, समाजोपयोगि-उत्पादकविषयाः (SUPW) महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षाबोर्ड् इत्यस्य प्रतिविषयं पाठ्यपुस्तकेषु संयोजिताः सन्ति। इतरे आवश्यकाः आधुनिकविषयाः भारतीयज्ञानपरम्परायाः (आई.के. एस्.) विषयाणां अनुप्रविष्टीनाम् उपरि (इनपुट) आधारिता वर्तन्ते। एते सर्वे पाठ्यपुस्तकविषया 2020 राष्ट्रियशिक्षानीतेः दिशानिर्देशस्य अनुरूपं संयोजिताः वर्तन्ते। 2020 राष्ट्रियशिक्षानीतिं, महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य वैदिक-शैक्षिकचिन्तकानां प्राधिकरणानां च परामर्शं च ध्यात्वा प्रापणीय-अभिलेख-संचिका- (PDF) (ऑनलाईन पुस्तकम्) पुस्तकानि प्रस्तुतानि सन्ति। एन.सी.ई.आर्.टी-संस्थया प्रकाशनीयायाः नवीन-राष्ट्रियपाठ्यचर्या-रूपरेखायाः अनुरूपम् एतानि पुस्तकानि अद्यतनानि करिष्यन्ते, ततः परमेव मुद्रितरूपेण पुस्तकानि उपलब्धानि भविष्यन्ति।

प्रतिष्ठानस्य राष्ट्रियादर्शवेदविद्यालयस्य अध्यापकाः, वेदाध्यापने समर्पिता वेदाचार्याः, संबद्ध-विविधवेदपाठशालानां संस्कृताध्यापकाः संस्कृतपाठ्यपुस्तकानां प्रत्नरूपम् अभिलेखम् निरन्तरं परिश्रम्य निरमन्। तदुपरि प्रतिष्ठानेन संबद्धानां वेदपाठशालानां नैके संस्कृताध्यापकाः सुपरिश्रम्य इत्थंरूपाणि संस्कृतपाठ्यपुस्तकानि सुष्ठु निर्मितवन्तः । तान् सर्वान् प्रति धन्यवादान् अर्पयामि । राष्ट्रस्तरीयाः संस्कृतभाषाविशेषज्ञाः समये समये पाठ्यपुस्तकेषु गुणवत्तामानेतुं विविधाः संस्तुतीः दत्त्वा दोषनिवारणं च कृत्वा पुस्तकानां गुणाधिक्ये साहाय्यं कृतवन्तः । तान्

सर्वानपि धन्यवादैः सभाजयामि। अक्षरयोजनाय, मुद्राक्षरदोषदूरीकरणाय, चित्राङ्कनाय च मम सहयोगिनः कर्मचारिणः कार्यं कृतवन्तः। तेभ्यः हार्दान् धन्यवादान् अर्पयामि।

पाठ्यपुस्तकानां गुणवत्ताविकासाय पुनः परिष्काराय च रचनात्मकविचाराणां कृते स्वागतवचांसि व्याहरामि। किं बहुना--

**आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्।**
**बलवदपि शिक्षितानाम् आत्मन्यप्रत्ययं चेतः॥**

(अभिज्ञानशाकुन्तलम् १.०२)

प्रो. विरूपाक्ष वि जड्डीपाल्
सचिवः
महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी
महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षा-बोर्ड, उज्जयिनी

# पाठ्यपुस्तकविषये प्रस्तावना

सस्वरवेदाध्ययनस्य, श्रुतिपरम्परायाः च संरक्षणाय प्रतिष्ठापितस्य महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य, प्राथमिकस्तरात् उच्चतरमाध्यमिकस्तरपर्यन्तं वेद-संस्कृत-शिक्षण-पाठ्यक्रमाणां मानकीकरणाय, संवर्द्धनाय, परीक्षामान्यतायै, प्रमाणीकरणाय च संस्थापितस्य "महर्षिसान्दीपनिराष्ट्रीयवेदसंस्कृतशिक्षाबोर्ड्" इत्यस्य वेदभूषण-तृतीय-कक्ष्यायाः, सामान्यशिक्षणव्यवस्थायाम् अष्टमकक्ष्यायाः कृते निर्धारितम् इदं पाठ्यपुस्तकम् अध्येतृहस्ते अस्ति इति नितराम् आनन्दस्य विषयः। 2020 राष्ट्रियशिक्षानीतेः (NEP-2020) अनुरूपं पुनर्व्यवस्थापितायां 3 + 4 सप्तवर्षीयायां प्रतिष्ठानस्य वेदाध्ययनपाठ्यक्रमयोजनायां वेदाध्ययननिरतान् पारम्परिकच्छात्रान् मुख्यधारायाम् आनेतुं, संस्कृतपाठ्यपुस्तकद्वारा भाषादक्षतां संवर्धयितुं च प्रयत्नः कृतः अस्ति।

वेदवाङ्मय-संस्कृतग्रन्थस्थविषयाणाम् उपयोगं कृत्वा वेद-संस्कृतपाठशालानां पाठ्यक्रमसामग्र्यः आधुनिकसमस्यानां निवारणोपायान्वेषणाय विकसिताः स्युः इति नीतिगतं चिन्तनमस्ति। तदनुसारं केचन विषयाः योजिताः। अत्र पाठ्यपुस्तके यथास्थानम् आधुनिकज्ञानविज्ञानैः च सह भारतीयचिन्तनधारायाः, वैदिकज्ञानस्रोतसः च उपयुक्तज्ञानसामग्रीणां समायोजनं वर्तते। समग्रे विश्वे बहोः कालात् भारतीयसभ्यतायां शास्त्राणां, ज्ञानस्य, विज्ञानस्य, प्रौद्योगिक्याः च शिक्षणस्य विशाला सुदृढा च इदम्प्रथमतया प्रवर्तिता परम्परा वर्तते । भारतं प्राचीनकालादेव ऋषीणां, ज्ञानिनां, विदुषां वैज्ञानिकानां च भूमिः अपि । भारतस्य समृद्धां प्राचीनसंस्कृतिम्, आधुनिकजीवनपद्धतिं, भारतीयज्ञानप्रणालीं, परम्परां च संयोजयितुं संवर्धयितुं च सर्वकारेण शिक्षानीतिः निर्मिता। पाठ्यसामग्रीद्वारा एतस्याः अनुभवः भवेत् इति अनुभवपूर्वकम् अधिगमाय च सामग्री अत्र प्रदत्ता।

सर्वस्तरेषु संस्कृतस्य अध्ययनम् अभिप्रेरकं, सम्प्रेरकम्, आनन्ददायकं भाषाशिक्षणसोपानानुगुणं च भवेत्। सरलतया संस्कृतभाषाशिक्षणाय, विविधविषयाध्यापनाय च उपयोगि पाठ्यपुस्तकानि भवेयुः । पुस्तकम् अभ्यस्य सरलतया संस्कृतेन संभाषितुं योग्यता

छात्राणां स्वतः भवेत् । अन्यभाषामाध्यमेन संस्कृतस्य पठनं पाठनं च न भवेत्, संस्कृतमाध्यमेन एव भवेत् , संस्कृतपाठ्यविषयाणां लेखनं सरलमानकसंस्कृतेन भवेत् इत्यादीनि संकल्पनानि अस्य पाठ्यपुस्तकस्य निर्माणावसरे मनसि स्थापितानि।

संस्कृताध्यापनाय अस्य पाठ्यपुस्तकस्य उपयोगं ये कुर्वन्ति ते पुनः पुनः अभ्यासं कारयित्वा भाषण-पठन-लेखन-कौशलानां विकासाय अध्यापकाः प्रयत्नं कुर्युः। संस्कृते गणितम्, दर्शनम्, व्याकरणम्, संगीतम्, राजनीतिः, चिकित्सा, वास्तुकला, धातुविज्ञानम्, नाटकम्, कथा आख्यायिका, कविता इति वाङ्मयविधानां विशालः कोषः वर्तते, स च यथास्थानं पाठेषु संयोजितः अस्ति। पाठ्यसामग्रीनिर्माणावसरे विज्ञानं, सामाजिकविज्ञानं, कला, मानविकी, क्रीडा एवमादिभिः सह बहुविषयिण्याः समग्रशिक्षाया उपरि, संस्कृतभाषादक्षताविषये च बलं प्रदत्तमस्ति। शिष्टाचारः, स्वच्छता, सेवाभावना, मौलिककर्तव्यम्, नगरिकता-कौशलं मूल्यं च, सामूहिककार्यम्, मौखिकं लिखितं च अभिव्यक्तिसामर्थ्यं, संवादकौशलं च, मानवसम्बद्धानि संवैधानिकमूल्यानि, सहानुभूतिः, लोकतान्त्रिकी भावना, वैज्ञानिकचिन्तनं, न्यायः इति भावाः आनुभविकाधिगमाय तत्र तत्र पाठ्यसामग्र्याम् अन्तः निवेशिताः । इमे संस्कृतविषयाः रुचियुक्तैः विधिभिः आकर्षकविधानैः प्रासङ्गिकविधिभिः च पाठनीयाः प्रयत्नतः।

संस्कृतस्य स्तरानुगुणं पाठ्यसामग्र्यां वेदसम्बद्धाः संस्कृतभाषाविषयाः योजिताः सन्ति। संस्कृतस्य सम्यक् अध्ययनं शुद्धेन अक्षरोच्चारणेन स्फुटितं भवति, तत् वेदाध्ययने साहाय्यं करोति च। अतः शुद्धतया स्पष्टतया अक्षरोच्चारणशिक्षणे अध्यापकाः दत्तावधाना स्युः। अष्टाध्यायी जगन्माता, अमरकोशो जगत्पिता इति उपदेशम् अनुपालयन्तः भाषादक्षताप्राप्तये, व्युत्पत्तिलाभाय च प्रयतामहे। अतः व्याकरणसूत्राणां, अमरकोशस्य, काव्यानां, सुभाषितानां च अवबोधपूर्वकं कण्ठस्थीकरणं विद्याग्रहणदृष्ट्या अत्यावश्यकम्। प्रतिपाठं व्याकरणांशाः, काव्यांशाः, शब्दधातुरूपाणि, अन्ते भाषाविषयकाः अभ्यासाः च प्रदत्तानि सन्ति। योग्यताविस्तारे प्रदत्तैः अंशैः छात्राः स्वयम् अध्ययनं कृत्वा ज्ञानवर्धनं कर्तुं समर्था भवन्ति । बालकेषु बालिकासु च स्वकीयसांस्कृतिकेतिहासे, कलायां, भाषासु, परम्परासु च

स्वकीयभावनाया विकासेनैव गुणपूर्णस्य सांस्कृतिकाभिज्ञानस्य संस्कारः उत्पादयितुं शक्यते। अतः एतादृशेषु विषयेषु पाठनावसरे अवधानं देयमस्ति। अध्येतारः एतस्य संस्कृतभाषा-व्याकरण-पाठ्यपुस्तकस्य सम्यक् अध्ययनेन लाभान्विता भविष्यन्ति इति विश्वसिमः।

प्रतिष्ठानेन संबद्धानां वेदपाठशालानां संस्कृताध्यापकाः श्रीसुरेशचन्द्रशर्मा, श्रीमणिशङ्करमिश्रः, डॉ. नरेशगोपालकटारा, डॉ. विजयकुमार उपाध्यायः, श्रीमनोजकुमारशर्मा, श्री अखलेशकुमारः, डॉ.ब्रजबिहारीपाण्डेयः, प्रतिष्ठानस्य अध्यापकचरः डॉ. अनूपकुमारमिश्रः च संस्कृतपाठ्यपुस्तकस्य प्राग्रूपतया (ड्राफ्ट) कांश्चन पाठान् निर्मितवन्तः। आदितः संस्कृतपाठ्यपुस्तक-निर्माण-कार्ये अस्मिन् संपूर्णतया संयुक्ताः डॉ.श्रीशेषराजरेग्मी, डॉ.यतिराज-सापकोटा, डॉ.सुकान्तप्रामाणिकः च संशोधन-प्रश्नसंयोजन-योग्यताविस्तारादियोजनेन, दोषदूरीकरणेन च अन्तिमं पुस्तकनिर्माणं कृतवन्तः। राष्ट्रियादर्शवेदविद्यालयस्य इदानीन्तनः संस्कृताध्यापकः डॉ. वेणुधरदाशः संस्कृतपाठ्यपुस्तकानां मुद्रणशोधने साहाय्यम् अकरोत्। तान् सर्वान् प्रति धन्यवादान् अर्पयामः ।

राष्ट्रस्तरीयाः विविधाः संस्कृतभाषाविशेषज्ञाः यथासमयं संस्तुतीः दत्त्वा दोषनिवारणं कृतवन्तः । तेषां सर्वेषां कृते धन्यवादाः समर्प्यन्ते। अक्षरयोजनाय, मुद्राक्षरदोषदूरीकरणाय, पत्रसंयोजनाय, चित्राङ्कनाय च श्रीमती मिताली रत्नपारखी, श्रीमती किरण-परमार, श्रीशैलेन्द्र डोडिया एवम् अन्ये च सहयोगिनः कर्मचारिणः कार्यं कृतवन्तः। तेभ्यः ताभ्यश्च हार्दान् धन्यवादान् अर्पयामः।

पाठ्यपुस्तकानां परिष्काराय विद्वांसः सूचनाः प्रयच्छन्तु इति प्रार्थनां कुर्मः।

पाठ्यपुस्तकनिर्मातृगणसदस्याः अध्यापकाः

# किमर्थमध्येयं संस्कृतम् ? ...... अतः अध्येयं संस्कृतम्।

1. अस्माकं भारतराष्ट्रस्य अत्यमूल्यः ज्ञाननिधिः संस्कृतभाषा। संस्कृते ज्ञानं, विज्ञानं, शब्दसम्पत्, नूतनशब्दनिर्माणशक्तिः,चिन्तनसम्पत्, देशस्य एकसूत्रे ग्रन्थनशक्तिश्च च सन्ति। संस्कृतभाषया तत्र विद्यमानेन लौकिकेन अलौकिकेन च ज्ञानेन विश्वस्मिन् विश्वे भारतस्य महान् आदरः, प्रतिष्ठा च वर्तते। भारतं प्रति वैश्विकस्य समादरस्य रक्षणाय संवर्धनाय च, वसुधैव कुटुम्बकमिति, यत्र विश्वं भवत्येकनीडमिति च भावनायाः संपोषणाय संवर्धनाय च संस्कृतस्याध्ययनं वयं कुर्याम, संस्कृताध्ययनाय विश्वजनान् बोधयेम, संस्कृताध्ययने समादरं च दध्याम।

2. भारतीयसंस्कृतेः ज्ञानं संस्कृतभाषां विना नैव सम्भवति । भारतीयसंस्कृतेः भारतीयजीवनपद्धतेः, विविधानां पर्वणां च सम्यक् ज्ञानम् आचरणं च संस्कृताध्ययनं विना न सम्भवति। संस्कृतिः संस्कृताश्रिता। उक्तं च "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा" ।

3. मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव, सत्यं वद, धर्मं चर, सत्यान्न प्रमदितव्यम्, धर्मान्न प्रमदितव्यम्, कुशलान्न प्रमदितव्यम्, वसुधैव कुटुम्बकम्, सङ्गच्छध्वं संवदध्वं, सह नाववतु सह नौ भुनक्तु, सत्यमेव जयते नानृतम्, उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत, ईशावास्यमिदं सर्वम्, आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, श्रुतं मे गोपाय, उद्धरेदात्मनात्मानम् इत्यादीनाम् अमूल्यानां प्रेरकाणां जीवनपथदर्शकाणां नीतिवाक्यानां सर्वाद्यं स्रोतः संस्कृतम्। मानवजीवनस्य साफल्याय, एतेषां नीतिवाक्यानां परिज्ञानाय च अध्येयं संस्कृतम्।

4. सर्वेषां मानावानां कृते अविनाशी सनातनः ज्ञाननिधिः वेदराशिः। वेदार्थज्ञानाय वेदभाष्यज्ञानम् आवश्यकम्, वेदभाष्यज्ञानाय संस्कृतम् अध्येयम्।

5. उदात्त-अनुदात्त-स्वरित-स्वरपूर्वकं समुच्चारितो वेदो ज्ञाननिधिः वैश्विकं सृष्टिरहस्यम्, यच्च एतावता कालेन नैवोद्घाटितं प्रमाणितं वा अन्यैः वैदेशिकैः संशोधनैः, स वेदः

संस्कृतभाषामय एव ऋषिभिः दृष्टः समाम्नातश्च। सृष्टिरहस्यस्य परिज्ञानाय मन्त्र-सृष्टिरहस्यपरिज्ञानाय चाध्येयं संस्कृतम्।

6. वेदाः, उपनिषदः, ब्राह्मणानि, आरण्यकानि, पुराणानि, शिक्षादिषड्वेदाङ्गानि, स्मृतयः, ब्रह्मसूत्र-योगसूत्रादीनि सूत्राणि, रामायणम्, महाभारतम्, भगवद्गीता, पञ्चतन्त्रम्, हितोपदेशः, नीतिशतकम्, कालिदासादिकविरचितानि विविधानि काव्यानि, भासादिरचितानि विविधानि नाटकानि च संस्कृतभाषया एव रचितानि सन्ति । एतेषां वाङ्मयविशेषाणां ज्ञानाय सततं छात्रैः, सर्वैः जिज्ञासुभिः जनैश्च अध्येयं संस्कृतम्।

7. संस्कृते दर्शनशास्त्रम्, अर्थशास्त्रम्, राजनीतिशास्त्रम्, धर्मशास्त्रम्, नीतिशास्त्रम्, इतिहासपुराणानि आयुर्वेदादयः नानाज्ञानविषयाः विद्यन्ते। समृद्धस्य संस्कृतेः समृद्धं वाङ्मयम् अस्ति संस्कृते, तस्मात् संस्कृतम् अध्येतव्यम्।

8. संस्कृतवाङ्मयस्थानां विविधजीवनसूत्राणाम्, मानवान्तर्निहितस्य देवत्वस्य, आनन्दस्रोतसां च ज्ञानस्य, तेषां समुद्घाटनाय, आविष्काराय अमूल्यज्ञाननिधीनां ज्ञानाय च छात्रैः, सर्वैः जिज्ञासुभिः जनैश्च अध्येयं संस्कृतम्।

9. प्राचीनैः वैज्ञानिकैः चरक-सुश्रुत-कणाद-भास्कर-बोधायन-नागार्जुन-भारद्वाज-आर्यभट्ट-वराहमिहिरादिभिः रचितानां विविधानां वैज्ञानिकग्रन्थानां विज्ञानसिद्धान्तानां च सुष्ठु ज्ञानाय अध्येयं संस्कृतम्।

10. सर्वासां भारतीयभाषाणां नानावैश्विकभाषाणां च जननी पोषयित्री च संस्कृतभाषा। सर्वासु भारतीयभाषासु 95% शब्दाः संस्कृतभाषासमुत्पन्नाः एव शब्दा विलसन्ति। नानाराज्यवासिभिः जनैः भाषितानां विविधानां भाषाणां सुलभावगमाय, सुबोधाय च, अस्माकं भारतदेशस्य एकतायै अखण्डतायै च अध्येयं संस्कृतम्।

11. संस्कृतभाषा कंप्यूटर-यन्त्रस्य प्रोग्राम-समारचानाय योग्या भाषा अस्ति, भगवद्गीतायाः भाषा अस्ति, उपनिषदां भाषा अस्ति, वास्तु-खगोल-ज्यौतिष-आयुर्वेदादि-विज्ञनस्य भाषा अस्ति, नाट्यशास्त्र-सङ्गीत-चित्रादि-ललित-कालादीनां भाषा अस्ति, मानवविकासस्य ज्ञपिका भाषा अस्ति, संस्कृते अस्ति धर्मार्थकाममोक्षोपदेशः, जीवननिर्वाहाय हितावहः

श्रुतिस्मृत्युपदेशः अस्ति, राज्यशासनाय विश्वक्षेमङ्करः अर्थशास्त्रोपदेशः च अस्ति। लोकोपकाराय आत्मोद्धाराय च विश्वजनीनं तादृशं संस्कृतम् अध्येयम् ।

12. विविधेषु देशेषु वैदेशिकाः विद्वांसः संस्कृतभाषायाः ज्ञानमहिम्ना एव संस्कृताभिमुखाः अनुसन्धाननिरताः च दृश्यन्ते। संस्कृतवाङ्मये औषधित्वेन द्रव्यगुणत्वेन च उल्लिखितान् औषधिवनस्पतीन् आश्रित्य अनुसन्धानं विधाय ते वैदेशिकाः संशोधनतत्त्वं प्राप्तवन्तः सन्ति। अस्माभिरपि भारतीयस्य ज्ञानतत्त्वस्य रक्षायै प्रकाशाय देशहिताय च अनुसन्धानार्थम् अवश्यम् अध्येतव्यं संस्कृतम्।

13. भारतराष्ट्रस्य एकतायै अखण्डतायै च अत्यावश्यकमस्ति संस्कृताध्ययनम्। आसहस्रं वर्षेभ्यः अद्यावधि भारतस्य प्रतिग्रामं, सर्वेषु प्रदेशेषु, क्षेत्रेषु, राज्येषु संस्कृतस्य प्रभावः अविच्छिन्नतया दृश्यते। सर्वविधैः ज्ञानैः परिपूर्णा इयं भाषितभाषा देववाणी संस्कृतिशेवधिः, सुमधुरा, सरला, सरसा, सुबोधा, मनोज्ञा च । भारतवासिनां प्रत्येकं जनेन मनोयोगसाधनाय, मनस्सन्धानाय, नानाराज्यवासिभिः जनैः भाषितानां विविधानां भाषाणां, तत्रस्थानां शब्दानां च सुलभतया ज्ञानाय, भारतीयतायाः रक्षायै च अवश्यम् अध्येयं संस्कृतम्।

14. संस्कृतभाषायां विविध-विषयाणां ज्ञानस्य च अपरिमितत्वात् अगाधत्वात् च ज्ञान-महिम्ना एव चिराय भारतराष्ट्रं विश्वगुरुः आसीत्। तादृशं विश्वगौरवं पुनः प्राप्तुं, विश्वजनीनसौहार्दाय, विश्वशान्तये च जानीयाम संस्कृतम्, अधीयीमहि संस्कृतम्, अध्यापयेम संस्कृतम्।

15. भाषण-भूषण-आहार-विहार-व्यवहारसम्बद्धानां सदाचाराणां ज्ञानाय, कायिक-वाचिक-मानसिकव्यवहाराणां सम्यक् परिज्ञानाय, जीवनोपयोगिनां विषयाणां सम्यक्परिशीलनपूर्वकम् अनुभवाय समाजस्योपयोगिनां नानाविषयाणां शेवधिः संस्कृतभाषा अस्ति।

16. चरकसंहिता-सुश्रुतसंहिता-अष्टाङ्गहृदयाद्यायुर्वेदग्रन्थानां परिशीलनपुरस्सरं वात-पित्त-कफानां शरीरगतानां लक्षणज्ञानपुरस्सरं स्वस्थवृत्ताचारादिज्ञानेन निरामयाय निरामयजीवनयापनाय निश्श्रेयसे चाध्येयं संस्कृतम्।

17. संस्कृतभाषानिबद्धानां षड्दर्शनानां परिशीलनेन, योगादिशास्त्राणां प्रयोगेण निरन्तरम् अष्टाङ्गयोगाभ्यासेन च आत्मोद्धाराय, निश्श्रेयसे, मनश्शान्तये, स्वान्तस्सुखाय चाध्येयं संस्कृतम्, अध्याप्यं संस्कृतम्।

18. भारतस्य प्राचीनेतिहासप्रकाशकाः पुराणादयो ग्रन्थाः संस्कृतमाध्यमेन एव संरचिताः। अष्टादशसु पुराणेषु, अन्यत्र ग्रन्थेषु, प्राचीनशिलालेखेषु च भारतस्य प्रत्येकम् ऐतिहासिक-क्षेत्रस्य इतिहासः निगूढः अस्ति। यथार्थतया अस्मद्देशस्य इतिहासमधिगन्तुं प्रकाशयितुं च संस्कृतस्य ज्ञानमावश्यकम्। अतः संस्कृतम् अध्येयम्।

19. सर्वेषां विश्वजनीनानां मानवानाम् उपयोगी ज्ञानराशिः यथा - वैद्यकम्, योगः, ध्यानम्, जलस्रोतोन्वेषणम्, राष्ट्ररक्षासूत्राणि, नक्षत्रज्ञानम्, खगोलज्ञानम्, वैश्विकसृष्टिः, यज्ञयागादिः, भौतिकज्ञानं, रासायनिकं ज्ञानं, भौगोलिकाः पर्यावरणीयाः सामाजिकाः ज्ञानाधाराः, नीतिः, न्यायः इत्यादयः विषयाः, अन्यानि चिरन्तनानि चिन्तनानि च विलसन्ति संस्कृतग्रन्थेषु। तादृशानां विविधविषयाणां ज्ञानाय अध्येयं संस्कृतम्।

20. भाषाभिमानस्य, धनाभिमानस्य, मताभिमानस्य, आभिजात्याभिमानस्य, क्षेत्राभिमानस्य, अहङ्कारस्य च दूरीकरणपूर्वकं सत्यं, शिवं, सुन्दरम् इति भावनापूर्वकं सर्वत्र समबुद्धित्वस्य साधनाय अनुभवाय च, ततः भारतस्य राष्ट्रियैकतायै, अखण्डतायै, विकासाय च अध्येयं संस्कृतम्।

21. जीवनस्य सर्वाङ्गीणविकासाय, ज्ञानं (अध्यात्मं), विज्ञानं, कौशलं, कला चेति सर्वेऽपि विषयाः नूनमेव अपेक्षिताः। एतेषां चतुर्णां भारतीयविषयाणां ज्ञानाय, संवर्धनाय, अनुभूत्यै च संस्कृतस्य ज्ञानम् अनिवार्यम् अस्ति। अतः संस्कृतम् अध्येयम्।

# वेदभूषणतृतीयवर्षम्

## प्रथमायाः तृतीयवर्षेण अष्टमवर्गेण समकक्ष्यम्

- ✓ महर्षेः दधीचेः समाजस्य राष्ट्रस्य च उपकाराय त्यागविषयकं भावं जानन्ति। तस्मात् लोकोपकाराय त्यागविषयको भावः जागर्ति।
- ✓ लिट्लकारस्य प्रयोगज्ञानं वर्धते। नित्यं प्रयुज्यमानां यत्तदादिशब्दानां प्रोयोगज्ञानं भवति।
- ✓ तत्पुरुष-कर्मधारय-नञ्-द्विगु-प्रादि-उपपद-मयूरव्यंसक-अलुक्समासादिनाम् अवगमनं प्रयोगकौशलं ससूत्रं प्राप्स्यन्ति।
- ✓ षड्वेदाङ्गानां प्रयोजनविषयकं परिचयम् अवाप्नुवन्ति।
- ✓ संस्कृतोत्सवः कदा अनुष्ठीयते, समाजे तस्य प्रयोजनं वा किम् इति विषये अवगच्छन्ति।
- ✓ शतृ-शानच्-क्त-क्तवतु-तव्यत-अनीयर्-यत्-प्रत्ययानां योजनाय पदनिर्माणस्य सामर्थ्यम् अर्जयन्ति।
- ✓ छात्रेषु नैतिकमूल्याभिवर्धनं नीतिश्लोकाध्ययने अभिरुच्युत्पादनं च सम्भवति।
- ✓ चतुर्दशविधानां विद्यानां विषये सामान्यज्ञानं प्राप्नुवन्ति।
- ✓ द्वन्द्व-अव्ययीभाव-बहुव्रीहिसमासानां ससूत्रं प्रयोगकौशलं जानन्ति।
- ✓ संस्कृतनाटकेषु महाकविभासविरचितात् प्रतिमानाटकात् मर्यादापुरुषोत्तस्य रामस्य आदर्शचरित्रं जानन्ति प्रेरिताश्च भवन्ति।
- ✓ आदर्शपुरुषाणां वीराङ्गनानां च आदर्शचरितं ज्ञात्वा समाजविकासाय राष्ट्रविकासाय च प्रेरिता भवन्ति।
- ✓ पञ्चमहाकाव्यान्तर्गतस्य कुमारसम्भवकाव्यस्य परिचयं प्राप्स्यन्ति। संस्कृतसाहित्ये कालिदासस्य वैशिष्ट्यं ज्ञास्यन्ति।
- ✓ लट्-लङ्-लोट्-लकाराणां कर्तरि कर्मणि भावे च प्रयोगज्ञानं भवति।
- ✓ अजन्त-हलन्तशब्दानां भ्वादि-अदादि-जुहोत्यादि-दिवादि-स्वादि-तुदादि-रुधादि-तनादि-क्र्यादि-चुरादीनां दशगणीयानां धातूनां प्रयोगसामर्थ्यम् अभिवर्धयन्ति।

**टिप्पणी** - पाठ्यपुस्तकेऽस्मिन् मुख्यांशानामेव समायोजनं कृतं वर्तते। समग्रज्ञानार्थम् **शिक्षकैः मूलग्रन्थाः अध्याप्याः छात्रैश्च अध्येतव्याः।** अत्र सर्वेषां पाठगतानाम् उद्देश्यानां सामान्यतया ज्ञानाय एकत्र समायोजनेन उल्लेखः कृतः अस्ति। कक्ष्यायां साक्षात् पाठावसरे अन्तर्निहितान् उद्देश्यान् मनसि निधाय तं तं पाठम् अध्यापकः पाठयेत्, विद्यार्थिनः विद्यार्थिनीश्च बोधयेत्।

# पाठानुक्रमणिका


| | | | |
|---|---|---|---|
| | | प्रार्थना | |
| प्रथमः पाठः | - | महर्षिदधीचेः त्यागः | 1 - 6 |
| द्वितीयः पाठः | - | सम्भाषणम् (लिट्-लकार, परस्मैपदी, आत्मनेपदी च) | 7 - 12 |
| तृतीयः पाठः | - | समासः (तत्पुरुषः, कर्मधारयः नञ्, द्विगुः, प्रादिः, मयूरव्यंसकादिः, उपपदसमासश्च ) | 13 - 26 |
| चतुर्थः पाठः | - | वेदाङ्गानि | 27 - 34 |
| पञ्चमः पाठः | - | संस्कृतोत्सवः | 35 - 41 |
| षष्ठः पाठः | - | कृदन्तपरिचयः | 42 - 54 |
| सप्तमः पाठः | - | सुभाषितम् | 55 - 61 |
| अष्टमः पाठः | - | चतुर्दशविद्यास्थानानि | 62 - 68 |
| नवमः पाठः | - | द्वन्द्वाव्ययीभावबहुव्रीहयः | 69 - 81 |
| दशमः पाठः | - | श्रीरामवनगमनम् | 82 - 90 |
| एकादशः पाठः | - | अस्माकं राष्ट्रस्य गौरवम् | 91 - 97 |
| द्वादशः पाठः | - | नमस्त्रिमूर्तये तुभ्यम् | 98 - 106 |
| त्रयोदशः पाठः | - | प्रयोगपरिचयः, लट्-लङ्-लोटः | 107 - 114 |
| चतुर्दशः पाठः | - | मन्त्रद्रष्टारः ऋषयः | 115 - 121 |

# श्रीवेदपुरुषाय नमः

## मङ्गलम्

१. ॐ यज्ञाग्ग्रतो दूरमुदैति दैवन्तदु सुप्तस्य तथैवैति।
दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मे मनः शिवसंङ्कल्पमस्तु॥

*यजुर्वेदः ३४.१*

२. ॐ असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्मामृतं गमय॥
ॐ शान्ति शान्ति शान्तिः॥ *बृहदारण्यकोपनिषद् १.३.२८*

३. ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि॥

*यजुर्वेदः ३६.१७*

४. कृपा पारावारः सजलजलद श्रेणिरुचिरो
रमा वाणी रामः स्फुरदमलपङ्केरुहमुखः।
सुरेन्द्रैराराध्यः श्रुतिगणशिखागीतचरितो
जगन्नाथः स्वामी नयनपथगामी भवतु मे॥

५. ॐ ध्येयः सदा सवितृ-मण्डल-मध्यवर्ती,
नारायणः सरसिजासन-सन्निविष्टः।
केयूरवान् मकरकुण्डलवान् किरीटी,
हारी हिरण्मयवपुर्धृतशङ्खचक्रः॥

६. आदित्यस्य नमस्कारान् ये कुर्वन्ति दिने दिने।
आयुः प्रज्ञा बलं वीर्यं तेजस्तेषां च जायते॥

# प्रथमः पाठः

## महर्षिदधीचेः त्यागः

अस्माकं भारतदेशः पुण्यभूमित्वेन तपोभूमित्वेन च विख्यातः। तत्र च कारणं तपोभूमौ लब्धजन्मानः अनेके महापुरुषाः। ते हि तपस्सत्यत्यागदयादाक्षिण्यादिविशिष्टगुणैः जनमानसपटले श्रद्धार्हं स्थानमभजन्त, तादृशगुणविशिष्टेषु महापुरुषेषु, महर्षिः दधीचिः अन्यतमः।

पुरा सरस्वत्या नद्याः तटे कश्चन आश्रम आसीत्। तत्र दधीचिनामकः महर्षिः निवसति स्म। स महता तपसा अलौकिकीं शक्तिम् अलभत। जनसेवां कुर्वन् स महान्तम् आनन्दम् अनुभवति स्म। तस्मात् सोऽहर्निशं जनसेवायां निमज्जति स्म। तस्य प्रभावेण सः आश्रमः स्वर्गेण तुल्यः प्रतिभाति स्म।

तदा वृत्रासुरनामा कश्चिन्महाराक्षसो बभूव। सः स्वभावतः क्रूरो दुष्टो दयाहीनः पापाचारी चासीत्। स सर्वदा जनान् तुदति स्म। बलपूर्वकं प्रजानां धनम् अपहरति स्म। तस्य पीडाया जना भीता अभवन्। तस्य दुराचारं विलोक्य देवा अपि चिन्ताग्रस्ताः आसन्। वृत्रासुरस्य एतादृशं दुष्कृत्यं सोढुम् अशक्ताः सुराः तस्यासुरस्य वधार्थम् उपायम् अचिन्तयन्। परं मार्गान्तरम् अलभमानाः देवाः ब्रह्मणः समीपं प्राप्नुवन्। आगच्छतः देवान् विलोक्य ब्रह्मोवाच - भवताम् आगमनकारणम् अहं वेद्मि। वृत्रासुरस्य वधार्थं वज्रसदृशमस्त्रम् अत्यावश्यकम्, तादृशं शस्त्रं दधीचेः एव लब्धुं शक्यते। यतो हि महर्षिदधीचिः धर्मात्मा उदारश्च वर्तते । अतो दधीचिम् उपसृत्य वरमेकं वृणीध्वम्। यदा महर्षिः वरं दातुं सिद्धः, तदैव तस्य शरीरस्य अस्थीनि वररूपेण कामयन्ताम् । महर्षेः दधीचेः अस्थिभिः वज्रायुधस्य निर्माणं कुर्वताम्। तेन वज्रास्त्रेण वृत्रासुरः हन्तुं शक्य इति।

**इन्द्रमेवं समादिश्य भगवान् विश्वभावनः।**
**पश्यतामनिमेषाणां तत्रैवान्तर्दधे हरिः॥**

*(श्री भा. ६.१०.१)*

ब्रह्मदेवस्य वचनं श्रुत्वा सुरराजः इन्द्रो दधीचेः तपोवनं प्राप्नोत् । तत् तपोवनं नानाविधकुसुमैः, विविधफलैः, कपीनां क्रीडाभिः, भ्रमराणां गुञ्जनैः, हरिणानां विहारैश्च रमणीयम्

अवर्तत । नैके मुनयश्च तपोमग्ना आसन्। तेषु महता तेजसा देदीप्यमानं मुनिश्रेष्ठं दधीचिम् इन्द्रः दृष्टवान् । एवञ्च इन्द्रः भक्तिभावपुरस्सरं मुनिवरं सादरं ववन्दे ।

स्वाश्रमं समागतं सुरेन्द्रं दृष्ट्वा दधीचिः मधुरसम्बोधनेन एवं पृष्टवान् - भोः देवेन्द्र ! किमर्थं समागतोऽसि ? इन्द्रदेवः महर्षिं कथयामास – "याचको भूत्वा सम्प्राप्तोऽहम्। भवति लोकोपकारि अमूल्यं वस्तु विद्यते इति श्रुत्वा दधीचिः आश्चर्येण 'किं वा भवेद् मत्सकाशे' ? इति अपृच्छत्।

तदा सुरेन्द्रो जगाद - "हे ! महर्षे ! भवतः अस्थीनि एव लोकोपकारीणि भवितुम् अर्हन्ति, यतः भवदस्थिषु अपूर्वा काचिच्छक्तिः अस्ति । दुष्टस्य वृत्रासुरस्य नाशार्थं तेषाम् आवश्यकता वर्तते । अस्थिभिः वयं वज्रायुधस्य निर्माणं कुर्मः। तेनैव आयुधेन वृत्रासुरस्य वधः कर्तुं शक्येत। तच्छ्रुत्वा महर्षिः सानन्दम् उवाच - अस्य शरीरस्य त्यागः लोककल्याणाय क्रियते । उक्तञ्च-

**तथाभियाचितो देवैर्ऋषिराथर्वणोमहान् ।**
**मोदमान उवाचेदं प्रहसन्निव भारत ॥**

*श्रीभागवतम्. ६.१०.२*

अतः स्वीक्रियताम् गात्रमिदम्। तथोक्त्वा महर्षिदधीचिः नेत्रोन्मीलनं कृत्वा समाधिस्थो बभूव । पद्मासने उपविश्य प्राणायामेन श्वासं विरराम । योगमाध्मयेन प्राणत्यागं कृत्वा देहं सुरेन्द्रस्य अधीनञ्चकार ।

**धर्मं वः श्रोतुकामेन यूयं मे प्रत्युदाहृताः।**
**एष वः प्रियमात्मानं त्यजन्तं सन्त्यजाम्यहम्॥**

*श्रीमद्भागवतम् - ६.१०.७*

इन्द्रः अस्थिभिः वज्रायुधस्य निर्माणम् अकरोत्। तच्च अत्यन्तं कठोरं भीषणञ्च अभवत्। ततः देवदानवयोर्मध्ये प्रचण्डं युद्धं प्रावर्तत। बलवता वृत्रेण सह सुरेन्द्रः युयुधे। वज्रायुधेन वृत्रम् इन्द्रो जघान। वृत्रः अनश्यत्, लोकः सन्तुष्टः। एवं प्रकारेण महर्षिदधीचिः जगदुपकारार्थं स्वदेहस्य त्यागम् अकरोत्। तस्य औदार्येणैव देवाः मानवाश्च राक्षसभयान्मुक्ता अभूवन्। एतादृशापूर्वत्यागेन तपोधनस्य महर्षिदधीचेस्त्यागो जगति प्रसिद्धो बभूव।

# शब्दार्थाः

| | |
|---|---|
| असुरः | राक्षसः |
| अस्थि | मेदजम् |
| वज्रम् | अशनिः |
| प्रचण्डम् | भीषणम् |
| घोरम् | दारुणम् |
| वधः | हननम् |
| मारणम् | वधः |
| लब्धजन्मानः | जन्म प्राप्तवन्तः |
| स्वर्गेण तुल्यः | स्वर्गेण सदृशः |
| दुष्कृत्यम् | निन्द्यम् |
| वृणीध्वम् | याचनां कुरुत |
| चिन्ताग्रस्ताः | चिन्तया पीडिताः |
| अनश्यत् | नष्टः |
| पापाचारी | दुष्टाः |
| विलोक्य | दृष्ट्वा |
| श्रुत्वा | आकर्ण्य |
| सम्प्राप्तः | समागतः |
| तपोमग्नाः | तपसि निमग्नाः |
| विरराम | विरतवान् |
| अधीनञ्चकार | अधीनम् अकरोत् |

# अभ्यासः

## १. उच्चारणं कुरुत -

लब्धजन्मानः, दाक्षिण्यादि, विशिष्टगुणैः, गुणविशिष्टेषु, उपलभते, स्वर्गेण तुल्यः, चिन्ताग्रस्ताः, दुष्कृत्यम्, वज्रसदृशम्, अस्त्रम्, वृणीध्वम्, वज्रायुधस्य, मुनिश्रेष्ठम्, स्वीक्रियताम्, अनश्यत्, जगदुपकारार्थम्।

## २. एकपदेन उत्तरं लिखत -

(क) जनसेवायां महान्तम् आनन्दं कः अनुभवति स्म ?

(ख) स्वभावतः क्रूरो दुष्टो दयाहीनः पापाचारी कः ?

(ग) कस्य दुराचारं विलोक्य देवाः चिन्ताग्रस्ताः ?

(घ) देवाः प्रथमं कस्य समीपं प्राप्नुवन् ?

(ङ) इन्द्रः कस्य तपोवनं जगाम ?

## ३. पूर्णवाक्येन उत्तराणि लिखत -

(क) वृत्रासुरस्य नाशार्थं किम् आवश्यकम् ?

(ख) महर्षिदधीचिः कथं श्वासं विरराम ?

(ग) केन वज्रास्त्रेण वृत्रासुरः हन्तुं शक्यः ?

(घ) भक्तिभावपुरस्सरं इन्द्रः कं ववन्दे ?

(ङ) 'स्वीक्रियतां गात्रमिदम्' इति कस्य उक्तिः ?

(च) दधीचिमहर्षेः आश्रमः कुत्र आसीत् ?

## ४. रिक्तस्थानं पूरयत -

(क) दधीचिः................ महान्तम् आनन्दम् अनुभवति स्म ।

(ख) महर्षिः ........................... स्वदेहस्य त्यागम् अकरोत् ।

(ग) सुरेन्द्रः ............................. अस्थीनि स्वीकृत्य वज्रनिर्माणं चकार ।

(घ) ....................... बलपूर्वकं प्रजानां धनम् अपहरति स्म ।

(ङ) वृत्रासुरस्य एतादृशं ...................... सोढुमशक्ताः देवाः ।

## ५. रेखाङ्कितं पदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत -

(क) सुरासुरयोः प्रचण्डं युद्धं प्रावर्तत।

(ख) राक्षसः जनान् तुदति स्म ।

(ग) सरस्वत्याः नद्याः तटे महर्षेः आश्रमः आसीत् ।

(घ) अस्थिभिः वज्रायुधस्य निर्माणं चकार ।

(ङ) महर्षिदधीचेः त्यागो जगति प्रसिद्धो बभूव ।

## ६. अधोलिखितानां क्रियापदानां लकारपुरुषवचनानि लिखत -

| | क्रियापदानि | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| (क) | आसीत् | ................ | ................ | ................ |
| (ख) | अभूत् | ................ | ................ | ................ |
| (ग) | कुर्वताम् | ................ | ................ | ................ |
| (घ) | अचिन्तयन् | ................ | ................ | ................ |
| (ङ) | ववन्दे | ................ | ................ | ................ |
| (च) | वृणीध्वम् | ................ | ................ | ................ |
| (छ) | बभूवुः | ................ | ................ | ................ |
| (ज) | जगाद | ................ | ................ | ................ |

## ७. लिङ्गविभक्तिवचनानि लिखत -

| | क्रियापदानि | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|
| (क) | आश्रमः | ................ | ................ | ................ |
| (ख) | शक्तिम् | ................ | ................ | ................ |
| (ग) | दधीचिः | ................ | ................ | ................ |
| (घ) | अस्थीनि | ................ | ................ | ................ |
| (ङ) | गात्रम् | ................ | ................ | ................ |
| (च) | वज्रायुधस्य | ................ | ................ | ................ |
| (छ) | जगति | ................ | ................ | ................ |
| (ज) | भयात् | ................ | ................ | ................ |

८. विग्रहवाक्यं विलिख्य समासनाम लिखत -

| | समस्तपदानि | विग्रहः | समासनाम |
|---|---|---|---|
| (क) | जनसेवा | ........................ | ........................ |
| (ख) | तपोधनः | ........................ | ........................ |
| (ग) | मुनिश्रेष्ठः | ........................ | ........................ |
| (घ) | चिन्ताग्रस्ताः | ........................ | ........................ |
| (ङ) | लब्धजन्मानः | ........................ | ........................ |
| (च) | स्वर्गतुल्यः | ........................ | ........................ |

९. महर्षेः दधीचेः लोकोपकाराय योगदानविषये स्वविचारान् प्रकटयत तथा महर्षिदधीचेः तपोवनं वर्णयत ।

## योग्यता विस्तारः

१ महर्षिदधीचिः वैदिकः ऋषिः आसीत्।

२ यास्कमतानुसारं दधीचेः पिता अथर्वः आसीत् ।

३ दधीचेः मातुः नाम चित्तिः ।

पद्माकरं दिनकरो विकचीकरोति,
चन्द्रो विकासयति कैरवचक्रवालम्।
नाभ्यर्थितो जलधरोऽपि जलं ददाति,
सन्तः स्वयं परहितेषु कृताभियोगाः॥
क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः,
क्षीरोत्तापमवेक्ष्य तेन पयसा स्वात्मा कृशानौ हुतः।
गन्तुं पावकमुन्मनस्तदभवद् दृष्ट्वा तु मित्रापदम्,
युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी॥

# द्वितीयः पाठः

## सम्भाषणम्

### लिट्-लकारः, परस्मैपदी, आत्मनेपदी च

शिष्यः - अभिवादयेऽहं देवदत्तः, आचार्य!

आचार्यः - भोः! आयुष्मान् एधि देवदत्त ३।

शिष्यः - कथमस्ति आचार्य!?

आचार्यः - आम्। कुशली अस्मि। त्वं कथमसि वत्स!

शिष्यः - आम्। अहमपि अस्मि कुशली। आचार्य! अस्ति काचित् जिज्ञासा। कृपया शमयतु मे जिज्ञासाम्।

आचार्यः - एवम्। पृच्छतु तावत् ते जिज्ञासाम्।

शिष्यः - आचार्य! श्रीरामस्य चतुर्दशवर्षाणां वनवासः किमर्थं **बभूव**?

आचार्यः - शृणु वत्स ! श्रीरामस्य तिस्रः मातरः **बभूवुः**। तासु माता कैकेयी राजानं दशरथं वररूपेण रामस्य चतुर्दशवर्षाणां वनवासं तथा स्वपुत्राय भरताय अयोध्यायाः राजसिंहासनं **ययाच**।

शिष्यः - यदा श्रीरामः वनं **जगाम**, तदा तेन सह कौ आस्ताम् ?

आचार्यः - यदा श्रीरामः वनं **जगाम**, तदा तेन सह सीतालक्ष्मणौ आस्ताम्।

शिष्यः - भोः आचार्य! लक्ष्मणः वनवासकाले किमर्थं कोपं करोति स्म?

आचार्यः - यावत् श्रीरामे धैर्यम् आसीत् तावत् लक्ष्मणे नासीत् खलु ! अतः कुप्यति स्म।

शिष्यः - आचार्य ! श्रीरामः रावणं किमर्थं **जघान**?

आचार्यः - रावणः अत्यन्तम् अहङ्कारी सन् सीतामातरम् **अपजहार**। अतः सीतामातरं मोचयितुं रावणस्य अहङ्कारं विनष्टुञ्च श्रीरामः रावणं **मारयामास**।

शिष्यः - आचार्य ! यदा कुम्भकर्णः शेते तदा नैकेन प्रयत्नेनापि नोत्तिष्ठति, किमर्थं तथा?

आचार्यः - कुम्भकर्णस्य तपसा ब्रह्मा **सन्तुतोष** । यदा ब्रह्मा "अभीष्टं किमपि वृणीष्व" इति कुम्भकर्णम् **उवाच**, तदा कुम्भकर्णः त्रुटिवशात् इन्द्रासनस्य स्थाने

निद्रासनम् **उच्चारयाञ्चक्रे**। अतः ब्रह्मणो वरात् सः षण्मासान् **सुष्वाप**। वत्स! रामायणस्य महत्त्वविषये कौचन श्लोकौ वर्तेते, तच्छ्रूयताम् -

**यावत्स्थास्यन्ति गिरयः सरितश्च महीतले।**
**तावद्रामायणकथा लोकेषु प्रचरिष्यति॥ १॥**
**यावद्रामायणकथा त्वत्कृता प्रचरिष्यति।**
**तावदूर्ध्वमधश्च त्वम्मल्लोकेषु निवत्स्यसि॥ २॥**

*वाल्मीकिरामायणम् - १.२.३६-३७*

शिष्यः - धन्यवादः आचार्य ! अद्य मम वहूनां जिज्ञासानां समाधानम् अभूत् । पुनर्मिलामः, प्रणमामि ।

आचार्यः - यशस्वी भूयाः।

## शब्दार्थाः

| शमयतु | शान्तं करोतु |
|---|---|
| बभूव | अभवत् |
| ययाच | याचितवान् |
| जगाम | गतवान् |
| जघान | हतवान् |
| मोचयितुम् | मुक्त्यर्थम् |
| सन् | भूत्वा |
| मारयामास | मारितवान् |
| तपसा | तपस्यया |
| सन्तुतोष | सन्तुष्टः अभवत् |
| वृणीष्व | वरं याच |
| उच्चारयाम्बभूव | उच्चारणं कृतवान् |
| सुष्वाप | अस्वपीत् |
| महीतले | पृथिव्याम् |

| | |
|---|---|
| सरितः | नद्यः |
| प्रचरिष्यति | प्रचलिष्यति |
| निवत्स्यसि | वासं करिष्यसि |

## अभ्यासः

१. **उच्चारणं कुरुत -**

अहङ्कारं, विनष्टुम् , मारयामास, कुम्भकर्णः, प्रयत्नेनापि, नोत्तिष्ठति, ब्रह्मा, सन्तुतोष, अभीष्टम्, वृणीष्व, त्रुटिवशात्, उच्चारयाञ्चक्रे, षण्मासान्।

२. **एकपदेन उत्तरत -**

(क) श्रीरामः काभ्यां सह वनं जगाम ?

(ख) का श्रीरामस्य चतुर्दशवर्षाणां वनवासं ययाच ?

(ग) ब्रह्मा कथं सन्तुतोष ?

(घ) कुम्भकर्णः कति मासान् सुष्वाप ?

(ङ) कैकेयी भरताय दशरथं किं ययाच ?

३. **समुचितं मेलयत -**

| | |
|---|---|
| (क) श्रीरामस्य | तावत् नैकेन प्रयत्नेनापि नोत्तिष्ठति |
| (ख) काचित् | लिट्लकारः |
| (ग) निद्रासनम् | सन्तुतोष |
| (घ) ब्रह्मा | जिज्ञासा |
| (ङ) यशस्वी | भूयाः |
| (च) सुष्वाप | तिस्रः मातरः |
| (छ) उच्चारयाञ्चक्रे | उच्चारयाम्बभूव |
| (ज) कुम्भकर्णः यावत् शेते | आत्मनेपदी |

४. **रिक्तस्थानं पूरयत -**

(क) भोः .................. एधि देवदत्त ३।

(ख) अतः ब्रह्मणः ......................... सः षण्मासान् सुष्वाप।

(ग) ब्रह्मा "अभिष्टं किमपि वृणीष्व" इति .................... उवाच।

(घ) श्रीरामस्य .............. मातरः बभूवुः।

(ङ) कृपया .................. मे जिज्ञासाम्।

(च) ............................ महीतले।

(छ) यावद्रामायणकथा ................ ॥

## ५. कोष्ठकात् समुचितं पदं चित्वा रिक्तस्थानं पूरयत -

| निवत्स्यसि, षण्मासान्, सीतया, राजसिंहासनम्, श्रीरामः, इन्द्रासनस्य |
|---|

(क) .................. स्थाने निद्रासनम् उच्चारयाम्बभूव।

(ख) कुम्भकर्णः किमर्थं .......................... सुष्वाप ?

(ग) ............................ रावणं किमर्थं जघान ?

(घ) श्रीरामः ................................ लक्ष्मणेन च सह वनं जगाम।

(ङ) स्वपुत्राय भरताय ............................ ययाच।

(च) तावदूर्ध्वमधश्च त्वम्मल्लोकेषु ................ ।

## ६. अधोलिखितानां क्रियापदानाम् अन्येषु पुरुषवचनेषु रूपाणि विलिख्यन्ताम् -

| | क्रियापदानि | पुरुषः | वचनम् |
|---|---|---|---|
| (क) | ययाच | ................ | ................ |
| (ख) | आसन् | ................ | ................ |
| (ग) | कुप्यति | ................ | ................ |
| (घ) | मारयामास | ................ | ................ |
| (ङ) | अभूत् | ................ | ................ |
| (च) | वृणीष्व | ................ | ................ |
| (छ) | प्रणमामि | ................ | ................ |
| (ज) | निवत्स्यति | ................ | ................ |

## ७. अधोलिखितक्रियापदानि अन्यलकारेषु परिवर्तयत -

| | क्रियापदानि | विधिलिङ् | लट् | लङ् | लृट् | लोट् |
|---|---|---|---|---|---|---|
| (क) | बभाषे | ........... | ........... | ........... | ........... | ........... |

(ख) ववन्दे ............ ............ ............ ............ ............

(ग) चकार ............ ............ ............ ............ ............

(घ) ददर्श ............ ............ ............ ............ ............

(ङ) शुश्राव ............ ............ ............ ............ ............

८. 'भू-सत्तायाम्' इति धातोः लिट्-लकारस्य रूपाणि लिखत।

९. 'गम्लृ गतौ' इति धातोः लिट्-लकारस्य रूपाणि लिखत।

१०. 'शीङ् स्वप्ने' इति धातोः लिट्-लकारस्य रूपाणि लिखत।

## योग्यता-विस्तारः

श्रीरामस्य जन्मदात्री माता कौसल्या बभूव। कुम्भकर्णस्य तपसा ब्रह्मा सन्तुष्य यदा तं वरं याचितुम् अवदत्, तदा इन्द्रः जज्ञे यत् कुम्भकर्णः इन्द्रासनम् इच्छति इति। अतः इन्द्रः सिंहासनं प्रजाश्च संरक्षितुं देवीं सरस्वतीं प्रार्थयत - हे देवी ! कृपया भवती कुम्भकर्णेन अन्यथा उच्चारयतु, येन मम आसनं संरक्षितं स्यात्। तदा देवी सरस्वती इन्द्रस्य निवेदनं स्वीकृत्य कुम्भकर्णेन इन्द्रासनस्य स्थाने निद्रासनम् इति उच्चारणम् अकारयत्।

'भू सत्तायाम्' लिट्- लकारः, परस्मैपदी

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | बभूव | बभूवतुः | बभूवुः |
| मध्यमपुरुषः | बभूविथ | बभूवथुः | बभूव |
| उत्तमपुरुषः | बभूव | बभूविव | बभूविम |

'गम्लृँ गतौ' लिट्-लकारः, परस्मैपदी

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | जगाम | जग्मतुः | जग्मुः |
| मध्यमपुरुषः | जगमिथ | जग्मथुः | जग्म |
| उत्तमपुरुषः | जगाम/जगम | जग्मिव | जग्मिम |

‘शीङ् स्वप्ने’ लिट्-लकारः, आत्मनेपदी

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमपुरुषः | शिश्ये | शिश्याते | शिश्यिरे |
| मध्यमपुरुषः | शिश्यिषे | शिश्याथे | शिश्यिध्वे |
| उत्तमपुरुषः | शिश्ये | शिश्यिवहे | शिश्यिमहे |

‘हनँ हिंसागत्योः’ लिट्-लकारः, परस्मैपदी

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमपुरुषः | जघान | जघ्नथुः | जघ्न |
| मध्यमपुरुषः | जघनिथ | जघ्नथुः | जघ्न |
| उत्तमपुरुषः | जघन/जघान | जघनिव | जघनिम |

‘वृतुँ वर्तने’ लिट्-लकारः, आत्मनेपदी

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमपुरुषः | ववृते | ववृताते | ववृतिरे |
| मध्यमपुरुषः | ववृतिषे | ववृताथे | ववृतिध्वे |
| उत्तमपुरुषः | ववृते | ववृतिवहे | ववृतिमहे |

# तृतीयः पाठः

## समासः

### तत्पुरुषः, कर्मधारयः नञ्, द्विगुः, प्रादिः, मयूरव्यंसकादिः, उपपदसमासश्च

समसनं समासः, अर्थानुकरणं कृत्वा द्वयोः अनेकेषां वा पदानां एकपदी-भवनं समासः। सङ्क्षेपेण कथनं समासः इत्यपि उच्यते। समासे समस्तपदं विग्रहवाक्यम् इति अंशद्वयं विद्यते। विग्रहवाक्यं नाम समासस्य अर्थस्य अवबोधकवाक्यम्। यथा - रमायाः पतिः। समस्तपदं नाम समासेन निष्पन्नं पदम्। यथा - "रामपतिः"।

समासः पञ्चधा। तत्रादौ केवलसमासः। स च विशेषसंज्ञाविनिर्मुक्तः केवलसमासः प्रथमः। प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावो द्वितीयः। प्रायेणोत्तरपदार्थप्रधान-स्तत्पुरुषस्तृतीयः। तत्पुरुषभेदः कर्मधारयः, कर्मधारयभेदो द्विगुः। प्रायेणान्यपदार्थप्रधानो बहुव्रीहिश्चतुर्थः। प्रायेणोभयपदार्थप्रधानो द्वन्द्वः पञ्चमः।

**समर्थः पदविधिः** *(पा.सू. २.१.१)*

**पदविभागः -** समर्थः (प्रथमैकवचनम्), पदविधिः (प्रथमैकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** पदसम्बन्धी यो विधिः स समर्थाश्रितो बोध्यः।

**प्राक्कडारात्समासः** *(पा.सू. २.१.३)*

**पदविभागः -** प्राक् (अव्ययम्), कडारात् (पञ्चम्येकवचनम्), समासः (प्रथमैकवचनम्)। त्रिपदं सूत्रमिदम्।

**वृत्तिः -** कडाराः कर्मधारय इत्यतः प्राक् समास इत्यधिक्रियते।

**सह सुपा** *(पा.सू. २.१.४)*

**पदविभागः -** सह (अव्ययम्), सुपा (तृतीयैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** सह इति योगो विभज्यते। सुबन्तं समर्थेन सह समस्यते। समासत्वात्प्रातिपदिकत्वेन सुपो लुक्। परार्थाभिधानं वृत्तिः। कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः। वृत्त्यर्थाव-बोधकं वाक्यं विग्रहः। स च लौकिकोऽलौकिकश्चेति द्विधा। तत्र पूर्वं भूत इति विग्रहः लौकिकः। 'पूर्व अम् भूत सु' इत्यलौकिकः।

भूतपूर्वः। भूतपूर्वे चरडिति निर्देशात्पूर्वनिपातः। (इवेन समासो विभक्त्यलोपश्च) । वागर्थौ इव वागर्थाविव॥

## तत्पुरुषसमासः

प्रायेणोत्तरपदार्थप्रधानस्तत्पुरुषः। अस्मिन् समासे प्रायः उत्तरपदस्यार्थः प्रधानो भवति यथा - राज्ञः पुरुषः = राजपुरुषः, इह पुरुषशब्दस्यार्थः प्रधानः/मुख्यः इति।

**उदाहरणम्** - राजपुरुषम् आनय। अत्र आनयनक्रियया उत्तरपदार्थस्य पुरुषस्यैव अन्वयः न तु राज्ञः।




## सामान्यतत्पुरुषः -

सामान्यतत्पुरुषसमासे विग्रहवाक्यं सप्तसु विभक्तिषु भवति । अस्य सप्तभेदाः सन्ति यथा-

| सं. | तत्पुरुषभेदः | विग्रहवाक्यम् | समस्तपदम् |
|---|---|---|---|
| १. | प्रथमातत्पुरुषः | अर्धं ग्रामस्य | अर्धग्रामः |
| २. | द्वितीयातत्पुरुषः | पाठशालां गतः | पाठशालागतः |
| ३. | तृतीयातत्पुरुषः | रमया रचितम् | रमारचितम् |
| ४. | चतुर्थीतत्पुरुषः | गवे हितम् | गोहितम् |
| ५. | पञ्चमीतत्पुरुषः | पापात् भयम् | पापभयम् |
| ६. | षष्ठीतत्पुरुषः | वेदाङ्गस्य मूलम् | वेदाङ्गमूलम् |
| ७. | सप्तमीतत्पुरुषः | कार्ये कुशलः | कार्यकुशलः |

**तत्पुरुषः** *(पा.सू. २.१.२२)*

**पदविभागः** - तत्पुरुषः (प्रथमैकवचनम्)। एकपदं सूत्रमिदम्।

**वृत्तिः -** अधिकारोऽयम्, प्राग् बहुव्रीहेः।

**द्विगुश्च** *(पा.सू. २.१.२३)*

**पदविभागः -** द्विगुः (प्रथमैकवचनम्), च (अव्ययम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** द्विगुरपि तत्पुरुषसंज्ञकः स्यात्।

## प्रथमातत्पुरुषः

**पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे** *(पा.सू. २.२.१)*

**पदविभागः -** पूर्वापराधरोत्तरम् (प्रथमैकवचनम्),एकदेशिना(तृतीयैकवचनम्), एकाधिकरणे (सप्तम्येकवचनम्)। त्रिपदमिदं सूत्रम्।

**वृत्तिः -** अवयविना सह पूर्वादयः समस्यन्ते एकत्वसंख्याविशिष्टश्चेदवयवी। षष्ठीसमासापवादः। पूर्वं कायस्य पूर्वकायः। अपरकायः। एकाधिकरणे किम् ? पूर्वश्छात्राणाम्।

**उदाहरणानि -** पूर्वं कायस्य = पूर्वकायः । अपरं कायस्य = अपकायः ।
पूर्वं ग्रामस्य = पूर्वग्रामः । उत्तरं ग्रामस्य = उत्तरग्रामः ।

**अर्धं नपुंसकम्** *(पा.सू. २.२.२ )*

**पदविभागः -** अर्धम् (प्रथमैकवचनम्), नपुंसकम् (प्रथमैकवचनम्) । द्विपदमिदं सूत्रम्।

**वृत्तिः -** समांशवाच्यर्धशब्दो नित्यं क्लीबे तत्पुरुषसमासः स्यात्। अर्धं पिप्पल्याः अर्धपिप्पली।

**उदाहरणानि -** अर्धं पीप्पल्याः = अर्धपिप्पली । अर्धं मोदकस्य = अर्धमोदकम् ।

## द्वितीयातत्पुरुषः

**द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः** *(पा.सू. २.१.२४)*

**पदविभागः -** द्वितीया (प्रथमैकवचनम्), द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः (तृतीयाबहुवचनम्) । द्विपदं सूत्रमिदम्।

**वृत्तिः -** द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते स च तत्पुरुषः। कृष्णं श्रितः कृष्णश्रित इत्यादि।

**उदाहरणानि -** कृष्णं श्रितः = कृष्णाश्रितः। दुःखम् अतीतः = दुःखातीतः। कूपं पतितः = कूपपतितः। ग्रामं गतः = ग्रामगतः। कूपम् अत्यस्तः = कूपात्यस्तः। सुखं प्राप्तः = सुखप्राप्तः। सङ्कटम् आपन्नः = सङ्कटापन्नः ।

## तृतीयातत्पुरुषः

**तृतीया तत्कृतार्थेन गुणवचनेन** *(पा.सू. २.१.३०)*

**पदविभागः -** तृतीया (प्रथमैकवचनम्), तत्कृत (लुप्ततृतीयान्तं पदम्), अर्थेन (तृतीयैकवचनम्), गुणवचनेन (तृतीयैकवचनम्)। चतुष्पदात्मं सूत्रमिदम्।

**वृत्तिः -** तृतीयान्तं तृतीयान्तार्थकृतगुणवचनार्थेन च सह वा प्राग्वत्। शङ्कुलया खण्डः शङ्कुलाखण्ड। धान्येनार्थो धान्यार्थः। तत्कृतेति किम् ? अक्ष्णा काणः।

**उदाहरणानि -** परशुना खण्डः = परशुखण्डः। धान्येन अर्थः = धान्यार्थः।

**कर्तृकरणे कृता बहुलम्** *(पा.सू. २.१.३२)*

**पदविभागः -** कर्तृकरणे (सप्तम्येकवचनान्तम्), कृता (प्रथमैकवचनम्), बहुलम् (प्रथमैकवचनम्)। त्रिपदं सूत्रमिदम्।

**वृत्तिः -** कर्तरि करणे च तृतीया कृदन्तेन बहुलं प्राग्वत्। हरिणा त्रातो हरित्रातः। नखैर्भिन्नो नखभिन्नः। कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् (परिभाषा)। नखनिर्भिन्नः।

**उदहरणानि -** पाणिनिना रचितः = पाणिनिरचितः, रामेण रक्षितः = रामरक्षितः। वेदव्यासेन रचितः = वेदव्यासरचितः। अग्निना पक्वम् = अग्निपक्वम्। बाणेन हतः = बाणहतः।

## चतुर्थीतत्पुरुषः

**चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः** *(पा.सू. २.१.३६)*

**पदविभागः -** चतुर्थी (प्रथमैकवचनम्), तदर्थार्थबलिहितसुखरक्षितैः (तृतीयाबहुवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** चतुर्थ्यन्तार्थाय यत् तद्वाचिना अर्थादिभिश्च चतुर्थ्यन्तं वा प्राग्वत्। यूपाय दारु यूपदारु। (तदर्थेन प्रकृतिविकृतिभाव एवेष्टः)। तेनेह न - रन्धनाय स्थाली। अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम् (वार्तिकम्)। द्विजार्थः सूपः। द्विजार्था यवागूः। द्विजार्थं पयः। भूतबलिः। गोहितम्। गोसुखम्। गोरक्षितम्।

**उदाहरणानि -** यूपाय दारु = यूपदारु। घृताय दधि = घृतदधि। अत्र तदर्थशब्देन चतुर्थ्यन्तं सुबन्तपदं प्रकृतिविकृतिभावे एव प्रवर्त्तते नान्यत्र, तेन हि रन्धनाय स्थाली अत्र समासो न। अर्थशब्देन चतुर्थ्यन्तं पदं नित्यं समस्यते। तथा च अत्र विशेष्यस्य यत् लिङ्गं तत् लिङ्गम् एव समस्तपदस्य भवति। नित्यसमासत्वात् विग्रहवाक्ये अर्थशब्दस्य श्रवणं न भवति। यथा -

शिष्याय अयम् = शिष्यार्थः (ग्रन्थः)

शिष्याय इयम् = शिष्यार्था (उपनिषद्)

शिष्याय इदम् = शिष्यार्थम् (पुस्तकम्)

भूतेभ्यः बलिः = भूतबलिः (अत्र बलिशब्दार्थः समर्पणम् इति)

गोभ्यो हितम् = गोहितम्

गोभ्यो रक्षितम् = गोरक्षितम्

धेनवे सुखम् = धेनुसुखम्

## पञ्चमीतत्पुरुषः

**पञ्चमी भयेन** *(पा.सू. २.१.३६)*

**पदविभागः -** पञ्चमी (प्रथमैकवचनम्), भयेन (तृतीयैकवचनम्) । द्विपदं सूत्रमिदम्।

**वृत्तिः -** पञ्चम्यन्तं भयशब्देन सुबन्तेन समस्यते इत्यर्थः। भयभीतभीतिभीभिरिति वाच्यम् (वार्तिकम्)। वृकभीतः।

**उदाहरणानि -** चोराद् भयम् = चोरभयम्। व्याघ्राद् भीतिः = व्याघ्रभीतिः ।

भल्लूकात् भीतः = भल्लूकभीतः। सर्पेभ्यो भीः = सर्पभीः ।

## षष्ठीतत्पुरुषः

**षष्ठी** *(पा.सू. २.२.८)*

**पदविभागः -** षष्ठी (प्रथमैकवचनम्)। एकपदमिदं सूत्रम्।

**वृत्तिः -** षष्ठ्यन्तं सुबन्तेन समस्यते सः तत्पुरुषः। राजपुरुषः

**उदाहरणानि -** राज्ञः पुरुषः = राजपुरुषः । अश्वत्थस्य मूलम् = अश्वत्थमूलम् । गीतायाः उपदेशः गीतोपदेशः । शरीरस्य धर्मः = शरीरधर्मः ।

## सप्तमीतत्पुरुषः

**सप्तमी शौण्डैः** *(पा.सू. २.१.४०)*

**पदविभागः** - सप्तमी (प्रथमैवकवचनम्), शौण्डैः (तृतीयैकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः** - सप्तम्यन्तं शौण्डादिभिः प्राग्वत्। अक्षेषु शौण्डः अक्षशौण्ड इत्यादि। द्वितीयातृतीयेत्यादियोगविभागादन्यत्रापि तृतीयादिविभक्तीनां प्रयोगवशात् समासो ज्ञेयः।

**उदाहरणानि** - अक्षेषु शौण्डः = अक्षशौण्डः। व्याकरणे पटुः = व्याकरणपटुः। व्यवहारे कुशलः = व्यवहारकुशलः। शास्त्रेषु निपुणः = शास्त्रनिपुणः। आतपे शुष्कम् = आतपशुष्कम्। शास्त्रे प्रवीणः = शास्त्रप्रवीणः। वेदेषु पण्डितः = वेदपण्डितः। घृते पक्वम् = घृतपक्वम्।

## मयूरव्यंसकादिः

**मयूरव्यंसकादयश्च** *(पा.सू. २.१.७२)*

**पदविभागः** - मयूरव्यंसकादयः (प्रथमाबहुवचनम्), च (अव्ययम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः** - एते निपात्यन्ते। मयूरो व्यंसको मयूरव्यंसकः। व्यंसको धूर्तः। उदक्चावाक् च उच्चावचम्। निश्चितं च प्रचितं च निश्चप्रचम्। नास्ति किञ्चन यस्य सः अकिञ्चनः। अन्यत् सूत्रं सूत्रान्तरम्। अन्यो देशः देशान्तरम्।

## नञ्तत्पुरुषः

**नञ्** *(पा.सू. २.२.६)*

**पदविभागः** - नञ् (अव्ययम्)। एकपदं सूत्रमिदम्।

**वृत्तिः** - नञ् सुपा सह समस्यते।

**नलोपो नञः** *(पा.सू. ६.३.७३)*

**पदविभागः** - नलोपः (प्रथमैकवचनम्), नञः (षष्ठ्येकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः** - नञो नस्य लोपः स्यात् उत्तरपदे।

**उदाहरणानि** - न ब्राह्मणः = अब्राह्मणः। न सुखम् = असुखम्। न ज्ञानम् = अज्ञानम्। न सखी = असखी। न विद्या = अविद्या। न धर्मः = अधर्मः। नञ्तत्पुरुषसमासस्य षडर्थाः भवन्ति, तद्यथा -

**तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।**
**अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥**

सादृश्ये यथा - अब्राह्मणः। ब्राह्मणसदृश इत्यर्थः।

अभावे यथा - अभोजनं। भोजनाभाव इत्यर्थः।

अन्यत्वे यथा - अघटः। पटः घटभिन्न इत्यर्थः।

अल्पत्वे यथा - अनुदरी कन्या। अल्पोदरी इत्यर्थः।

अप्राशस्त्ये यथा - अधनम्। अप्रशस्तधनम् इत्यर्थः।

विरोधे यथा - अधर्म्मः परापकारः, परापकारः धर्म्मविरोधी इत्यर्थः।

**तस्मान्नुडचि** *(पा.सू. ६.३.७४)*

**पदविभागः** - तस्मात् (पञ्चम्येकवचनम्), नुट् (प्रथमैकवचनम्), अचि (सप्तम्येकवचनम्)। त्रिपदमिदं सूत्रम्।

**वृत्तिः** - लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुडागमः स्यात्। अनश्वः। नैकधेत्यादौ तु नशब्देन सह सुप्सुपेति समासः।

**उदाहरणानि** - न अश्वः = अनश्वः (न्-अ-अश्वः - अ-न्-अश्वः - अनश्वः)। न अविद्या = अनविद्या। न अभिज्ञः = अनभिज्ञः। नैकधा इत्यादौ तु न शब्देन सह सुप्सुपा इति समासः।

## कर्मधारयतत्पुरुषः

स च विशेषणपूर्वपदो विशेष्यपूर्वपदो विशेषणोभयपद उपमानपूर्वपद उपमानोत्तरपदः सम्भावनापूर्वपदोऽवधारणापूर्वपदश्चेति भेदात् सप्तविधः। (मध्यमपदलोपं मयूरव्यंसकादिं च स्वीकृत्य कर्मधारयो नवधा।)

**तत्पुरुषः समानाधिकरणः कर्मधारयः** *(पा.सू. १.२.४२)*

**पदविभागः** - तत्पुरुषः (प्रथमैकवचनम्), समानाधिकरणः (प्रथमैकवचनम्), कर्मधारयः (प्रथमैकवचनम्)। त्रिपदात्मकं सूत्रमिदम्।

**वृत्तिः -** समानाधिकरणः तत्पुरुषः कर्मधारयसंज्ञः स्यात्।

**विशेषणं विशेष्येण बहुलम्** *(पा.सू. २.१.५७)*

**पदविभागः -** विशेषणम् (प्रथमैकवचनम्), विशेष्येण (तृतीयैकवचनम्), बहुलम् (प्रथमैकवचनम्)। त्रिपदं सूत्रमिदम्।

**वृत्तिः -** भेदकं भेद्येन समानाधिकरणेन बहुलं प्राग्वत्। नीलमुत्पलं नीलोत्पलम्। बहुलग्रहणात्क्वचिन्नित्यम् - कृष्णसर्पः। क्वचिन्न - रामो जामदग्न्यः।

**उदाहरणानि -** नीलञ्च इदम् उत्पलम् = नीलोत्पलम् । उत्तमश्च अयम् अध्यापकः = उत्तमाध्यापकः । वीरश्च असौ पुरुषः = वीरपुरुषः । उत्कृष्टा च असौ भक्तिः = उत्कृष्टभक्तिः ।

**कुगतिप्रादयः** *(पा.सू. २.२.१८)*

**पदविभागः -** कुगतिप्रादयः (प्रथमाबहुवचनम्)। एकपदमिदं सूत्रमिदम्।

**वृत्तिः -** एते समर्थेन नित्यं समस्यन्ते। कुत्सितः पुरुषः कुपुरुषः।

**उदाहरणानि -**

| विग्रहवाक्यम् | समस्तपदम् |
|---|---|
| कुत्सितः पुरुषः | कुपुरुषः |
| प्रगतः आचार्य | प्राचार्यः |
| विरुद्धः पक्षः | विपक्षः |
| विशिष्टं ज्ञानम् | विज्ञानम् |
| अतिक्रान्तः देवम् | अतिदेवः |

## द्विगुतत्पुरुषः

द्विगुसमासो द्विविधः। एकवद्भावी अनेकवद्भावी चेति।

**उदाहरणम् -** **एकवद्भावी** - त्रयाणां शृङ्गाणां समाहारः त्रिशृङ्गम्, पञ्चानां फलानां समाहारः पञ्चफली। **अनेकवद्भावी** - सप्त च ते ऋषयः सप्तर्षयः।

**संख्यापूर्वो द्विगुः** *(पा.सू. २.१.५२)*

**पदविभागः -** संख्यापूर्वः (प्रथमैकवचनम्), द्विगुः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** तद्धितार्थेत्यत्रोक्तस्त्रिविधः संख्यापूर्वो द्विगुसंज्ञः स्यात्।

**उदाहरणानि -**

| विग्रहवाक्यम् | समस्तपदम् |
|---|---|
| अष्टानाम् अध्यायानां समाहारः | अष्टाध्यायी |
| पञ्चानां गवां समाहारः | पञ्चगवम् |
| पञ्चानां पात्राणां समाहारः | पञ्चपात्रम् |
| पञ्चानां वटाना समाहारः | पञ्चवटी |
| त्रयाणां लोकानां समाहारः | त्रिलोकी |
| चतुर्णां युगानां समाहारः | चतुर्युगम् |
| नवानां रात्रीणां समाहारः | नवरात्रम् |

द्विगुसमासः '**द्विगुरेकवचनम्**' इति सूत्रेण एकवचने भवति तथा '**स नपुंसकम्**' इति सूत्रेण नपुंसकलिङ्गे भवति। '**अकारान्तोत्तरपदद्विगुः स्त्रियामिष्टः**' इति वार्तिकेन अकारान्तोत्तरपदो द्विगुः तु स्त्रीलिङ्गे भवति। तद्यथा - अष्टाध्यायी।

**उपपदमतिङ्** *(पा.सू. २.२.१९)*

**पदविभागः -** उपपदम् (प्रथमैकवचनम्), अतिङ् (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** उपपदं सुबन्तं समर्थेन नित्यं समस्यते। अतिङन्तश्चायं समासः। कुम्भं करोतीति कुम्भकारः। अतिङ् किम् ? मा भवान् भूत्। माङि लुङिति सप्तमीनिर्देशान्माङुपपदम् (परिभाषा)। गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः। व्याघ्री। अश्वक्रीती। कच्छपीत्यादि।

**उदाहरणानि -**

| विग्रहवाक्यम् | समस्तपदम् |
|---|---|
| कुम्भं करोति इति | कुम्भकारः |
| भाष्यं करोति इति | भाष्यकारः |
| कण्ठे तिष्ठति इति | कण्ठस्थः |
| वृत्तिं करोति इति | वृत्तिकारः |
| सूत्रं करोति इति | सूत्रकारः |
| गङ्गां धरति इति | गङ्गाधरः |
| मन्त्रे तिष्ठति इति | मन्त्रस्थः |

# अभ्यासः

### १. उच्चारणं कुरुत -

अष्टाध्यायी, विशेषणं विशेष्येण बहुलम्, संख्यापूर्वो द्विगुः, तस्मान्नुडचि, पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे, नञ्।

### २. एकवाक्येन प्रश्नान् समाधत्त -

(क) समासस्य लक्षणं लिखत।

(ख) तत्पुरुष-समासे कस्य पदस्य प्राधान्यम् ?

(ग) 'राजपुरुषः' इत्यत्र कस्य पदस्य प्राधान्यम् ?

(घ) द्वितीयातत्पुरुषसमासस्य उदाहरणं लिखत ?

(ङ) 'कार्यकुशलः' इति कस्य तत्पुरुषस्य भेदः ?

(च) 'नञ्' इति सूत्रस्योदाहरणं लिखत ?

(छ) 'अष्टाध्यायी' इत्यस्य विग्रहवाक्यं किम् ?

### ३. पूर्णवाक्येन अधस्तनप्रश्नान् उत्तरत -

(क) 'अविद्या' इत्यस्य विग्रहवाक्यं लिखत ।

(ख) 'यूपदारु' अत्र केन सूत्रेण समासः ?

(ग) 'तस्मान्नुडचि' इति सूत्रस्य उदाहरणं लिखत ।

(घ) कर्मधारयसमासस्य अपरं नाम किम् ।

(ङ) 'नवरात्रम्' इत्यत्र कः समासः ?

### ४. यथोचितं मेलयत

| | |
|---|---|
| (क) प्रथमातत्पुरुषः | कार्यकुशलः |
| (ख) द्वितीयातत्पुरुषः | वेदाङ्गमूलम् |
| (ग) तृतीयातत्पुरुषः | पापभयम् |
| (घ) चतुर्थीतत्पुरुषः | रमारचितः |
| (ङ) पञ्चमीतत्पुरुषः | अर्धग्रामः |
| (च) षष्ठीतत्पुरुषः | पाठशालागतः |

(छ) सप्तमी तत्पुरुषः गोहितम्

## ५. कोष्ठके प्रदत्तानां पदानां विग्रहवाक्यं विलिख्य समासभेदं प्रदर्शयत -

| भाष्यकारः, | प्राचार्यः, | कृष्णसर्पः, | पञ्चपात्रम्, | अनादरः, | पापभयम् |
|---|---|---|---|---|---|

यथा - **राजपुरुषः = राज्ञः पुरुषः, षष्ठीतत्पुरुषः।**

| | **विग्रहवाक्यम्** | **समासनाम** |
|---|---|---|
| (क) | ................................ | ..........................। |
| (ख) | ................................ | ..........................। |
| (ग) | ................................ | ..........................। |
| (घ) | ................................ | ..........................। |
| (ङ) | ................................ | ..........................। |
| (च) | ................................ | ..........................। |

## ६. शुद्धवाक्यानां समक्षम् 'आम्' तथा अशुद्धवाक्यानां समक्षं 'न' इति लिखत -

(क) प्रायेणोत्तरपदार्थप्रधानस्तत्पुरुषः। [ ]

(ख) सामान्यतत्पुरुषसमासस्य पञ्च भेदा भवन्ति। [ ]

(ग) 'पाणिनिविरचितम्' इति पदे तृतीयातत्पुरुषसमासः। [ ]

(घ) 'प्राचार्यः' इति पदे द्विगुसमासो विद्यते। [ ]

(ङ) 'उत्तमाध्यापकः' इत्यत्र कर्मधारयसमासो वर्तते। [ ]

(च) सूत्रं करोति इति सूत्रकारः। [ ]

(छ) उपपदं सुबन्तं समर्थेन नित्यं समस्यते। [ ]

## ७. रिक्तस्थानानि पूरयत -

(क) पूर्वापरा...................धिकरणे।

(ख) द्वितीया ..........................पन्नैः।

(ग) तृतीया .......................वचनेन।

(घ) चतुर्थी .....................रक्षितैः।

(ङ) ............. समानाधिकरणः ............।

(च) .......................... बहुलम्।

(छ) .................. द्विगुः।

८. रेखाङ्कितपदानि अवलम्ब्य कारकं विभक्तिं च लिखत -

(क) विद्यार्थिनः गुरुकुलम् अधिवसन्ति।

(ख) यज्ञदत्तः अर्जुनेन सह वेदं पठति।

(ग) वटुः गुरुं प्रणमति।

(घ) कंसः श्रीकृष्णात् पराजयते।

(ङ) छात्राः उपाध्यायात् अधीयते।

## योग्यता-विस्तारः

कर्मधारयसमासे पूर्वपदस्य उत्तरपदस्य च विभक्तिः भवति, अस्य प्रधानतया अष्टौ भेदाः सन्ति।

| सं. | समासभेदः | | विग्रहवाक्यम् | समस्तपदम् |
|---|---|---|---|---|
| १. | विशेषणपूर्वपदः | १. | कृष्णश्च असौ सर्पश्च | कृष्णसर्पः |
| | | | श्वेतं च तत् वस्त्रं च | श्वेतवस्त्रम् |
| | | | नीलं च तत् उत्पलं च | निलोत्पलम् |
| २. | विशेषणोत्तरपदः | २. | नरः च असौ अधमः च | नराधमः |
| | | | नृपः च असौ श्रेष्ठः | नृपश्रेष्ठः |
| | | | भृत्यः च असौ अधमः | भृत्याधमः |
| | | | छात्रः च असौ श्रेष्ठः | छात्रश्रेष्ठः |
| ३. | विशेषणोभयपदः | ३. | शीतं च तत् उष्णं च | शीतोष्णम् |
| | | | शान्तश्च असौ अनुकूलश्च | शान्तानुकूलः |
| | | | शुक्लश्च असौ कृष्णश्च | शुक्लकृष्णः |
| ४. | उपमानपूर्वपदः | ४. | छाया इव चपला | छायाचपला |
| | | | मेघः इव श्यामः | मेघश्यामः |
| | | | घन इव श्यामः | घनश्यामः |
| ५. | उपमानोत्तरपदः | ५. | मुखं कमलम् इव | मुखकमलम् |

| | | | | |
|---|---|---|---|---|
| | | | नरः शार्दूल इव | नरशार्दूलः |
| | | | धर्मः दण्ड इव | धर्मदण्डः |
| | | | पुरुषः ऋषभ इव | पुरुषर्षभः |
| ६. | अवधारणपूर्वपदः | ६. | पुत्री एव धनम् | पुत्रीधनम् |
| | | | विद्या एव धनम् | विद्याधनम् |
| | | | नाम एव अमृतम् | नामामृतम् |
| | | | ज्ञानम् एव अमृतम् | ज्ञानामृतम् |
| ७. | सम्भावनापूर्वपदः | ७. | कैलास इति पर्वतः | कैलासपर्वतः |
| | | | यमुना इति नदी | यमुनानदी |
| | | | वेङ्कटाचल इति पर्वतः | वेङ्कटाचलपर्वतः |
| | | | आम्र इति वृक्षः | आम्रवृक्षः |
| ८. | मध्यमपदलोपः | ८. | शाकप्रियः पार्थिवः | शाकपार्थिवः |
| | | | देवपूजकः ब्राह्मणः | देवब्राह्मणः |
| | | | विष्णुपूजकः ब्राह्मणः | विष्णुब्राह्मणः |
| | | | हरिपूजकः ब्राह्मणः | हरिब्राह्मणः |

| क्र. | नाम | विग्रहवाक्यम् | समस्तपदम् |
|---|---|---|---|
| १. | नञ्समासः | न धर्मः | अधर्मः |
| | | न योग्यः | अयोग्यः |
| २. | कुसमासः | कुत्सितः पुरुषः | कुपुरुषः |
| | | कुत्सितं पात्रम् | कुपात्रम् |
| ३. | गतिसमासः | अशुक्लं शुक्लं कृत्वा | शुक्लीकृत्य |
| | | अरक्तं रक्तं कृत्वा | रक्तीकृत्य |
| ४. | प्रादिसमासः (प्रादितत्पुरुष समासः) | अतिक्रान्तः इन्द्रियम् | अतीन्द्रियः |
| | | निष्क्रान्तः कौशाम्ब्याः | निष्कौशाम्बिः |

क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥
भेद्यं विशेष्यमित्याहुर्भेदकं तु विशेषणम्।
प्रधानं तु विशेष्यं स्यादप्रधानं विशेषणम्॥
पदार्थे स्वार्थनिक्षेपादप्रधानं विशेषणम्।
विशेष्यं तु प्रधानं स्यात्स्वार्थस्यैव समर्पणात् ॥
षोढा समासः संक्षेपाद् अष्टाविंशतिधा पुनः।
नित्यानित्यत्वयोगेन लुगलुक्त्वेन च द्विधा ॥
तत्राष्टधा तत्पुरुषः सप्तधा कर्मधारयः।
सप्तधा च बहुव्रीहिर्द्विगुराभाषितो द्विधा॥
द्वन्द्वोऽपि द्विविधो ज्ञेयोऽव्ययीभावो द्विधा मतः।
तेषां पुनः समासानां प्राधान्यं स्याच्चतुर्विधम् ॥
चकारबहुलो द्वन्द्वः स चासौ कर्मधारयः।
यस्य येषां बहुव्रीहिः शेषस्तत्पुरुषः स्मृतः॥

# चतुर्थः पाठः

## वेदाङ्गानि

**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः ।**

**ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु ॥**

अङ्ग्यन्ते जायन्ते अमीभिरिति अङ्गानीति व्युत्पत्या अङ्गशब्दस्यार्थः उपकारको वर्तते। श्रुत्यर्थज्ञानाय येषां शास्त्राणाम् आवश्यकं वर्तते, तान्येव शास्त्राणि अङ्गानीति उच्यन्ते। शिक्षा, कल्पः, निरुक्तम्, छन्दः, ज्योतिषम्, व्याकरणञ्चेति षड् वेदाङ्गानि सन्ति। इमानि वेदस्य रक्षणे, अर्थज्ञाने च सहायकानि इति कारणात् वेदाङ्गानि इति अभिधीयन्ते। पाणिनीयशिक्षायां प्रत्येकं वेदाङ्गस्य महत्त्वमुक्तमस्ति, तद्यथा - छन्दः वेदस्य पादस्थानीयमस्ति, कल्पः वेदस्य हस्तस्थानीयमस्ति, ज्योतिषं वेदस्य चक्षुस्स्थानीयमस्ति, निरुक्तं वेदस्य श्रोत्रस्थानीयमस्ति, शिक्षा वेदस्य घ्राणस्थानीयमस्ति, व्याकरणं वेदस्य मुखस्थानीयमस्ति । तदुक्तम्-

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**

**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥**

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**

**तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥**

*पाणिनीयशिक्षा 41/42*

**१. शिक्षा –** यच्छास्त्रेण श्रुतिमन्त्राणां शुद्धोच्चारणे सौकर्यं साहाय्यञ्च भवति तच्छास्त्रं शिक्षेति उच्यते। अर्थात् स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते सा शिक्षा। श्रुतिषु सर्वथा स्वरो मुख्यो भवति, स्वरभेदेन अर्थभेदो जायते। इदं स्वरविज्ञानं शिक्षाधीनं भवति। अत एव शिक्षाशास्त्रस्य वेदाङ्गत्वं नितरां समुपपद्यते, यतोऽशुद्धोच्चारणेन महाननर्थो जायते। उक्तञ्च पाणिनीयशिक्षायाम् -

**मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**

**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥**

तैत्तिरीयोपनिषदः शिक्षावल्ल्यां शिक्षायाः प्रयोजनं निगदितं वर्तते - अथ शिक्षां व्याख्यास्यामः, वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तानः। इह वर्णः अकारादिः, स्वरस्तु उदात्तादिः, मात्रा ह्रस्वादयः, बलमुच्चारणस्थानं ताल्वादिकम्, साम निषादादिः, सन्तानो विकर्षणादिः।

**अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।**

**जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु च॥**

शिक्षायाः सम्यक् अध्ययनेन, ज्ञानेन, पुनः पुनः अभ्यासेन च वेदमन्त्राणां शुद्धम् उच्चारणं भवति। ऋग्वेदस्य पाणिनीयशिक्षा, यजुर्वेदस्य याज्ञवल्क्यशिक्षा, कृष्णयजुर्वेदस्य वासिष्ठीशिक्षा, सामवेदस्य नारदीयशिक्षा, अथर्ववेदस्य माण्डुकीयशिक्षा इति प्रसिद्धाः शिक्षाग्रन्थाः।

२. **कल्पः** – यागकर्मणाम् उपदेशः, यागविधीनां च निर्देशः यत्र अस्ति सः कल्पः। अत्र वेदमन्त्राणां विविधकर्मसु विनियोगविधानं निर्दिष्टं वर्तते। कल्प्यन्ते विधीयन्ते यज्ञयागादिप्रयोगाः यत्र सः कल्पः इति। यथोक्तं विष्णुमित्रेण - कल्पाः वेदविहितानां कर्मणाम् आनुपूर्व्येण कल्पनाशास्त्रम्।

कल्पसूत्राणां श्रौतसूत्रम्, गृह्यसूत्रम्, धर्मसूत्रम्, शुल्बसूत्रञ्चेति चतुर्धा विभागो वर्तते। श्रौतसूत्रेषु श्रौतयागविधिः निदर्शितः अस्ति। गृह्यसूत्रेषु गृहस्थैरनुष्ठेयानां कर्मणां विधिः निदर्शितः अस्ति। धर्मसूत्रेषु वेदविहितस्य धर्मस्य स्वरूपं दर्शितम् अस्ति। शुल्बसूत्रेषु यज्ञानाम् अनुष्ठानार्थं कुण्डानां मानं, परिमाणं, सूत्रमानं च दर्शितम् अस्ति ।

३. **व्याकरणम्** - '**मुखं व्याकरणं स्मृतम्**' इति शिक्षाकारेण षडङ्गेषु व्याकरणस्य मुख्यत्वं प्रतिपादितम् । भगवता पतञ्जलिना महाभाष्ये उक्तं यत् - "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च। **प्रधानञ्च षट्सु अङ्गेषु व्याकरणम्** । प्रधाने च कृतो यत्नः फलवान् भवति।" व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेन इति व्याकरणम्, व्याकरणपदस्य व्युत्पत्त्या साधुशब्दस्य सम्यक् ज्ञानं साधुशब्दव्युत्पादनम्, असाधुशब्देभ्यः साधुशब्दानां दूरीकरणं च व्याकरणेन भवति। वेदभाष्यकृत् आचार्यसायणः "**व्याकरणमपि प्रकृति-प्रत्ययाद्युपदेशेन पदस्वरूपं तदर्थनिश्चयाय प्रसज्यते**" इति प्राह। व्याकरणाद् ऋते शुद्धज्ञानं परिष्कृतशब्दप्रयोगश्च न सम्भवति। वेदादिशास्त्राणां संरक्षणं वेदमन्त्राणां शुद्धोच्चारणम् उदात्तानुदात्तादिस्वरज्ञानं व्याकरणशास्त्रस्य अध्ययनेनैव सम्भवति। अत एव **रक्षोहागमलघ्वसन्देहाः प्रयोजनम्** - रक्षा (वेदानां रक्षा), ऊहः (कल्पना) आगमः (श्रुतिः), लघुः (लघूपायः), असन्देहः (सन्देहरहितः) इति व्याकरणशास्त्रस्य

प्रयोजनं महाभाष्ये उक्तमस्ति। साधुशब्दज्ञानार्थं शुद्धप्रयोगार्थं च व्याकरणस्य अनिवार्यता अस्ति। उक्तं च -

**यद्यपि बहु नाधीषे, तथापि पठ पुत्र ! व्याकरणम्।**

**स्वजनः श्वजनो मा भूत्, सकलं शकलं, सकृच्छकृत्॥**

४. **निरुक्तम्** - वर्णागमो वर्णविपर्ययश्च इत्यादिना निश्चयेनोक्तं निरुक्तम् (निर्वचनम्)।

वैदिकशब्दार्थज्ञानाय निरुक्तं प्रधानरूपेण निर्वचनपदार्थकं सहायकं भवति। निरुक्ते वेदस्य विविधपदानां निर्वचनम् अस्ति। आचार्ययास्को निरुक्तस्य प्रणेता वर्तते। निघण्टौ स्थितानां वैदिकशब्दानां निर्वचनग्रन्थः निरुक्तमस्ति। यस्मिन् आचार्ययास्कः वैदिकशब्दानां सविस्तरं विवेचनमकरोत्। निघण्टोः पञ्चमाध्यायानां विचारः स्वकीये निरुक्तग्रन्थे यास्केन द्वादशाध्यायेषु विहितोऽस्ति। वेदाङ्गानि वेदपुरुषस्य बहिर्भूतानि तत्त्वानि निरुक्ते अन्तर्भूतानि सन्ति। निरुक्तं गद्यशैल्या निबद्धमस्ति किन्तु अन्ये वेदाङ्गग्रन्थाः सूत्रशैल्या निबद्धाः सन्ति।

५. **छन्दः** – वेदस्य पादौ तु छन्दो वर्तते। ऋग्वेदे सर्वा ऋचः छन्दोबद्धाः वर्तन्ते। यजुर्वेदे गद्य-पद्यमया मन्त्राः सन्ति। सामवेदे ऋग्वेदर्चः एव प्रधानतया विद्यन्ते, गीतरूपं छन्दोबद्धं साम। अथर्ववेदः छन्दोबद्ध एव। अतः वेदमन्त्राणां सम्यग् उच्चारणज्ञानाय तत्रत्यानां वृत्तानां ज्ञानाय च छन्दश्शास्त्रम् अत्यावश्यकम् अस्ति। ऋक्प्रातिशाख्यस्य षोडशपटले, अष्टादशपटले च छन्दसां विस्तृतं विवेचनमस्ति।

वैदिकच्छन्दस्सु अक्षरगणना भवति प्रधाना, न तु गुरुलघुक्रमः, न वा तयोः क्रमनियमः। उक्तञ्च कात्यायनेन - **'यदक्षरपरिमाणं तच्छन्दः'** इति। किञ्च लौकिकसंस्कृते छन्दःसु वृत्तस्य अक्षराणां गुरुता लघुता वा नियता, प्रधाना च। लौकिकच्छन्दस्सु चत्वारः चरणाः भवन्ति, किन्तु वैदिकच्छन्दस्सु अयं नियमः नास्ति।

वैदिकच्छन्दसाम् अनेके भेदाः सन्ति, तेषु गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्तिः, त्रिष्टुप्, जगती चेति सप्त छन्दांसि प्रधानानि वर्तन्ते। एतेषां छन्दसाम् अक्षरनियमः इत्थं दर्शितः अस्ति - गायत्री (२४ अक्षराणि), उष्णिक् (२८ अक्षराणि), अनुष्टुप् (३२ अक्षराणि), बृहती (३६ अक्षराणि), पङ्क्तिः (४० अक्षराणि), त्रिष्टुप् (४४ अक्षराणि) जगती (४८ अक्षराणि ) च। अन्यानि अतिजगत्यादीनि छन्दांसि छन्दोग्रन्थेषु एव द्रष्टव्यानि। यदि कस्यापि छन्दसः एकमक्षरं न्यूनं भवति, तदा तत् **'निचृत्'** इत्युच्यते, यदि एकमक्षरम् अधिकं भवति, तदा तत् **'भूरिक्'**

इत्यभिधीयते। नियमतः त्रिपदा अष्टाक्षरा गायत्री, मिलित्वा चतुर्विंशत्यक्षरा (२४) भवति, त्रयोविंशतेः (२३) अक्षराणां गायत्री **'निचृद्गायत्री'** तथा पञ्चविंशतेः (२५) अक्षराणां **'भूरिग्गायत्री'** कथ्यते। अनेन प्रकारेण यत्र द्वे अक्षरे न्यूने भवतः, तत्र **'विराट्'** भवति, तथा यत्र द्वे अक्षरे अधिके स्तः, तत्र **'स्वराट्'** भवति । छन्दोनामकेन वेदाङ्गेन सर्वेषामुच्चारणस्य विधिः, तद्गतिप्रकारः, सामगानरीतिश्च विदिता भवति। तस्मात् वेदमन्त्रोच्चारणप्रयोजनं मनसि निधाय छन्दसः अध्ययनम् अत्यावश्यकं दरीदृश्यते। विना छन्दोज्ञानं वेदाऽध्ययनं यजनं याजनं वा करोति कारयति, तस्य तानि सर्वाणि कार्याणि न भवन्ति फलदायकानि। महर्षिणा कात्यायनेन उक्तम् - **'यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वा अध्यापयति वा स्थाणुं वर्च्छति गर्ते वा पात्यते प्रमीयते वा पापीयान् भवति'** इति ।

६. **ज्योतिषम्** - ज्योतिषशास्त्रं तु वेदस्य नेत्रमस्ति। यथोक्तं पाणिनीयशिक्षायाम् - **"ज्योतिषामयनं चक्षुः"**। ज्योतिषशास्त्रस्य ज्ञानेनैव तिथि-पक्ष-मास-ऋतु-अयन-संवत्सर-वार-नक्षत्र-योग-करणादीनां ज्ञानं भवति। शुभकर्मणां यज्ञ-यागादीनां शास्त्रनिर्देशानुरूपं कालज्ञान-पूर्वकम् अनुष्ठानाय ज्योतिषशास्त्रस्य ज्ञानम् अत्यावश्यकं वर्तते। खगोले सूर्यस्य, चन्द्रस्य, मङ्गलस्य, बुधस्य, गुरोः, शुक्रस्य, शनेः च गतिज्ञानं, चन्द्रसूर्ययोः ग्रहणस्य ज्ञानं च ज्योतिषशास्त्रेण भवति । वैदिकसंहितासु कालविभागः सर्वत्र समुपलभ्यते, यथा - **'यो शम्बरं पर्वतेषु क्षियन्तं चत्वारिंश्यां शरद्यविन्दत ।'** ज्योतिषशास्त्रस्य महत्त्वम् अत्रोच्यते-

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालाभिपूर्वा विहिताश्च यज्ञाः।**
**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञम्॥**

## शब्दार्थाः

| | |
|---|---|
| शिक्षा | उच्चारणविधिः |
| कल्पः | यागादिक्रियाणामुपदेशः |
| व्याकरणम् | शब्दव्युत्पादको ग्रन्थः |
| निरुक्तम् | वेदस्थशब्दानां व्युत्पत्तिः |
| ज्योतिषम् | कालगणनशास्त्रम् |
| छन्दः | वृत्तज्ञानशास्त्रम् |
| निरूप्यते | निरूपणं क्रियते |

| प्रतिपाद्यते | प्रतिपादनं क्रियते |
|---|---|
| ऋते | विना |
| स्वजनः | कुटुम्बः |
| श्वजनः | कुक्कुरजनः |
| सकलम् | सर्वम् |
| शकलम् | अंशः |
| सकृत् | एकवारम् |
| शकृत् | विष्ठा |
| अहोरात्रः | अहर्निशम् |
| समुपलभ्यते | प्राप्यते |
| वृत्तज्ञानाय | छन्दोज्ञानाय |
| छन्दोबद्धाः | छन्दोमयाः |
| प्रसज्यते | प्रयुज्यते |

## अभ्यासः

१. **उच्चारणं कुरुत -**

निरुक्तम्, शिक्षा, ज्योतिषामयनम्, वेदाङ्गानि, छन्दश्शास्त्रम्, यज्ञार्थमभिप्रवृत्ताः, कालविधानशास्त्रम्, ब्रह्मलोके, साङ्गमधीत्यैव, महीयते।

२. **एकपदेन उत्तरं लिखत -**

(क) कति वेदाङ्गानि सन्ति ?

(ख) कल्पसूत्राणां कति विभागाः ?

(ग) लौकिकछन्दस्सु कति चरणाः भवन्ति ?

(घ) वेदाङ्गेषु मुखं किं वर्तते ?

(ङ) ज्योतिषशास्त्रस्य अध्ययनेन किं ज्ञायते ?

(च) वेदमन्त्राणाम् अर्थज्ञानं केन वेदाङ्गेन भवति ?

(छ) स्वरव्यञ्जन-वर्णयोः ज्ञानं केन भवति ?

## ३. एकवाक्येन उत्तरं लिखत -

(क) यास्कविरचिते निरुक्ते कति अध्यायाः वर्तन्ते ?

(ख) स्वरवर्णाद्युच्चारणप्रकारबोधकं वेदाङ्गं किम् ?

(ग) वेदपुरुषस्य नेत्ररूपेण किं स्वीक्रियते ?

(घ) क्लिष्टवैदिकशब्दानां निर्वचनं क्व प्राप्यते ?

(ङ) कालविधानशास्त्रं किम् ?

## ४. अधोलिखितानां पदानां समुचितं योजनं कुरुत -

| | |
|---|---|
| (क) कल्पः | पञ्च प्रयोजनानि |
| (ख) शिक्षाः | निघण्टुः |
| (ग) व्याकरणम् | धर्मसूत्रम् |
| (घ) निरुक्तम् | चक्षुः |
| (ङ) ज्योतिषामयनं | याज्ञवल्यशिक्षा |

## ५. अधस्तनकोष्ठकात् अक्षराणि चित्वा समुचितस्थाने स्थापयत -

| |
|---|
| अ, क्, ख्, ग्, घ्, इ, च्, छ्, य्, श्, ऋ, ट्, ठ्, ड्, र्, ष्, |
| ऌ, त्, न्, स्, उ, प्, फ्, म्, ङ्, ण्, न्, ए, ऐ, औ, व |

| | | | |
|---|---|---|---|
| **यथा -** | कण्ठः | = | अ, क्, ख्, ग्, घ् । |
| | तालु | = | ............................... |
| | मूर्धा | = | ............................... |
| | दन्ताः | = | ............................... |
| | ओष्ठौ | = | ............................... |
| | नासिका | = | ............................... |
| | कण्ठतालु | = | ............................... |
| | कण्ठोष्ठम् | = | ............................... |
| | दन्तोष्ठम् | = | ............................... |

६. सन्धिविच्छेदः क्रियताम् -

| | सन्धिविच्छेदः |
|---|---|
| (क) वेदाङ्गानि | ................ + ................ |
| (ख) वर्णोच्चारणस्थानम् | ................ + ................ |
| (ग) अत्यावश्यकम् | ................ + ................ |
| (घ) सूत्रश्चेति | ................ + ................ |
| (ङ) तथैव | ................ + ................ |

७. रिक्तस्थानानि पूरयत -

(क) शिक्षा कल्पः निरुक्तं ...................... षड् वेदाङ्गानि सन्ति।

(ख) कल्पसूत्राणां ............................ शुल्बसूत्रश्चेति चतुर्धा विभागः वर्तते।

(ग) निरुक्तशास्त्रस्य अध्ययनेन ............................... भवति।

(घ) ऋग्वेदे ............................... छन्दोबद्धाः वर्तन्ते।

(ङ) यजुर्वेदे ............................ मन्त्राः सन्ति।

(च) सामवेदे ऋग्वेदर्चः ...................... सन्ति, गीतरूपं ........................ साम।

(छ) ........................ छन्दोबद्धः एव ।

(ज) मुखं ...................... स्मृतम् ।

८. कोष्ठके विद्यमानानां क्रियापदानाम् अन्येषु पुरुषवचनेषु रूपाणि लिखत -

| क्रियापदानि | पुरुषः | वचनम् |
|---|---|---|
| (क) उच्यते | ................ | ................ |
| (ख) भवति | ................ | ................ |
| (ग) प्राप्यते | ................ | ................ |
| (घ) निष्पद्यते | ................ | ................ |
| (ङ) मन्यते | ................ | ................ |
| (च) वर्तन्ते | ................ | ................ |

९. शुद्धवाक्यानां पुरतः 'आम्' इति तथा अशुद्धवाक्यानां पुरतः 'न' इति लिखत ।

१. वेदाङ्गानि षड् भवन्ति । [ ]

२. षडङ्गेषु व्याकरणं प्रधानमस्ति। [ ]

३. छन्दस्सूत्रं पिङ्गलाचार्यरचितं नास्ति । [ ]

४. कल्पः पादौ तु वेदस्य [ ]

५. निरुक्तस्य प्रणेता यास्कः । [ ]

१०. अधोलिखितानि पदानि आधृत्य संस्कृते वाक्यरचनां कुरुत।

(क) व्याकरणम् ......................................................।

(ख) मन्त्रः ......................................................।

(ग) निष्पद्यते ......................................................।

(घ) निरुक्तम् ......................................................।

(ङ) सृजन्ति ......................................................।

(च) कल्पः ......................................................।

११. शिक्षावेदाङ्गस्य संहिताध्ययने प्रयोजनं वर्णयत ।

१२. केषाम् अध्ययनेन ब्रह्मलोके महीयते? स्पष्टयत ।

१३. शुल्बसूत्रेषु किं वर्णितमस्ति? सविस्तरं लिखत ।

## योग्यता-विस्तारः

| | | | |
|---|---|---|---|
| १. | वेदः | - | 'विदँ ज्ञाने' इति धातोः घञ् प्रत्ययेन वेदशब्दो निष्पद्यते। |
| २. | शिक्षा | - | स्वरवर्णाद्युच्चारणप्रकारो यत्र उपदिश्यते सा शिक्षा। |
| ३. | निरुक्तम् | - | निर्+वच्+क्त। |
| ४. | निघण्टु | - | नि+घण्ट+कु |
| ५. | अहोरात्रः | - | अहश्च रात्रिश्च। |
| ६. | पक्षः | - | पक्ष्यते परिगृह्यते देवपितृकार्य्यार्थं यः। पक्षो द्विविधः – १. शुक्लपक्षः २. कृष्णपक्षः |
| ७. | ऋतुः | - | षड् ऋतवः सन्ति । |
| ८. | मन्त्रः | - | मन्त्र्यते गुप्तं परिभाष्यते इति। |

# पञ्चमः पाठः

## संस्कृतदिवसः

**दिनेशः -** भोः सुहृद् ! अद्याहं कल्ये जयतु संस्कृतम्, जयतु भारतम् "संस्कृतभाषा अस्माकं भाषा" इत्यादीनि उद्घोषवाक्यानि अश्रृण्वम्। किम् इदम् ? के एते सोल्लासमुद्घोषवाणीमुच्चारयन्तः परिक्रामन्ति?

**जया -** आम् ! अहम् अपि प्रातः जयतु संस्कृतम्, जयतु भारतम् इत्यादीः उद्घोषवाणीः श्रुतवती।

**विवेकः -** अथ किं न जानासि त्वम् ? श्रावणमासस्य पूर्णिमायां तिथौ आविश्वं संस्कृतदिनम् आचर्यते। अस्मिन्नेव दिने रक्षाबन्धनोत्सवोऽपि अनुष्ठीयते।

**जया** - अस्ति वा कोऽपि सम्बन्धो रक्षाबन्धनोत्सवस्य संस्कृतदिवसेन सह ? कृपया विवृणु किञ्चित्।

**विवेकः -** आम्। नूनं विद्यते। प्राक्काले श्रावणपूर्णिमायां गुरुकुलेषु वेदाध्ययनं भवति स्म। अस्मिन्नेव दिने उपाध्यायाः अन्तेवासिनां हस्तेषु अन्तेवासिनश्च उपाध्यायानां हस्ते रक्षासूत्राणि बध्नन्ति स्म। अन्योऽन्यं रक्षाकामनाश्च कुर्वन्ति स्म। तदा आरभ्य अस्मिन्नेव दिने रक्षाबन्धनोत्सवः अनुष्ठीयते।

**मालिनी -** सुष्ठु उक्तं त्वया। किन्तु अस्मिन् दिने संस्कृतोत्सवः कथम् ?

**राजेशः -** अस्मिन्नेव दिने प्राचीनभारते गुरुकुलेषु शिक्षणसत्रारम्भो भवति स्म। अमुष्मिन्नेव दिवसे अन्तेवासिनः वेदाध्ययनं शास्त्राध्ययनञ्च आरभन्ते स्म। अस्मिन् दिने वेदाध्ययनस्य आरम्भात् प्राक् शिष्याणाम् उपनयनसंस्कारः भवति। एतस्मिन् दिने पुरातनं यज्ञोपवीतं

परिवर्त्यते। प्राचीनकाले पौषपौर्णिमायाः श्रावणपौर्णिमापर्यन्तं पुनश्च श्रावणपौर्णिमायाः पौषपौर्णिमापर्यन्तम् अध्ययनं भवति स्म।

**प्रदीपः** - अस्मिन्नेव दिवसे संस्कृतदिवसः परिपालयितव्यः इत्यस्मिन् विषये सर्वकारपक्षतः कोऽपि निर्देशोऽस्ति वा ?

**ऋतम्भरा** - आम् ! अवश्यम् अस्ति। १९६९ (नवषष्ठ्याधिकनवशतम्) तमे वर्षे भारतसर्वकारस्य शिक्षामन्त्रालयेन केन्द्रराज्यस्तरयोः संस्कृतदिवसस्य आचरणाय निर्दिष्टम् अस्ति, ततः आभारतं श्रावणपौर्णिमायां संस्कृतदिवसः आचर्यते।

**जया** - अस्मिन् दिने किं किम् अनुष्ठीयते ?

**विवेकः** - अस्मिन् दिने प्रातः बालाः सम्भूय उद्घोषं विकुर्वाणाः वीथीषु परिभ्रमन्ति, संस्कृत-वाक्यैः अभिवादयमानाः परस्परम् आलपन्ति च। गुरुकुलेषु पाठशालासु विश्वविद्यालयेषु च श्लोकपाठस्पर्धा, अन्त्याक्षरी, नाटकस्पर्धा, वेदपाठस्पर्धा, रसप्रश्नाः, कथाकथनम्, श्रुतिलेखः, गीतस्पर्धा, इत्यादयः स्पर्धाः प्रचाल्यन्ते। अन्ते संस्कृतविदुषां सम्मान-कार्यक्रमाः भवन्ति। अमी कार्यक्रमाः सप्ताहं यावत् प्रचलन्ति।

**दिनेशः** - संस्कृतसप्ताहानुष्ठानस्य किं वा उद्देश्यम् ? को लाभोऽनेनानुष्ठानेन ?

**ऋतम्भरा** - आश्चर्यमिदम्। मित्र! श्रूयतां तर्हि - संस्कृतम् अस्माकं भारतीयानां गौरवम् अभिज्ञानं चास्ति। संस्कृतं विना अस्माकं भारतीयानां किं वा अस्तित्वम्? भाषैषा अस्माकं पूर्वजानाम्। सुसम्बद्धा संस्कृतभाषा वसुधैव कुटुम्बकम्, सर्वे भवन्तु सुखिनः, धर्मं चर, सत्यं वद, यतो धर्मः ततो जयः, सत्यमेव जयते इत्यादीः बह्वीः नीतीः अस्मान् उपदिशति। संस्कृतेतरासु भाषासु ईदृशानि नीतिवाक्यानि नैवोपलभ्यन्ते। अस्मादेव कारणात् संस्कृतभाषा रक्षणीया ज्ञेया च।

**मालिनी** - अयं संस्कृतदिवसः केवलं भारते एव परिपाल्यते वा ?

**राजेशः** - नैव। सम्प्रति विदेशेषु अपि संस्कृतदिवसो महता हर्षेण अनुष्ठीयते। अयं विश्वसंस्कृतदिवसः भारतसर्वकारेण यूनेस्कोसंस्थया (UNESCO) च सम्भूय आयोज्यते।

**जया** - धन्यवादः मित्राणि ! अद्य भवन्तः संस्कृतभाषाविषये अस्माकं भ्रान्तीः उपेक्षाश्च दुरीकुर्वन्। अस्तु अद्यारभ्य वयमपि संस्कृतभाषायाः प्रचारं प्रसारञ्च करिष्यामः। संस्कृतसमुपासकानां कृते रक्षाबन्धनस्य, संस्कृतदिवसस्य, संस्कृतसप्ताहस्य च हार्दिक्यः शुभकामनाः सन्तु।

**ऋतम्भरा** - अस्तु समीचीनम्। तर्हि वयं सर्वेऽपि अद्य संस्कृतदिवसे भागग्रहणं कुर्मः। जयतु संस्कृतम्, जयतु भारतम्।

**सर्वे मिलित्वा** - अवश्यम्। जयतु संस्कृतम्, जयतु भारतम्। संस्कृतभाषा अस्माकं भाषा।

## शब्दार्थाः

| | |
|---|---|
| कल्ये | प्रातः |
| अन्तेवासिनाम् | शिष्याणाम् |
| बध्नन्ति | बन्धनं कुर्वन्ति |
| अन्योऽन्यम् | परस्परम् |
| अनुष्ठीयते | आचर्यते |
| विकुर्वाणाः | उच्चारयन्तः |
| वीथीषु | मार्गेषु |
| अभिज्ञानम् | ज्ञानम् |
| अपाकरोः | दूरीकृतवान् |
| निबद्धानि | निहितानि |
| सुहृद् | मित्रम्, सखा |

| | |
|---|---|
| आलपन्ति | कथयन्ति |
| स्पर्धा | प्रतियोगिता |
| अपाकरोः | दूरीकृतवान् |

## अभ्यास

**१. अधोलिखितां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत -**

(क) संस्कृतदिवसः कदा आचर्यते?

(ख) संस्कृतदिवसस्य रक्षाबन्धनदिनोत्सवेन कोऽपि सम्बन्धः अस्ति वा?

(ग) संस्कृतभाषा अस्मान् काः नीतीः उपदिशति?

(घ) अस्मिन् दिने किं किम् अनुष्ठीयते?

(ङ) संस्कृतसप्ताहकार्यक्रमः कुत्र प्रचलति?

(च) रक्षाबन्धनं कदा आचर्यते?

**२. रिक्तस्थानं पूरयत -**

(क) श्रावणपूर्णिमायां .............. अनुष्ठीयते।

(ख) उपाध्यायाः अन्तेवासिनां हस्ते ............... बध्नन्ति।

(ग) वेदे उपदेशवाक्यानि ..................... निबद्धानि।

(घ) ..................... अस्माकं भारतीयानां किं वा अस्तित्वम्?

(ङ) प्राक्काले ................. गुरुकुलेषु ............... भवति स्म।

**३. कोष्ठके प्रदत्तानां पदानां लिङ्गविभक्तिवचनानि लिखत -**

| | पदानां | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|
| (क) | अन्तेवासिनः | ................. | ................. | ................. |
| (ख) | उपाध्यायाः | ................. | ................. | ................. |
| (ग) | निबद्धानि | ................. | ................. | ................. |
| (घ) | गीतस्पर्धा | ................. | ................. | ................. |
| (ङ) | भारतीयानाम् | ................. | ................. | ................. |
| (च) | संरक्षणाय | ................. | ................. | ................. |

## ४. सुसङ्गतपदानि मेलयत -

| | | |
|---|---|---|
| (क) | दीपावली | भाद्रपदशुक्लचतुर्थी |
| (ख) | रक्षाबन्धनम् | कार्तिकामावस्या |
| (ग) | गीताजयन्ती | भाद्रपदकृष्णाष्टमी |
| (घ) | श्रीकृष्णजन्माष्टमी | मार्गशीर्षशुक्लैकादशी |
| (ङ) | श्रीगणेशचतुर्थी | श्रावणपूर्णिमा |

## ५. मञ्जूषातः समुचितपदानि चित्वा रिक्तस्थानानि पूरयत -

| शोभायात्रा, जयतु संस्कृतम्, पूर्णिमा, संस्कृतवाक्यैः, संस्कृतविदुषाम्, उपाध्यायाः |
|---|

(क) श्रावणमासस्य ................ तिथौ संस्कृतदिनोत्सवः अनुष्ठीयते।

(ख) अहं प्रातः ................ इति उद्घोषवाक्यम् अश्रृणवम्।

(ग) ................ अन्तेवासिनां हस्तेषु रक्षासूत्राणि बध्नन्ति स्म।

(घ) संस्कृतदिवसे ................ जनाः अभिवादयमानाः आलपन्ति।

(ङ) अन्ते ................ सम्मान-कार्यक्रमाः भवन्ति।

## ६. सन्धिं विभज्य सन्धिनाम लिखत -

| | | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|---|
| (क) | अन्योऽन्यः | ................ + ................ | ................ |
| (ख) | भाषैषा | ................ + ................ | ................ |
| (ग) | अस्मिन्नेव | ................ + ................ | ................ |
| (घ) | संस्कृतोत्सवः | ................ + ................ | ................ |
| (ङ) | अस्मादिनात् | ................ + ................ | ................ |
| (च) | कोऽपि | ................ + ................ | ................ |

## ७. अधोलिखितानि वाक्यानि बहुवचने परिवर्तयत -

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **यथा -** | **गुरुः रक्षासूत्रं बध्नाति।** | **गुरवः रक्षासूत्राणि बध्नन्ति।** |
| (क) | बालः विकुर्वाणः परिभ्रमति। | ................................ |

(ख) हार्दिकी शुभकामना अस्तु। ..................................

(ग) अथ किं न जानासि त्वम्। ..................................

(घ) संस्कृतदिवसः आचर्यते। ..................................

(ङ) गुरुकुलात् अन्तेवासी याति। ..................................

## ९. मञ्जूषातः अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत -

| |
|---|
| अद्य, अथ, सुष्ठु, अस्तु, एव, तदा, स्म, आरभ्य |

(क) श्रावणपूर्णिमायां गुरुकुलेषु वेदाध्ययनं भवति ...................।

(ख) ................... उक्तं त्वया।

(ग) ................... किं जानासि त्वम् ?

(घ) ................ ................ अस्मिन् ................ दिने रक्षाबन्धनोत्सवः अनुष्ठीयते।

(ङ) ................... त्वं संस्कृतभाषाविषये मम भ्रान्तीः उपेक्षाश्च दूर्यकरोः।

(च) ................... अद्यारभ्य अहमपि संस्कृतभाषायाः प्रचारं प्रसारञ्च करिष्यामि।

## १०. लकार-पुरुष-वचनानि लिखत -

| | | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| (क) | जयतु | ................ | ................ | ................ |
| (ख) | अनुष्ठीयते | ................ | ................ | ................ |
| (ग) | कुर्वन्ति | ................ | ................ | ................ |
| (घ) | प्रारभन्ते | ................ | ................ | ................ |
| (ङ) | परिभ्रमन्ति | ................ | ................ | ................ |
| (च) | दुर्यकरोः | ................ | ................ | ................ |
| (छ) | अस्तु | ................ | ................ | ................ |
| (ज) | सन्तु | ................ | ................ | ................ |
| (झ) | उपदिशति | ................ | ................ | ................ |
| (ञ) | जयति | ................ | ................ | ................ |
| (ट) | श्रूयताम् | ................ | ................ | ................ |
| (ढ) | वद | ................ | ................ | ................ |

## योग्यता-विस्तारः

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥
काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा॥
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये।
पयःपानं भुजङ्गानां केवलं विषवर्धनम्॥
विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततस्सुखम्॥

# षष्ठः पाठः

## कृदन्तपरिचयः

कृत् अन्ते वर्तते यस्य सः कृदन्तः। धातोः न केवलं तिङ्-प्रत्ययाः विधीयन्ते, धातोः तिङ्भिन्नाः प्रत्ययाः अपि विधीयन्ते। ते प्रत्ययाः कृत्-प्रत्ययाः कथ्यन्ते। धातोः तिङ्प्रत्ययविधाने तात्कालिकी क्रिया गम्यते यथा - पठति। किन्तु कृत्-प्रत्ययविधाने तात्कालिकक्रियावान् गम्यते यथा - पठन्। 'कृत्तद्धितसमासाश्च' इति विशेषसूत्रेण अस्य प्रातिपदिकसंज्ञा विधीयते। कृदन्तपदानि नामपदानि विशेषणानि अव्ययानि वा भवन्ति।

कृत्-प्रत्ययाः कर्त्रर्थे विधीयन्ते चेत् कर्तरि कृदन्ताः, कर्मार्थे विधीयमानेषु कर्मणिकृदन्ताः भावार्थे च भावेकृदन्ताः इति कथ्यन्ते।

१. वर्तमानकृदन्तः

२. भूतकृदन्तः

३. भविष्यत्कृदन्तः

४. विध्यर्थककृदन्तः

५. कृदन्ताव्ययानि

**शतृ (अत्) प्रत्ययः**

'शतृ' प्रत्ययः परस्मैपदिधातुभ्यः कर्त्रर्थे विधीयते।

यः धातुवाच्यक्रियावान् सः शत्रन्तपदस्यार्थः।

यथा - पठन् - पठनरूपक्रियावान्।

| | | | |
|---|---|---|---|
| **उदाहरणम् -** | पुँल्लिङ्गः | - | पठन् बालः उत्तीर्णो भवति। |
| | स्त्रीलिङ्गः | - | खादन्ती बालिका विद्यालयं गच्छति। |
| | नपुंसकलिङ्गः | - | गच्छद्वाहनं कम्पते। |

**शतृप्रत्ययान्तरूपाणि**

| **धातुः** | **पुंल्लिङ्गः** | **स्त्रीलिङ्गः** | **नपुंसकलिङ्गः** |
|---|---|---|---|
| कथ् + शतृ | कथयन् | कथयन्ती | कथयत् |
| गै + शतृ | गायन् | गायन्ती | गायत् |

| | | | |
|---|---|---|---|
| दृश् (पश्य) + शतृ | पश्यन् | पश्यन्ती | पश्यत् |
| दा + शतृ | ददत् | ददती | ददत् |
| नृत् + शतृ | नृत्यन् | नृत्यन्ती | नृत्यत् |
| क्री + शतृ | क्रीणन् | क्रीणती | क्रीणत् |
| पठ् + शतृ | पठन् | पठन्ती | पठत् |
| लिख + शतृ | लिखन् | लिखन्ती/लिखती | लिखत् |
| पा + शतृ | पिबन् | पिबन्ती | पिबत् |
| रुद् + शतृ | रुदन् | रुदती | रुदत् |
| वद् + शतृ | वदन् | वदन्ती | वदत् |
| कृ + शतृ | कुर्वन् | कुर्वती | कुर्वत् |

**'शतृप्रत्ययान्तवाक्यानि'**

१. बालकः चित्रं पश्यन् खादति।

२. त्वं क्रीडन्तीं छात्रां पश्य।

३. अत्र भ्रमत् चक्रं वर्तते।

४. अहं पठन्तं छात्रं पश्यामि।

५. बालिका गच्छन्ती अस्ति।

**शानच् (आन) प्रत्ययः**

वर्तमानार्थे आत्मनेपदिधातुभ्यः 'शानच्' प्रत्ययः प्रयुज्यते ।

अयमपि त्रिषु लिङ्गेषु विधीयते । अस्य प्रत्ययस्य अन्ते आन/मान इति अवशिष्यते।

शानजन्तशब्दोऽपि लिङ्गत्रये क्रमशः रूपाणि भजते।

**उदाहरणम् -** पुंलिङ्गः - वन्दमानः छात्रः यशस्वी भवति।

स्त्रीलिङ्गः - आसीना छात्रा पाठं पठति।

नपुंसकलिङ्गः - शोभमानं गृहम् अग्निः दहति।

| **धातुः + प्रत्ययः** | **पुंलिङ्गः** | **स्त्रीलिङ्गः** | **नपुंसकलिङ्गः** |
|---|---|---|---|
| वृ + शानच् | वर्धमानः | वर्धमाना | वर्धमानम् |
| वन्द् + शानच् | वन्दमानः | वन्दमाना | वन्दमानम् |

| | | | |
|---|---|---|---|
| शुभ् + शानच् | शोभमानः | शोभमाना | शोभमानम् |
| एध् + शानच् | एधमानः | एधमाना | एधमानम् |
| विद् + शानच् | विद्यमानः | विद्यमाना | विद्यमानम् |
| नी + शानच् | नयमानः | नयमाना | नयमानम् |
| दण्ड् + शानच् | दण्डयमानः | दण्डयमाना | दण्डयमानम् |
| अधि-ई + शानच् | अधीयानः | अधीयाना | अधीयानम् |
| शी + शानच् | शयानः | शयाना | शयानम् |
| कृ + शानच् | कुर्वाणः | कुर्वाणा | कुर्वाणम् |
| आङ्-दा + शानच् | आददानः | आददाना | आददानम् |
| ग्रह् + शानच् | गृह्णानः | गृह्णाना | गृह्णानम् |

**शानच्-प्रत्ययान्त-वाक्यानि**

१. उपहारं लभमाना बालिका मोदते।

२. मोदमानः छात्रः आगच्छति।

३. सा याचमाना अस्ति।

४. सः पचमानः अस्ति।

५. कुमारी कार्यं कुर्वाणा आसीत्।

६. शिष्यः अधीयानः अस्ति।

७. आसीना छात्रा पाठं पठति।

८. बालकः वर्धमानः अस्ति।

९. शिशुः शयानः वर्तते।

**तव्यत्-तव्य-अनीयर्-प्रत्ययाः**

सकर्मकधातोः कर्मार्थे अकर्मकधातोः भावार्थे च तव्यादयः प्रत्ययाः प्रयुज्यन्ते। एतदन्तानि पदानि अपि प्रातिपदिकानि एव भवन्ति। ततः सुप्-प्रत्ययाः विधीयन्ते। अतः लिङ्गत्रये रूपाणि भवन्ति।

**यथा -** पुंलिङ्गम् - बालेन वेदः पठनीयः।

गन्तव्यः मार्गः परिशीलयितव्यः।

स्त्रीलिङ्गम् - अस्माभिः भगवद्गीता अध्ययनीया।

अध्येतृभिः प्रणन्तव्या सरस्वती माता ।

नपुंसकलिङ्गम् - छात्रेण संस्कृतं वदनीयम्।

प्रारब्धं कार्यं न त्यक्तव्यम् ।

| धातुः + प्रत्ययः | पुँल्लिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|
| पठ् + तव्य | पठितव्यः | पठितव्या | पठितव्यम् |
| पठ + अनीय | पठनीयः | पठनीया | पठनीयम् |

**एवमेव**

| | | | |
|---|---|---|---|
| गम् | गन्तव्यः | गन्तव्या | गन्तव्यम् |
| | गमनीयः | गमनीया | गमनीयम् |
| भू | भवितव्यः | भवितव्या | भवितव्यम् |
| | भवनीयः | भवनीया | भवनीयम् |
| दृश् | द्रष्टव्यः | द्रष्टव्या | द्रष्टव्यम् |
| | दर्शनीयः | दर्शनीया | दर्शनीयम् |
| वच् | वक्तव्यः | वक्तव्या | वक्तव्यम् |
| | वचनीयः | वचनीया | वचनीयम् |

| **कर्मणिप्रयोगः** | **भावेप्रयोगः** |
|---|---|
| मया चिन्तनीयम्। | शिशुना हसनीयम्। |
| बालकेन पठितव्यम्। | धावकेन धावनीयम्। |
| मनोहरेण गन्तव्यम्। | सिंहेन गर्जनीयम्। |
| रामेण गन्तव्यम्। | मया स्थातव्यम्। |
| माधुर्या रोटिका खादितव्या। | विद्यार्थिभिः उपवेष्टव्यम्। |
| गुरुणा उपनिषद् अध्येतव्या। | सर्वैः जागरूकैः भवितव्यम्। |
| शिष्येण वेदमाता नमनीया। | अस्माभिः न पतितव्यम्। |
| रमया वक्तव्यम्। | भवता न भेत्तव्यम्। |

**तव्यत्-प्रत्ययान्तम् अनीयर्-प्रत्ययान्तं च विशेषणं भवति । अतः तत् विशेषण- विशेष्ययोः सामान्यं नियमम् अनुसृत्य लिङ्गं विभक्तिं वचनं च अनुसरति।**

**लिङ्गं यथा**

| | |
|---|---|
| छात्रेण | पाठः पठनीयः/पठितव्यः । (पुंलिङ्गम्) |
| | पत्रिका पठनीया/पठितव्या। (स्त्रीलिङ्गम्) |
| | पुस्तकं पठनीयम्/पठितव्यम्। (नपुंसकलिङ्गम्) |

**वचनं यथा**

| | |
|---|---|
| कविना | काव्यं लेखनीयम्/लेखितव्यम् । |
| | काव्ये लेखनीये/लेखितव्ये । |
| | काव्यानि लेखनीयानि/लेखितव्यानि । |

**विभक्तिः यथा –**

| | |
|---|---|
| त्वया | करणीयं/कर्त्तव्यं कार्यम् एतत् (प्रथमाविभक्तिः) |
| | करणीयं/कर्त्तव्यं कार्यं शीघ्रं कुरु (द्वितीयाविभक्तिः) |
| | करणीयात्/कर्त्तव्यात् कार्यात् मा पलायताम् (पञ्चमीविभक्तिः) |
| | कणीयस्य/कर्त्तव्यस्य कार्यस्य आवलिं कुरु। (षष्ठीविभक्तिः) |
| | करणीये/कर्त्तव्ये कार्ये तव श्रद्धा आवश्यकी। (सप्तमीविभक्तिः) |

**यत्-प्रत्ययः**

**अचो यत्** *(३.१.९७)* - अजन्ताद् धातोः यत् प्रत्ययः भवति।

**पोरदुपधात्** *(३.१.९८)* - पवर्गान्तात् अदुपधात् धातोः यत् प्रत्ययः भवति । यत् प्रत्ययः कर्मवाच्ये भाववाच्ये च भवति। **यथा** -

| | |
|---|---|
| छात्रेण जलं पेयम् । | नपुंसकलिङ्गम् |
| मया दानं देयम् । | |
| रमया गीतं गेयम् । | |
| त्वया विद्या अध्येया । | स्त्रीलिङ्गम् |
| गुरुणा शिक्षा देया । | |

| | |
|---|---|
| मया वेदः अध्येयः। | पुंलिङ्गम् |
| अस्माभिः शत्रुः जेयः। | |

## त्रिषु लिङ्गेषु यत्-प्रत्ययान्तरूपाणि -

| धातुः + प्रत्ययः | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|
| दा + यत् | देयः | देया | देयम् |
| जि + यत् | जेयः | जेया | जेयम् |
| क्री + यत् | क्रेयः | क्रेया | क्रेयम् |
| श्रृ + यत् | श्रव्यः | श्रव्या | श्रव्यम् |
| धा + यत् | धेयः | धेया | धेयम् |
| नी + यत् | नेयः | नेया | नेयम् |

**क्तक्तवतू निष्ठा** *(१.१.२६)* - क्त-क्तवतू प्रत्ययौ निष्ठासंज्ञौ भवतः।

**क्त-प्रत्ययः** - क्तप्रत्यायान्तः शब्दः क्तान्तः भवति। क्तप्रत्ययः भूतकाले कर्मार्थे भावार्थे च धातोः विधीयते। अतः सुबन्त इव रूपाणि भवन्ति। अस्य प्रत्ययस्य रूपाणि त्रिषु लिङ्गेषु अधः प्रदत्तानि। यथा -

| धातुः | + | प्रत्ययः | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|---|---|
| भू | + | क्त | भूतः | भूता | भूतम् |
| कृ | + | क्त | कृतः | कृता | कृतम् |
| अर्च् | + | क्त | अर्चितः | अर्चिता | अर्चितम् |
| दा | + | क्त | दत्तः | दत्ता | दत्तम् |
| लभ् | + | क्त | लब्धः | लब्धा | लब्धम् |
| दृश् | + | क्त | दृष्टः | दृष्टा | दृष्टम् |
| श्रृ | + | क्त | श्रुतः | श्रुता | श्रुतम् |

**उदाहरणानि** -

| | | |
|---|---|---|
| १. | छात्रेण गुरुः सेवितः । | पुँल्लिङ्गम् |
| २. | तेन ग्रामः गतः | |

| | | |
|---|---|---|
| ३. | त्वया परीक्षा उत्तीर्णा । | स्त्रीलिङ्गम् |
| ४. | बालकेन वार्ता श्रुता । | |
| ५. | मया कार्यं कृतम् । | नपुंसकलिङ्गम् |
| ६. | तेन पुस्तकं पठितम् । | |
| ७. | अस्माभिः भोजनं भुक्तम् । | |

## क्तवतु-प्रत्ययः (तवत्)

क्तवतु-प्रत्ययान्तः शब्दः क्तवत्वन्तः। अयं प्रत्ययः धातोः जायते। एषः प्रत्ययः सर्वेभ्यः धातुभ्यः कर्त्रर्थे भूतकाले विधीयते। अस्य प्रत्ययस्य त्रिषु लिङ्गेषु रूपाणि इत्थं भवन्ति। यथा -

| धातुः | + | प्रत्ययः | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|---|---|
| भू | + | क्तवतु | भूतवान् | भूतवती | भूतवत् |
| गम् | + | क्तवतु | गतवान् | गतवती | गतवत् |
| वच् | + | क्तवतु | उक्तवान् | उक्तवती | उक्तवत् |
| श्रु | + | क्तवतु | श्रुतवान् | श्रुतवती | श्रुतवत् |
| लभ | + | क्तवतु | लब्धवान् | लब्धवती | लब्धवत् |

**उदाहरणानि -**

| | | |
|---|---|---|
| १. | छात्रः पुस्तकं पठितवान्। | पुँल्लिङ्गम् |
| २. | राजा गृहं गतवान्। | |
| ३. | बालिका संस्कृतेन उक्तवती। | स्त्रीलिङ्गम् |
| ४. | रमा भोजनं कृतवती। | |
| ५. | पत्रं भूमौ पतितवत्। | नपुंसकलिङ्गम् |
| ६. | यानं गतवत्। | |

## शब्दार्थाः

| | |
|---|---|
| विधीयमानेषु | क्रियमाणेषु |
| अवशिष्यते | अवशेषः भवति |
| सकर्मकः | कर्मणा सह वर्तते |

| | |
|---|---|
| अकर्मकः | कर्मरहितः |
| अध्ययनीया | अध्ययनं कर्तव्यम् |
| प्रारब्धम् | आरम्भः कृतः |
| पलायताम् | पलायनं करोतु |
| अध्येया | पठितव्या |
| भुक्तम् | खादितम् |
| आददानः | स्वीकुर्वन् |

## अभ्यासः

१. **उच्चारणं कुरुत -**

पोरदुपधात्, आददानः, त्रिषु लिङ्गेषु, निष्ठासंज्ञौ, क्तक्तवतू निष्ठा, शतृ-प्रत्ययान्तवाक्यानि, शानजन्तशब्दोऽपि, अवशिष्यते।

२. **उदाहरणं दृष्ट्वा तादृशानि वाक्यानि लिखत -**

बालकः लिखति। बालकः **लिखन्** अस्ति।

(क) शिशुः हसति। ____________

(ख) गुरुः उपदिशति। ____________

(ग) वृद्धः गच्छति। ____________

(घ) तरुणः पश्यति। ____________

(ङ) छात्रः शृणोति। ____________

३. **शत्रन्तपदं प्रयुज्य वाक्यानि रचयत -**

**छात्रः जलं पिबति। छात्रः गच्छति।** **छात्रः जलं पिबन् गच्छति।**

(क) बालकः कथां शृणोति, हसति। ____________________

(ख) सेवकः पुष्पम् आनयति, नमस्करोति। ____________________

(ग) स्वामी धनं स्वीकरोति, कथयति। ____________________

(घ) पुत्रः वस्त्रं क्षालयति, कथयति। ____________________

(ङ) नटाः अभिनयन्ति, जनान् तोषयन्ति। ____________________

## ४. अधोनिर्दिष्टानां कर्मणि रूपाणां क्रियापदानां शानजन्तरूपाणि लिखत -

**उदाहरणम् - गम्यते - (गम्यमानः)**

(क) श्रूयते ( )

(ख) वन्दते ( )

(ग) क्रियते ( )

(घ) लिख्यते ( )

(ङ) खाद्यते ( )

## ५. कोष्ठके दत्तानां क्रियापदानां शानजन्तरूपैः रिक्तस्थानानि पूरयत -

__________ सः ऐश्वर्यं प्राप्तवान्। (वर्धते)

**वर्धमानः** सः एश्वर्यं प्राप्तवान्।

(क) __________सः वरं प्राप्तवान्। (वन्दते)

(ख) __________ सा धनं स्मृतवती। (क्रीणीते)

(ग) __________नक्षत्रं भूमौ पतितम्। (प्रकाशते)

(घ) __________अध्यापकः सन्तोषं प्राप्तवान्। (परीक्षते)

(ङ) __________बालिका स्वप्नं दृष्टवती। (शेते)

(च) __________ चोरः आरक्षकैः गृहीतः। (पलायते)

(छ) दुःखानि __________सा कष्टेन जीवति। (सहते)

(ज) __________बालकाः क्रीडितुं गतवन्त। (मोदन्ते)

## ६. अधोलिखितवाक्यानि परिवर्त्य लिखत -

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **उदाहरणम् -** | **छात्रेण पुस्तकं पठनीयम्।** | **छात्रेण पुस्तकानि पठनीयानि।** |
| (क) | मया सत्यवचनं वक्तव्यम्। | __________। |
| (ख) | भवत्या शिशुः पालनीयः। | __________। |
| (ग) | __________। | शिक्षकेण वेदाः पठनीयाः। |
| (घ) | __________। | भवत्या प्रश्नाः प्रष्टव्याः। |
| (ङ) | अस्माभिः वृक्षः रोपणीयः। | __________। |

(च) मया उत्तमलेखः लेखनीयः। ______________।

(छ) ______________। मया उत्तमविचाराः करणीयाः।

(ज) गौर्या पुष्पं चेतव्यम्। ______________।

७. **अधोलिखितेषु वाक्येषु रेखाङ्किताः शब्दाः अशुद्धाः सन्ति। तेषां शुद्धं रूपम् उपयुज्य वाक्यानि लिखत -**

**यथा - मया प्रतिदिनं विद्यालयः गन्तव्या।**

**मया प्रतिदिनं विद्यालयः गन्तव्यः।**

(क) मया बहवः ग्रन्थाः अध्येतव्यम् ।

(ख) मनुष्येण परोपकारः करणीया ।

(ग) मया श्लोकः वक्तव्यम्, पाठः पठनीया, अभ्यासः लेखनीये ।

(घ) अहं शास्त्रे प्रवीणता प्राप्तव्यम् ।

(ङ) वयं निरन्तरं संस्कृतेन् सम्भाषणं करणीयः ।

८. **उचितानि पदानि संयोज्य वाक्यानि रचयत -**

| | | |
|---|---|---|
| भवता = भवत्या | गुरुः | द्रष्टव्यम् |
| | पाठाः | प्राप्तव्यः |
| | माता | कर्त्तव्यः |
| | पुस्तकम् | अर्जनीयम् |
| | चौराः | वन्दनीया |
| | शाटिका | दण्डनीयाः |
| | ज्ञानम् | पठनीयाः |
| | भाषणं | प्रक्षालनीया |
| | पुत्राः | करणीयम् |
| | परिश्रमः | पालनीयाः |
| | चित्रम् | नमस्करणीयः |
| | जयः | क्रेतव्यम् |

**यथा - भवता माता वन्दनीया।**

(क) ________________। (ख) ________________।

(ग) ________________। (घ) ________________।

(ङ) ________________। (च) ________________।

(छ) ________________। (ज) ________________।

(झ) ________________। (ञ) ________________।

(ट) ________________। (ठ) ________________।

### ९. उदाहरणानुसारं क्तवतुप्रत्ययान्तेन वाक्यानि पूरयत -

**सः उपवनं गच्छति।** **सः उपवनं गतवान्।**

(क) उपवने ते एकं वानरं पश्यन्ति। उपवने ते एकं वानरं ________।

(ख) वानरः शीघ्रं जलं पिबति । वानरः शीघ्रं जलं ________।

(ग) सा मधुरं गायति । सा मधुरं ________।

(घ) सा श्लोकं लिखति । सा श्लोकं________।

### १०. रिक्तस्थानानि क्तप्रत्यान्तरूपैः पूरयत -

**यथा - त्वया विद्यालयः कदा गतः ।**

(क) अस्माभिः संस्कृतकथा ________। (श्रु)

(ख) चिकित्सकेन उत्तमौषधं ________ । (दा)

(ग) आवाभ्यां संस्कृतेन एव पत्रं ________ । (लिख्)

(घ) तैः गीतानि ________ । (गी)

### ११. क्तप्रत्ययं योजयित्वा लिखत -

| | | | पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|---|---|
| **यथा –** | गम् + क्त | = | गतः | गता | गतम् |
| (क) | वन्द् + क्त | = | _____ | _____ | _____ |
| (ख) | वच् + क्त | = | _____ | _____ | _____ |
| (ग) | वद् + क्त | = | _____ | _____ | _____ |
| (घ) | स्मृ + क्त | = | _____ | _____ | _____ |
| (ङ) | लभ् + क्त | = | _____ | _____ | _____ |

## १२. उदाहरणं दृष्ट्वा तादृशानि वाक्यानि लिखत -

**यथा – त्वया दानं देयम्।**

(क) तेन विद्या __________। (अधि + इ)

(ख) मया पुस्तकं __________। (दृश्)

(ग) छात्रेण पाठः __________। (पठ्)

(घ) गुरुणा शिक्षा __________। (दा)

(ङ) अस्माभिः कीर्तिः __________। (श्रु)

## १३. यत्-प्रत्ययं योजयित्वा लिखत -

| | धातुः | + | प्रत्ययः | पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|---|---|---|
| (क) | ज्ञा | + | यत् | ज्ञेयः | ज्ञेया | ज्ञेयम् |
| (ख) | चि | + | यत् | ................ | ................ | ................ |
| (ग) | पा | + | यत् | ................ | ................ | ................ |
| (घ) | जि | + | यत् | ................ | ................ | ................ |
| (ङ) | क्री | + | यत् | ................ | ................ | ................ |

## १४. कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत -

(क) अहं पत्रं लिखन् अस्मि ।

(ख) देवी विराजमाना अस्ति ।

(ग) बालकेन पाठः पठितव्यः।

(घ) कृष्णः कालिङ्गशापात् जनान् रक्षितवान्।

(ङ) भक्तः प्रणतवान् शिरसा देवं गौरीपुत्रम् ।

## १५. एकवाक्येन उत्तरत -

(क) कृदन्तं नाम किम् ?

(ख) क्त-प्रत्ययः कस्मिन् काले भवति ?

(ग) 'वन्दमानः' इत्यत्र कः प्रत्ययः अस्ति ?

(घ) अकर्मकधातोः कस्मिन्नर्थे तव्यादयः प्रत्यया भवन्ति?

(ङ) केभ्यो धातुभ्यः शानच्-प्रत्ययो भवति?

## १६. यथोचितं संयोजयत -

| | अ | आ |
|---|---|---|
| (क) | अर्चितः | शतृ-प्रत्ययः |
| (ख) | इच्छन् | क्त-प्रत्ययः |
| (ग) | बोधनीयः | यत्-प्रत्ययः |
| (घ) | जेयः | अनीयर्-प्रत्ययः |
| (ङ) | शोभमानः | क्तवतु-प्रत्ययः |
| (च) | लब्धवान् | शानच्-प्रत्ययः |
| (छ) | वक्तव्यम् | तव्यत्-प्रत्ययः |

# योग्यता-विस्तारः

**लटः शतृशानचावप्रथमासमानाधिकरणे** *(पा.सू. ३.२.१२४)* -

अप्रथमान्तेन समानाधिकरणे लटः शतृ-शानचौ प्रत्ययौ स्तः । क्वचित् प्रथमान्तेन अपि भवति ।

**तव्यत्तव्यानीयरः** *(पा.सू. ३.१.९६)* -

धातोः तव्यत्, तव्य, अनीयर् एते प्रत्ययाः भवन्ति ।

**वसेस्तव्यत् कर्तरि णिच्च** *(वा.)* -

'वसँ निवासे' धातोः कर्त्रर्थे तव्यत् प्रत्ययो भवति स च णित् भवति । यथा - रामः ग्रामस्य वास्तव्यः (निवासी) । शिष्यः नगरस्य वास्तव्यः ।

**आने मुक्** *(पा.सू. ७.२.८२)* -

अदन्तस्य अङ्गस्य मुक् इति आगमो भवति आने परे । यथा - वर्ध + आन = वर्ध + म् + आन = वर्धमान। तव्यत्, तव्य, अनीयर्, केलिमर्, यत्, ण्यत्, क्यप् एते कृत्यप्रत्ययाः उच्यन्ते। एतेऽपि धातुभ्य एव भवति।

# सप्तमः पाठः

# सुभाषितम्

**श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन।**
**विभाति कायः करुणापराणां परोपकारैर्न तु चन्दनेन॥**

**अन्वयः -** श्रोत्रं श्रुतेन एव (विभाति) कुण्डलेन न, पाणिः दानेन (विभाति) कङ्कणेन न करुणापराणां कायः परोपकारैः विभाति, न तु चन्दनेन ।

**तात्पर्यम् -** कुण्डलधारणेन कर्णस्य शोभा न भवति, कर्णस्तु शास्त्रश्रवणेन शोभते। कङ्कणेन हस्तयोः शोभा न भवति हस्तयोः शोभा तु दानेन भवति। करुणापराणां जनानां शोभा चन्दनेन न भवति, तेषां शोभा परोपकारेण भवति।

**ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो,**
**ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः।**
**अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता,**
**सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम्॥**

**अन्वयः -** ऐश्वर्यस्य सुजनता, शौर्यस्य वाक्संयमः ज्ञानस्य उपशमः, श्रुतस्य विनयः वित्तस्य पात्रे व्ययः, तपसः, अक्रोधः प्रभवितुः क्षमा धर्मस्य निर्व्याजता च विभूषणं सर्वेषाम् अपि सर्वकारणम् इदं शीलं परं भूषणम्।

**तात्पर्यम् -** ऐश्वर्यस्य आभूषणं सज्जनता अस्ति। शौर्यस्य भूषणं वाक्संयमः। ज्ञानिनः गर्वं न कुर्वन्ति। शान्तिः एव तेषाम् आभूषणम् अस्ति। ये शास्त्रं जानन्ति ते विनम्राः भवन्ति। धनिनः सत्पात्रे व्ययं कुर्वन्ति। तपस्विनः क्रोधं न कुर्वन्ति। ये बलशालिनः सन्ति तेषां विभूषणं क्षमा भवति। धर्मस्य विभूषणं निष्कपटव्यवहारः भवति। सर्वेषां भूषणानां मूलं शीलम् अस्ति। अतः शीलं भूषणेषु श्रेष्ठं परिगण्यते।

**विपदि धैर्यमथाभ्युदये क्षमा**
**सदसि वाक्पटुता युधि विक्रमः।**
**यशसि चाभिरुचिर्व्यसनं श्रुतौ**
**प्रकृतिसिद्धमिदं हि महात्मनाम्॥**

**अन्वयः -** विपदि धैर्यम् अभ्युदये क्षमा, सदसि वाक्पटुता, युधि विक्रमः, यशसि अभिरुचिः, श्रुतौ च व्यसनम्। महात्मनाम् इदं हि प्रकृतिसिद्धम्।

**तात्पर्यम् -** महात्मानः स्वभावेन एव धैर्यशीलाः, उन्नतिकाले क्षमाशीलाः च भवन्ति। सभायां वाक्चातुर्यम्, युद्धकाले पराक्रमः, यशःप्राप्तौ रुचिः, शास्त्रश्रवणे आसक्तिः च तेषां स्वभावः एव अस्ति।

**जाड्यं धियो हरति सिञ्चति वाचि सत्यं मानोन्नतिं दिशति पापमपाकरोति।**
**चेतः प्रसादयति दिक्षु तनोति कीर्तिं सत्सङ्गतिः कथय किं न करोति पुंसाम्॥**

**अन्वयः -** सत्सङ्गतिः धियः जाड्यं हरति, वाचि सत्यं सिञ्चति मानोन्नतिं दिशति, पापम् अपाकरोति, चेतः प्रसादयति, दिक्षु कीर्तिं तनोति, कथय (सत्सङ्गतिः) पुंसां किं न करोति।

**तात्पर्यम् -** सज्जनानां सङ्गतिः बुद्धेः जडत्वं दूरीकरोति, वाणीं च सत्येन पूरयति। मानम् उन्नतिं च वर्धयति। पापं समापयति। चेतः प्रसादयति। दिक्षु कीर्तिं विस्तारयति। एवं सज्जनानां सङ्गतिः मनुष्यस्य कल्याणाय सर्वं करोति।

**आचार्यात् पादमादत्ते पादं शिष्यः स्वमेधया।**
**पादं सब्रह्मचारिभ्यः पादः कालेन पच्यते॥**

**तात्पर्यम् -** विद्यायाः अंशचतुष्टये शिष्यः आचार्यात् एकांशं स्वीकरोति। एकांशं स्वस्य बुद्धिशक्त्या सम्पादयति। सहपाठिनां सहवासेन तृतीयांशम् अवगच्छति। अन्तिमभागांशं कालक्रमेण जानाति।

**अधमा धनमिच्छन्ति धनं मानं च मध्यमाः।**
**उत्तमा मानमिच्छन्ति मानो हि महतां धनम्॥**

**अन्वयः -** अधमाः धनम् इच्छन्ति, मध्यमाः धनं मानं च इच्छन्ति, उत्तमा मानम् इच्छन्ति। मानो हि महतां धनम्।

**तात्पर्यम् -** ये धनम् इच्छन्ति ते अधमाः। ये धनं मानं चोभयम् इच्छन्ति ते मध्यमाः। ये मानम् इच्छन्ति ते उत्तमाः यतः महतां मान एव धनं भवति। महाराजानां धनम् अभिमानः इति भावः।

**वित्तेन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते।**
**मृदुना रक्ष्यते भूपः सत्स्त्रिया रक्ष्यते गृहम्॥**

**अन्वयः -** धर्मो वित्तेन रक्ष्यते, विद्या योगेन रक्ष्यते, भूपः मृदुना रक्ष्यते, सत्यस्त्रिया गृहं रक्ष्यते ।

**तात्पर्यम् -** धर्मस्य रक्षणं वित्तेन जायते। योगेन विद्यायाः रक्षणं भवति। राजानां रक्षणं नम्रभावेन। सत्यस्त्रियः गृहं रक्षन्ति।

**रामो विग्रहवान् धर्मः साधुः सत्यपराक्रमः।**
**राजा सर्वस्य लोकस्य देवानामिव वासवः॥**

**अन्वयः -** रामः विग्रहवान् धर्मः, सत्यपराक्रमः साधुः, देवानां मघवान् इव सर्वस्य लोकस्य राजा।

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।**
**चत्वारि तस्य वर्धन्ते आयुर्विद्यायशोबलम्॥**

**अन्वयः -** अभिवादनशीलस्य नित्यं वृद्धोपसेविनः, तस्य चत्वारि वर्द्धन्ते आयुर्विद्यायशोबलम्।

**तात्पर्यम् -** यः अभिवादनं करोति तथा वृद्धानां नित्यं सेवां करोति सः आयुः, विद्याम्, यशः, बलं च प्राप्नोति।

**दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत्।**
**सत्यपूतां वदेत् वाचं मनःपूतं समाचरेत्॥**

**अन्वयः -** दृष्टिपूतं पादं न्यसेत् वस्त्रपूतं जलं पिबेत् सत्यपूतां वाचं वदेत् मनःपूतम् समाचरेत्।

**तात्पर्यम् -** दृष्ट्वा पादं स्थापयेत्, सर्वदा वस्त्रेण शोधयित्वा जलं पिबेत्, सत्ययुक्तां वाणीं वदेत्, पवित्रम् आचरणं कुर्यात्।

## शब्दार्थाः

| | |
|---|---|
| अभिवादनशीलस्य | अभिवादनं शिलं यस्य सः |
| वृद्धोपसेविनः | वृद्धानां सेवकस्य |
| सत्यपूताम् | सत्येन पवित्रम् |
| श्रोत्रम् | कर्णः |
| कुण्डलेन | कर्णाभरणेन |
| पाणिः | हस्तः |
| विभाति | शोभते |

| | |
|---|---|
| कायः | देहः |
| करुणापराणाम् | दयावताम् |
| चन्दनेन | चन्दनद्वारा |
| ऐश्वर्यस्य | सम्पत्तेः |
| शौर्यस्य | शूरतायाः |
| वाक्संयमः | वाचः नियन्त्रणम् |
| उपशमः | शान्तिः |
| पात्रे | योग्यजने |
| प्रभवितुः | शक्तिमतः |
| निर्व्याजता | प्रामाणिकता |
| जाड्यम् | आलस्यम् |
| सिञ्चति | सिञ्चनं करोति |
| प्रसादयति | प्रसन्नं करोति |
| दिक्षु | दिशासु |
| सत्सङ्गतिः | सज्जनानां सङ्गतिः |

## अभ्यासः

१. **उच्चारणं कुरुत -**

धैर्यमथाभ्युदये, सर्वेषामपि, शौर्यस्य, ज्ञानस्योपशमः, करुणापराणाम्, अभिवादनशीलस्य, आयुर्विद्यायशोबलम्।

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत -**

(क) अभिवादनशीलस्य कानि वर्धन्ते ?

(ख) अस्माभिः कीदृशं कर्म कर्तव्यम् ?

(ग) कीदृशं जलं पिबेत् ?

(घ) श्रोत्रस्य शोभा केन भवति ?

(ङ) शरीरं केन विभाति ?

(च) सज्जनाः वित्तस्य व्ययं कुत्र कुर्वन्ति ?

(छ) दिक्षु कीर्तिं का विस्तारयति ?

(ज) सभायां किं शोभते ?

(झ) शिष्यः कस्मात् पादमादत्ते ?

## ३. श्लोकांशान् योजयत -

| | |
|---|---|
| (क) सत्सङ्गतिः | महात्मनाम्। |
| (ख) विभाति कायः | किं न करोति पुंसाम्। |
| (ग) प्रकृतिसिद्धमिदं हि | पादः कालेन पच्यते। |
| (घ) दृष्टिपूतं न्यसेत् पादं | करुणापराणाम्। |
| (ङ) पादं सब्रह्मचारिभ्यः | वस्त्रपूतं जलं पिबेत्। |

## ४. वस्तुनिष्ठाः प्रश्नाः -

(क) कुण्डलधारणेन कस्य शोभा न भवति -

(अ) कर्णस्य (आ) नेत्रस्य

(इ) पाद (ई) मुखस्य

(ख) कर्णः केन शोभते -

(अ) शास्त्रश्रवणेन (आ) सुवचनेन

(इ) पठनेन (ई) भ्रमणेन

(ग) सज्जनानां किम् आभूषणमस्ति -

(अ) सत्यं वदनम् (आ) मिथ्या वदनम्

(इ) दुर्व्यवहारः (ई) अतिभोजनम्

(घ) हस्तयोः शोभा केन भवति -

(अ) कङ्कणेन (आ) दानेन

(इ) शास्त्रश्रवणेन (ई) भोजनेन

(ङ) धर्मस्य रक्षा केन भवति -

(अ) धनेन (आ) पापेन

(इ) साधुभिः (ई) वित्तेन

## ५. रिक्तस्थानानि पूरयत -

(क) श्रोत्रं श्रुतेनैव .................. परोपकारैः न तु चन्दनेन।

(ख) ऐश्वर्यस्य विभूषणं .................. शीलं परं भूषणम्।

(ग) विपदि धैर्यमथाभ्युदये क्षमा .................. महात्मनाम्।

(घ) जाड्यं धियो हरति सिञ्चति वाचि सत्यम् .................. न करोति पुंसाम्।

(ङ) दृष्टिपूतं .................. मनःपूतं समाचरेत्।

(च) आचार्यात् .................. कालेन पच्यते।

(छ) अधमा धनम् .................. हि महतां धनम्।

## ६. अधोलिखितपदानां विग्रहवाक्यपूर्वकं समासं लिखत।

| | | विग्रहवाक्यम् | समासनाम |
|---|---|---|---|
| (क) | सत्सङ्गतिः | ................ | ................ |
| (ख) | सब्रह्मचारी | ................ | ................ |
| (ग) | सत्यस्त्री | ................ | ................ |
| (घ) | आयुर्विद्यायशोबलम् | ................ | ................ |
| (ङ) | परोपकारः | ................ | ................ |

## ७. अधोलिखितपदानां सन्धिविच्छेदपूर्वकं सन्धिसूत्राणि लिखत -

| | | सन्धिविच्छेदः | सन्धिसूत्राणि |
|---|---|---|---|
| (क) | धियो हरति | ................ + ................ | ................ |
| (ख) | पादं शिष्यः | ................ + ................ | ................ |
| (ग) | वृद्धोपसेविनः | ................ + ................ | ................ |
| (घ) | अक्रोधस्तपसः | ................ + ................ | ................ |
| (ङ) | अथाभ्युदये | ................ + ................ | ................ |

## ८. प्रयोगपरिवर्तनं कुरुत -

(क) शास्त्रश्रवणेन कर्णस्य शोभा भवति।

(ख) ज्ञानिनः गर्वं न कुर्वन्ति।

(ग) सज्जनानां सङ्गतिः बुद्धेः जडत्वं दूरीकरोति।

(घ) शिष्यः आचार्यात् एकांशं स्वीकरोति।

(ङ) योगेन विद्यायाः रक्षणं भवति।

९. रेखाङ्कितपदानि आधृत्य कारकं विभक्तिं च लिखत -

(क) सहपाठिनां सहवासेन तृतीयांशम् अवगच्छति।

(ख) सत्यस्त्रियः गृहं रक्षन्ति।

(ग) भूपः मृदुना रक्ष्यते।

(घ) जनानां शोभा चन्दनेन न भवति।

(ङ) शास्त्रश्रवणे मम आसक्तिः।

## योग्यता-विस्तारः

विदेशेषु धनं विद्या व्यसनेषु धनं मतिः।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम्॥ १॥

यथा चित्तं तथा वाचः यथा वाचस्तथा क्रिया।
चित्ते वाचि क्रियायां च साधूनामेकरूपता॥ २॥

लभेत सिकतासु तैलमपि यत्नतः पीडयन्।
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः॥ ३॥

कदाचिदपि पर्यटञ्छशविषाणमासादयेत्।
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्॥ ४॥

निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु।
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्॥
अद्यैव वा मरणमस्तु युगान्तरे वा।
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः॥ ५॥

अनुगन्तुं सतां वर्त्म कृत्स्नं यदि न शक्यते।
अल्पमत्यनुगन्तव्यं मार्गस्थो नावसीदति॥ ७॥

# अष्टमः पाठः

# चतुर्दशविद्यास्थानानि

**अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।**
**पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश॥**

*वायुपुराणम् ६२/७८*

शिक्षा, व्याकरणम्, छन्दः, निरुक्तम्, ज्योतिषम्, कल्पः चेति षड् वेदाङ्गानि, ऋक्, साम, यजुः, आथर्वण इति चत्वारो वेदाः। वेदार्थज्ञानाय प्रवृत्तं मीमांसाशास्त्रम्, न्यायविस्तरशब्देन ज्ञायमाना न्यायविद्या(आन्वीक्षिकी), दण्डनीतिः, वार्त्ता च अष्टादश-पुराणानि, धर्मशास्त्रञ्च चतुर्दशविद्यासु अन्तर्भवन्ति।

द्वापरयुगे उज्जयिन्यां महर्षिसान्दीपनिः श्रीकृष्णं बलरामं सुदामाञ्च चतुष्षष्टौ दिनेषु एव चतुष्षष्टिं कलात्मिकाः विद्याः अध्यापयामास।

इह हि वाङ्मयमुभयथा शास्त्रं काव्यञ्च। शास्त्रं द्विधा अपौरुषेयं पौरुषेयं च। अपौरुषेयं श्रुतिः। श्रुतिः पुनः द्विविधा मन्त्राः ब्राह्मणं च। विवृत्तक्रियातन्त्रा मन्त्राः। मन्त्राणां स्तुतिनिन्दा-व्याख्यानविनियोगग्रन्थो ब्राह्मणम्। ऋग्यजुः सामवेदास्त्रयी आथर्वणश्च तुरीयः।




तत्रार्थव्यवस्थितपादाः ऋचः। ताः सगीतयः सामानि । अच्छन्दांस्यगीतानि यजूंषि। ऋचो यजूंसि सामानि चाथर्वणं त इमे चत्वारो वेदाः। आयुर्वेदः, धनुर्वेदः, गन्धर्ववेदः, स्थापत्यवेदश्च उपवेदाः। "वेदोपवेदात्मा सार्ववर्णिकः पञ्चमो गेयवेदः" इति द्रौहिणिः। शिक्षा, कल्पो,

व्याकरणम्, निरुक्तम्, छन्दोविचितिः, ज्योतिषञ्च षडङ्गानि इत्याचार्याः। उपकारकत्वादलङ्कारः सप्तममङ्गम् इति यायावरीयः। ऋते च तत्स्वरूपपरिज्ञानाद्वेदार्थानवगतिः। यथा -

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**

**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्यो अभिचाकशिति॥**

तत्र वर्णानां स्थान-करण-प्रयत्नादिभिः निष्पत्तिनिर्णयिनी शिक्षा। नानाशाखाधीनानां मन्त्राणां विनियोजकं सूत्रं कल्पः। सा च यजुर्विद्या। शब्दानामन्वाख्यानं व्याकरणम्। निर्वचनं निरुक्तम्। छन्दसां प्रतिपादयित्री छन्दोविचितिः। ग्रहगणितं ज्योतिषम्। पौरुषेयं तु पुराणम्, न्यायविद्या, मीमांसा, स्मृतितन्त्रम् इति चत्वारि शास्त्राणि। तत्र वेदाख्यानोपनिबन्धनप्रायं पुराणमष्टादशधा। यदाहुः -

**सर्गः प्रतिसंहारः कल्पो मन्वन्तराणि वंशविधिः।**

**जगतो यत्र निबद्धं तद्विज्ञेयं पुराणमिति॥**

पुराणप्रभेद एवेतिहासः इत्येके। स च द्विधा परिक्रियापुराकल्पाभ्याम्। यदाहुः -

**परिक्रिया पुराकल्प इतिहासगतिर्द्विधा।**

**स्यादेकनायका पूर्वा द्वितीया बहुनायका॥**

तत्र रामायणं महाभारतं चोदाहरणे। निगमवाक्यानां न्यायैः सहस्रणविवेक्त्री मीमांसा। सा च द्विविधा विधिविवेचनी ब्रह्मनिदर्शनी च। अष्टादशैव श्रुत्यर्थस्मरणात्स्मृतो यः। तानि इमानि चतुर्दशविद्यास्थानानि, यदुत वेदाश्चत्वारः षडङ्गानि चत्वारि शास्त्राणि इत्याचार्याः।

**चतुर्दशविद्यास्थानानि**

- वेदाः
  - १. ऋग्वेदः
  - २. यजुर्वेदः
  - ३. सामवेदः
  - ४. अथर्ववेदः
- वेदाङ्गानि
  - ५. शिक्षा
  - ६. कल्पः
  - ७. व्याकरणम्
  - ८. निरुक्तम्
  - ९. छन्दः
  - १०. ज्योतिषम्
- शास्त्राणि
  - ११. स्मृतितन्त्रम्
  - १२. पुराणम्
  - १३. मीमांसा
  - १४.आन्वीक्षिकी(न्यायविद्या)

## शब्दार्थाः

| | |
|---|---|
| वाङ्मयम् | वाग्जालम् |
| उभयथा | द्विविधः |
| अपौरुषेयम् | पुरुषेण न निर्मितम् |
| पौरुषेयम् | पुरुषेण निर्मितम् |
| विवृतम् | सम्यक् निरूपितम् |
| क्रियातन्त्राः | कर्मकाण्डकलापाः |
| सार्ववर्णिकः | सर्वेषां वर्णानां कृते उपयुक्तः |
| सुपर्णा (वैदिक प्रयोग) | खगौ |
| सयुजा (वैदिक प्रयोग) | सहचरौ |
| परिषस्वजाते | आलिङ्गनम् अकुरुताम् |
| पिप्पलम् | फलम् |
| अभिचाकशीति | प्रकाशते |
| पुराकल्पः | यत्र बहुनायकसम्बद्धा कथा |
| विवेक्री | विवेचिका |
| अन्वाख्यानम् | प्रकृति-प्रत्ययविभागद्वारा शब्दार्थज्ञानम् |
| आख्यानम् | प्रवचनम् |
| उपनिबन्धनम् | संग्रहणम् |
| परिक्रिया | यत्र एकनायकेन सम्बद्धा कथा वर्णिता |

## अभ्यासः

१. **उच्चारणं कुरुत -**

विद्याश्चतुर्दश, विवृतक्रियातन्त्राः, स्तुतिनिन्दाव्याख्यानविनियोगग्रन्थः, वाङ्मयमुभयथा, सार्ववर्णिकः, अभिचाकशीति, निष्पत्तिनिर्णयिनी, शब्दानामन्वाख्यानम्, श्रुत्यर्थस्मरणात्स्मृतयः।

## २. अधोलिखितान् प्रश्नान् समाधत्त -

(क) पुरा कति विद्याः पाठ्यन्ते ?

(ख) चतुर्दशविद्याः कुत्र उल्लिखिताः ?

(ग) कति वेदाङ्गानि ? नामानि लिखत ।

(घ) कति पुराणानि सन्ति ? नामानि लिखत।

(ङ) कति वेदाः ? नामानि लिखत।

(च) वाङ्मयस्योभौ भेदौ कौ ?

(छ) अपौरुषेयं किम् ?

(ज) विवृत्तक्रियातन्त्राः के ?

## ३. रिक्तस्थानानि पूरयत -

(क) अङ्गानि ....................................... न्यायविस्तरः।

(ख) ....................................... विद्याश्चतुर्दश॥

(ग) शिक्षा .......................................षड् वेदाङ्गानि।

(घ) ....................................... मन्त्राः।

(ङ) मन्त्राणां ....................................... ब्राह्मणम्।

(च) द्वा सुपर्णा ....................................... परिषस्वजाते।

(छ) ....................................... अभिचाकशीति॥

(ज) सर्गः प्रतिसंहारः ....................................... वंशविधिः।

(झ) जगतो यत्र ....................................... पुराणमिति।

(ञ) परिक्रिया ....................................... ।
....................................... द्वितीया बहुनायका॥

## ४. अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत -

(क) महर्षिसान्दीपनेः त्रयः शिष्याः के आसन् ?

(ख) महर्षिसान्दीपनिः कति विद्याः अध्यापयामास ?

(ग) व्याकरणं किं कथ्यते ?

(घ) श्रुतिः कतिधा ?

(ङ) ग्रहगणितं किम् अस्ति ?

## ५. यथोचितं मेलनं कुरुत -

| | |
|---|---|
| (क) वेदाः | षड् |
| (ख) वेदाङ्गानि | चत्वारः |
| (ग) ग्रहगणितं | निरुक्तम् |
| (घ) पौरुषेयं | ज्योतिषम् |
| (ङ) निर्वचनम् | व्याकरणम् |
| (च) शब्दानामनवख्यानम् | पुराणम् |

## ७. विलोमशब्दान् लिखत -

(क) विद्या ---------------------------

(ख) अपौरुषेयम् ---------------------------

(ग) अनेकः ---------------------------

(घ) वैदिकः ---------------------------

(ङ) छन्दोबद्धः ---------------------------

(च) लौकिकः ---------------------------

## ८. अधोलिखितेषु पदेषु अव्ययपदानि चित्वा पृथक् लिखत -

(क) इह हि वाङ्मयमुभयथा शास्त्रं काव्यं च।

(ख) तत्र वर्णानां स्थान-करण-प्रत्ययादिभिः निष्पत्तिनिर्णयिनी शिक्षा।

(ग) जगतो यत्र निबद्धं तद्विज्ञेयं पुराणम्।

(घ) सर्गः प्रतिसंहारः कल्पो मन्वन्तराणि वंशविधिः।

(ङ) पुराणप्रभेद एवेतिहासः।

## ९. मञ्जूषायाः उचितं पदं चित्वा रिक्तस्थानं सम्पूरयत -

आयुर्वेदः, धनुर्वेदः, गन्धर्ववेदः, इतिहासवेदश्च, द्विविधा मन्त्राः ब्राह्मणञ्च,
अपौरुषेयं पौरुषेयञ्च, शास्त्रं काव्यञ्च, विवृत्तक्रियातन्त्राः

क) उपवेदाः ............................ ।

ख) मन्त्राः ............................... ।

ग) शास्त्रं द्विधा ............................ ।

घ) श्रुतिः ................................... ।

ङ) वाङ्मयमुभयथा ......................... ।

**१०. महर्षिसान्दीपनेः संस्कृतवाङ्मये योगदानं संस्कृतभाषया मातृभाषया/आङ्ग्लभाषया/ वा लिखत।**

## योग्यता-विस्तारः

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥

*श्रीमद्भगवद्गीता 10/22*

पुराण-न्याय-मीमांसा-धर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥
ब्राह्मणा ब्रह्मतन्त्रस्थाः तपस्तेषां न नश्यति ।
ब्रह्मधारयतां नित्यं व्रतानि नियमांस्तथा ॥
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥
वेदोऽखिलो धर्ममूलम्।
वेदैश्च सर्वैरहमेव वेद्यः।

# नवमः पाठः

# द्वन्द्वाव्ययीभावबहुव्रीहयः

**चार्थे द्वन्द्वः** *(पा.सू. २.२.२९)*

**पदविभागः -** चार्थे (सप्तम्येकवचनम्), द्वन्द्वः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते, स द्वन्द्वः। समुच्चय-अन्वाचय-इतरेतरयोग-समाहारश्चार्थाः। परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः। अन्यतरस्यानुषङ्गिकत्वेऽन्वाचयः। मिलितानामन्वय इतरेतरयोगः। समूहः समाहारः। तत्रेश्वरं गुरुं च भजस्व इति समुच्चये, भिक्षामट गां चानय इत्यान्वाचये च न समासोऽसामर्थ्यात्। धवखदिरौ छिन्धि। संज्ञापरिभाषम्। अनेकोक्तेर्होतृपोतृनेष्टोद्गातारः। द्वयोर्द्वयोर्द्वन्द्वं कृत्वा पुनर्द्वन्द्वे तु होतापोतानेष्टोद्गातारः।

उभयपदार्थप्रधानो द्वन्द्वसमासः।

द्वन्द्वसमासे समासघटितपदानाम् अर्थः पृथक्तया समूहरूपेण वा विवक्षितो भवति।




## इतरेतरयोगद्वन्द्वः

द्वन्द्वसमासे समस्तपदे स्थितानाम् अर्थानां यदा पृथक्तया बोधो भवति तदा इतरेतरयोगद्वन्द्वसमास इत्युच्यते। अत्र समस्तपदं द्विवचने बहुवचने वा भवति। तथैव उत्तरपदस्य यल्लिङ्गं तदेव समस्तपदस्यापि भवति।

**उदाहरणानि**

रामश्च कृष्णश्च रामकृष्णौ, रामकृष्णौ वेदपाठशालां गच्छतः।

गुरुश्च शिष्यश्च गुरुशिष्यौ, गुरुशिष्यौ वेदपारायणं कुरुतः।

| विग्रहवाक्यम् | समस्तपदम् | वाक्यम् |
|---|---|---|
| **हेमन्तश्च शिशिरश्च वसन्तश्च** | हेमन्तशिशिरवसन्ताः | हेमन्तशिशिरवसन्ताः इति प्रकृतेः ऋतवः। |
| **कुक्कुटश्च मयूरश्च** | कुक्कुटमयूरौ | कुक्कुटमयूरौ वने निवसतः। |
| **पत्रञ्च पुष्पञ्च फलञ्च** | पत्रपुष्पफलानि | पत्रपुष्पफलानि देवाय अर्पयामि। |
| **शिवश्च केशवश्च** | शिवकेशवौ | शिवकेशवौ व्याकरणम् अधीयाते। |

**समाहारद्वन्द्वः**

समस्तपदे विद्यमानानां पदानां समूहार्थः यदा विवक्षितो भवति तदा समाहारद्वन्द्वो भवति, इह समस्तपदं नपुंसकलिङ्गे, एकवचने च भवति।

**उदाहरणम् -** संज्ञा च परिभाषा च अनयोः समाहारः संज्ञापरिभाषम् । अहं संज्ञापरिभाषं पाठयामि। पाणी च पादौ च पाणिपादम्, पुत्रः पित्रोः पाणिपादं प्रक्षालयति।

| विग्रहवाक्यम् | समस्तपदम् | वाक्यम् |
|---|---|---|
| पुत्रश्च पौत्रश्च अनयोः समाहारः | पुत्रपौत्रम् | जननी पुत्रपौत्रं रक्षति। |
| रथिकाश्च अश्वारोहाश्च एतेषां समाहारः | रथिकाश्वारोहम् | रथिकाश्वारोहं सेनायाः अङ्गं भवति। |
| घटश्च पटश्च अनयोः समाहारः | घटपटम् | घटपटमस्ति। |
| मुखञ्च नासिका च अनयोः समाहारः | मुखनासिकम् | अनुनासिकस्योच्चारणं मुखनासिकेन भवति । |
| पाणी च पादौ च तेषां समाहारः | पाणिपादम् | शिष्यः गुरोः पाणिपादं प्रक्षालयति। |
| हरिश्च हरश्च गुरुश्च एषां समाहारः | हरिहरगुरु | हरिहरगुरु शिष्याय मङ्गलं प्रददाति |

## अव्ययीभावसमासः

**अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथाऽनुपूर्व्य-यौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु** *(पा.सू. २.१.६)*

**पदविभागः** - अव्ययम् (प्रथमैकवचनम्), विभक्तिसमीप......... वचनेषु (सप्तमीबहुवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः** - अव्ययम् इति योगो विभज्यते। अव्ययं समर्थेन सह समस्यते, सोऽव्ययीभावः। विभक्त्यादिषु अर्थेषु यद् अव्ययं वर्तते तत् समर्थेन सुबन्तेन सह समस्यते। अव्ययीभावश्च समासो भवति।

### पूर्वपदार्थप्रधानोऽव्ययीभावः।




### अव्ययपूर्वपदः

| | | | | | |
|---|---|---|---|---|---|
| १. | विभक्त्यर्थे | - | हरौ इति | = | अधिहरि |
| २. | समीपार्थे | - | कृष्णस्य समीपम् | = | उपकृष्णम् |
| ३. | समृद्ध्यर्थे | - | मद्राणां समृद्धिः | = | सुमद्रम् |
| ४. | व्यृद्ध्यर्थे | - | यवनानां व्यृद्धिः | = | दुर्यवनम् (विगता ऋद्धिः) |
| ५. | अर्थाभावार्थे | - | मक्षिकाणाम् अभावः | = | निर्मक्षिकम् |
| ६. | अत्ययार्थे | - | हिमस्य अत्ययः | = | अतिहिमम् (अत्ययः ध्वंसः) |
| ७. | असम्प्रत्यर्थे | - | निद्रा सम्प्रति न युज्यते इति | = | अतिनिद्रम् |
| ८. | शब्दप्रादुर्भावार्थे | - | हरिशब्दस्य प्रकाशः | = | इतिहरि |
| ९. | पश्चादर्थे | - | विष्णोः पश्चात् | = | अनुविष्णु |
| १०. | यथार्थश्चतुर्धा | - | | | |

(क) योग्यार्थे - रूपस्य योग्यम् = अनुरूपम्
(ख) वीप्सार्थे - अर्थम् अर्थं प्रति = प्रत्यर्थम्
(ग) पदार्थानतिवृत्त्यर्थे - शक्तिम् अनतिक्रम्य = यथाशक्ति
(घ) सादृश्यार्थे - हरेः सादृश्यम् = सहरि

११. आनुपूर्व्यार्थे - ज्येष्ठस्य आनुपूर्व्येण = अनुज्येष्ठम्
१२. यौगपद्यार्थे - चक्रेण युगपत् = सचक्रम्
१३. सादृश्यार्थे - सदृशः सख्या = ससखि
१४. सम्पत्त्यर्थे - क्षत्राणां सम्पत्तिः = सक्षत्रम्
१५. साकल्यार्थे - तृणमप्यपरित्यज्य = सतृणम् (अत्ति)
१६. अन्तार्थे - अग्निग्रन्थपर्यन्तम् अधीते = साग्नि
१७. अवधारणार्थे - यावन्ति नामानि (तावन्तः अच्युतप्रणामः) = यावन्नामम्
१८. मर्यादार्थे - आ मुक्तेः (संसारः) = आमुक्ति (मुक्तिपर्यन्तं संसारः)
१९. अभिविध्यार्थे - आ हिमालयात् = आहिमालयम्(भारतदेशः)
२०. आभिमुख्यार्थे - अग्निं प्रति = प्रत्यग्नि
अग्निम् अभि = अभ्यग्नि

## अव्ययोत्तरपदः अव्ययीभावसमासः

१. मात्रार्थे - शाकस्य लेशः = शाकप्रति

## अव्ययपदरहितः अव्ययीभावसमासः

१. तिष्ठन्ति गावः यस्मिन् काले = तिष्ठद्गु
२. गङ्गायाः पारे = पारेगङ्गम्
३. युद्धस्य मध्ये = मध्येयुद्धम्
४. द्वयोः यमुनयोः समाहारः = द्वियमुनम्
५. त्रयो मुनयो वंश्याः = त्रिमुनि (व्याकरणम्)

अव्ययीभावस्य अव्ययत्वात् त्रिषु लिङ्गेषु समानं रूपं भवति।

# बहुव्रीहिसमासः

**अनेकमन्यपदार्थे** *(पा.सू. २.२.२४)*

**पदविभागः** - अनेकम् (प्रथमैकवचनम्), अन्यपदार्थे (सप्तम्येकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः** - अनेकं प्रथमान्तमन्यस्य पदस्यार्थे वर्तमानं वा समस्यते स बहुव्रीहिः। प्रथमार्थम् एकं वर्जयित्वा सर्वेषु विभक्त्यर्थेषु बहुव्रीहिः भवति। प्राप्तम् उदकं यं ग्रामं स प्राप्तोदको ग्रामः। लिङ्गत्रयेऽपि बहुव्रीहिः सम्भवति ।

## सामान्यबहुव्रीहिः (समानाधिकरणबहुव्रीहिः)

बहुव्रीहिः सामान्यः विशेषश्चेति द्विधा इति पूर्वम् उक्तम्। समानाधिकरणबहुव्रीहिः एव अत्र सामान्यशब्देन व्यवहृतः। सामान्यः षोढा इत्युक्तम् ।

१. ऊढो रथो येन सः - ऊढरथः

२. आरुढं यानं येन सः - आरुढयानः

३. कृतं भोजनं येन सः - कृतभोजनः

४. प्रविष्टा शाला येन सः - प्रविष्टशालः

५. अधीतं काव्यं यया सा - अधीतकाव्या

६. धृतानि पुष्पाणि यया सा - धृतपुष्पा

७. उद्धृतः ओदनः यस्याः सा - उद्धृतौदना (स्थाली)

८. पतितानि पर्णानि यस्मात् सः - पतितपर्णः (वृक्षः)

९. चित्राः गावः यस्य सः - चित्रगुः

## व्यधिकरणबहुव्रीहिः

असमानविभक्त्यन्तयोः समासो व्यधिकरणबहुव्रीहिः उच्यते। विभिन्न-विभक्त्यन्तयोः समासो व्यधिकरणबहुव्रीहिः इति कथ्यते।

१. गदा पाणौ यस्य सः - गदापाणिः

२. भाले चन्द्रः यस्य सः - भालचन्द्रः

३. चन्द्रः मौलौ यस्य सः - चन्द्रमौलिः

## सङ्ख्योत्तरपदः

**संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये** *(पा.सू. २.२.२५)*

**पदविभागः** -संख्यया (तृतीयैकवचनान्तम्), अव्यय-आसन्न-अदूर-अधिक-संख्याः (प्रथमाबहुवचनम्), संख्येये (सप्तम्येकवचनम्)। त्रिपदं सूत्रमिदम्।

**वृत्तिः** - संख्येयार्थया संख्यया अव्ययादयः समस्यन्ते स बहुव्रीहिः। दशानां समीपे ये सन्ति ते उपदशाः। नव एकादश वेत्यर्थः। अव्यय-आसन्न-अदूर-अधिकशब्दाः सङ्ख्येयार्थकेन सङ्ख्याशब्देन समस्यन्ते। सङ्ख्योत्तरपदसमासे सर्वे बहुवचनान्ताः भवन्ति।

| | | | |
|---|---|---|---|
| १. | दशानां समीपे ये सन्ति ते | - | उपदशाः |
| २. | विंशतेः समीपे ये सन्ति ते | - | उपविंशाः |
| ३. | त्रिंशतः समीपे ये सन्ति ते | - | उपत्रिंशाः |
| ४. | पञ्चाशतः समीपे ये सन्ति ते | - | उपपञ्चाशाः |
| ५. | षष्टेः समीपे ये सन्ति ते | - | उपषष्टाः |
| ६. | सप्ततेः समीपे ये सन्ति ते | - | उपसप्तताः |
| ७. | अशीतेः समीपे ये सन्ति ते | - | उपाशीताः |
| ८. | शतस्य समीपे ये सन्ति ते | - | उपशताः |
| ९. | पञ्चविंशतेः आसन्नाः | - | आसन्नपञ्चविंशाः |
| १०. | चत्वारिंशतः अदूराः | - | अदूरश्चत्वारिंशाः |
| ११. | सहस्रात् अधिकाः | - | अधिकसहस्राः |

## सङ्ख्योभयपदः

सङ्ख्येयार्थकं सङ्ख्येयपदं सङ्ख्येयार्थकेन सङ्ख्यापदेन समस्यते -

| | | | |
|---|---|---|---|
| १. | द्वौ वा त्रयो वा | - | द्वित्राः |
| २. | त्रयो वा चत्वारो वा | - | त्रिचत्वाराः |
| ३. | पञ्च वा षड् वा | - | पञ्चषाः |

## सहपूर्वपदः

सह इत्येतत् तृतीयान्तेन समस्यते ।

| | | | |
|---|---|---|---|
| १. | पुत्रेण सह वर्तते इति | - | सपुत्रः/सहपुत्रः। |

२. कर्मणा सह वर्तते इति - सकर्मकः

**व्यतिहारलक्षणः**

व्यतिहारलक्षणस्य सर्वाणि उदाहरणाणि अव्ययानि भवन्ति।

१. केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम् - केशाकेशि

२. दण्डैः दण्डैः प्रहृत्य इदं युद्धं प्रवृत्तम् - दण्डादण्डि

३. मुष्टिभिः मुष्टिभिः इदं युद्धं प्रवृत्तम् - मुष्टीमुष्टि/मुष्टामुष्टि

४. बाहौ बाहौ गृहीत्वा इदं युद्धं प्रवृत्तम् - बाहूबाहवि

**दिगन्तराललक्षणः**

**दिङ्नामान्यन्तराले** *(पा.सू. २.२.२६)*

**पदविभागः -** दिङ्-नामानि (प्रथमाबहुवचनम्), अन्तराले (सप्तम्येकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** दिशो नामान्यन्तराले वाच्ये प्राग्वत्। दक्षिणस्याश्च पूर्वस्याश्च दिशोऽन्तरालं दक्षिणपूर्वा। नामग्रहणाद्यौगिकानां न। ऐन्द्याश्च कौबेर्याश्चान्तरालं दिक्।

१. दक्षिणस्याः पूर्वस्याश्च दिशोर्यदन्तरालम् - दक्षिणपूर्वा

२. पूर्वस्याः उत्तरस्याः च दिशोर्यदन्तरालम् - पूर्वोत्तरा

३. उत्तरस्याः पश्चिमस्या दिशोर्यदन्तरालम् - उत्तरपश्चिमा

४. पश्चिमस्याः दक्षिणस्याश्च दिशोर्यदन्तरालम् - पश्चिमदक्षिणा

**नञ्बहुव्रीहिः**

**नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपश्च** *(वार्तिकम्)*

सप्तम्यन्तसहितस्य उपमानसहितस्य च पूर्वपदस्य पदान्तरेण समासः पूर्वपदस्य उत्तरपदलोपश्च भवति।

१. अविद्यमानः पुत्रः यस्य सः - अपुत्रः

२. अविद्यमानम् अपत्यं यस्य सः - अनपत्यः

३. अविद्यमाना पुत्री यस्य सः - अपुत्रीकः

४. अविद्यमानाः प्रजाः यस्य सः - अप्रजः

५. अविद्यमाना मेधा यस्य सः - अमेधः

६. अविद्यमानं कर्म यस्य सः - अकर्मकः

## प्रादिबहुव्रीहिः

प्रादिभ्यः परं धातुजप्रकृतिकप्रथमान्तम् अन्येन प्रथमान्तेन समस्यते। परस्य धातुजस्य लोपश्च भवति।

१. निर्गता दया यस्मात् सः - निर्दयः
२. दुर्गता मेधा यस्य सः - दुर्मेधः
३. निर्गता करुणा यस्मात् सः - निष्करुणः
४. शोभना मेधा यस्य सः - सुमेधः
५. शोभनौ पादौ यस्य सः - सुपाद्
६. उन्नता नासिका यस्य सः - उन्नसः

## उपमानपूर्वपदः

सप्तम्यन्तसहितम् उपमानसहितञ्च समस्तपदं पदान्तरेण समस्यते। अस्मिन् समासे विग्रहावस्थायां पूर्वपदं समस्तम् एव भवति। तस्मिन् पदे यत् उत्तरपदं तस्य लोपश्च भवति।

१. पुण्डरीके इव अक्षिणी यस्य सः - पुण्डरीकाक्षः
२. उष्ट्रस्य मुखम् इव मुखं यस्य सः - उष्ट्रमुखः
३. चन्द्रस्य मुखम् इव मुखं यस्याः सा - चन्द्रमुखी

### अथ अलुक्समासो लुक्समासश्च

यस्मिन् समासे विभक्तेः लोपो भवति सः लुक्समास इत्युच्यते। यत्र च विभक्तेः लोपो न जायते स अलुक्समास इत्युच्यते। तद्यथा -

लुक्समासो यथा - तनुरेव लता = तनुलता। रामस्य नाम = रामनाम।

अलुक्समासः - जीमूतस्य इव = जीमूतस्येव। वने चरति इति = वनेचरः। पङ्के रोहति इति = पङ्केरुहम्। युधि स्थिरः इति = युधिष्ठिरः। कण्ठे कालो यस्य = कण्ठेकालः।

जनुषान्धः, जन्मान्धः, आत्मनेपदम्, परस्मैपदम्, दूरादागतः, अन्तेवासी, सरसिजम्।

## शब्दार्थाः

| | |
|---|---|
| समासः | संक्षिप्तीकरणम् |
| अव्ययीभावः | अनव्ययम् अव्ययं भवति इति अव्ययीभावः |
| समस्यते | संक्षिप्यते |
| अधीयाते | पठतः |
| सुबन्तेन | सुपा |
| द्वित्राः | द्वौ त्रयो वा |
| पञ्चषाः | पञ्च षड् वा |
| उपदशाः | दशानां समीपे ये ते |
| आसन्नपञ्चविंशाः | पञ्चविंशतेः आसन्नाः ये |
| उष्ट्रमुखः | उष्ट्रस्य मुखमिव मुखं यस्य |
| कण्ठेकालः | शिवः |

## अभ्यासः

१. **उच्चारणं कुरुत -**

संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये, नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपश्च, दिङ्-नामान्यन्तराले, चार्थे द्वन्द्वः, आसन्नविंशाः।

२. **वस्तुनिष्ठाः प्रश्नाः -**

(क) अव्ययीभावसमासः नास्ति -

(आ) द्वियमुनम् (आ) त्रिमुनि

(इ) सप्तगङ्गम् (ई) अनश्वः

(ख) सङ्ख्यापूर्वो ....................

(अ) द्विगुः (आ) अव्ययीभावः

(इ) द्वन्द्वः (ई) बहुव्रीहिः

(ग) 'सङ्ख्ययाऽव्ययासन्नादूराधिकसङ्ख्याः सङ्ख्येये' इति सूत्रेण बहुव्रीहेः उदाहरणमस्ति -

(अ) दशाननः (आ) उपदशाः

(इ) दशदिशाः (ई) दशतयी

(घ) केशाकेशि इत्यत्र कः समासः -

(अ) अव्ययीभावः (आ) द्विगुः

(इ) बहुव्रीहिः (ई) द्वन्द्वः

(ङ) विशेषसंज्ञाविनिर्मुक्तः ....................

(अ) तत्पुरुषः (आ) कर्मधारयः

(इ) द्वन्द्वः (ई) केवलसमासः

(च) 'पारेगङ्गम्' इति पदे समासोऽस्ति -

(अ) अव्ययीभावः (आ) बहुव्रीहिः

(इ) तत्पुरुषः (ई) द्वन्द्वः

(छ) 'चक्रपाणिः' इति उदाहरणमस्ति -

(अ) बहुव्रीहेः (आ) तत्पुरुषस्य

(इ) द्विगोः (ई) अव्ययीभावस्य

## ३. यथायोग्यं योजयत -

| | |
|---|---|
| (क) सङ्ख्यापूर्वो | त्रिलोचनः |
| (ख) प्रायः पूर्वपदार्थप्रधानः | वृत्तयः |
| (ग) बहुव्रीहेः उदाहरणमस्ति | द्विगुः |
| (घ) द्वन्द्वसमासस्योदाहरणम् | अव्ययीभावः (उपनगरम्) |
| (ङ) पञ्च | भीमार्जुनौ |

## ४. रिक्तस्थानानि पूरयत -

(क) कर्मधारयभेदो ....................।

(ख) उभयपदार्थप्रधानो ....................।

(ग) वृत्त्यर्थावबोधकं वाक्यं ....................।

(घ) .................... पञ्च वृत्तयः।

(ङ) परस्परान्वितयोः (सुबन्तयोः) नामपदयोः एव .................... भवति।

(च) ....................................संख्येये ।

## ५. अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत -

(क) द्वन्द्वसमासस्य द्वौ भेदौ लिखत।

(ख) अव्ययपूर्वपदसमासस्योदाहरणं लिखत।

(ग) 'प्राप्तोदकः' कस्य समासस्य उदाहरणं वर्तते?

(घ) पश्चादर्थे अव्ययीभावस्य किम् उदाहरणम् ?

(ङ) समीपार्थे किम् उदाहरणं भवति ?

(च) 'केशाकेशि' इत्यत्र कः विग्रहः ?

(छ) द्वन्द्वसमासः कतिविधः ?

(ज) बहुव्रीहिसमासस्य भेदान् लिखत।

(झ) 'प्रतिवर्षम्' कस्य समासस्योदाहरणमस्ति ?

## ६. समस्तपदं विलिख्य समासनाम लिखत -

| | पदानि | समस्तपदम् | समासस्य नाम |
|---|---|---|---|
| (क) | हरिश्च हरश्च | .................................. | ................. |
| (ख) | हरिणा सदृशः | .................................. | ................. |
| (ग) | कृष्णश्च अर्जुनश्च | .................................. | ................. |
| (घ) | अविद्यमानः पुत्रः यस्य सः | .................................. | ................. |
| (ङ) | पण्डितश्च वनिता च लता च | .................................. | ................. |

## ७. विग्रहवाक्यं विलिख्य समासनाम लिखत -

| | | विग्रहवाक्यम् | समासनाम |
|---|---|---|---|
| (क) | ब्रह्माच्युतशङ्कराः | .................................. | ................. |
| (ख) | धृतपुष्पा | .................................. | ................. |
| (ग) | चित्रगुः | .................................. | ................. |
| (घ) | उपषष्ठाः | .................................. | ................. |

| | | | |
|---|---|---|---|
| (ङ) | सुमद्रम् | ................................ | ................ |
| (च) | इतिहरि | ................................ | ................ |
| (छ) | नीलकण्ठः | ................................ | ................ |

८. समस्तपदानां विग्रहवाक्यं विलिख्य समाससूत्रं लिखत -

| | समस्तपदम् | विग्रहवाक्यम् | समाससूत्रम् |
|---|---|---|---|
| (क) | प्रतिदिनम् | ..................... | ..................... |
| (ख) | द्व्यङ्गुलम् | ..................... | ..................... |
| (ग) | द्वादश | ..................... | ..................... |
| (घ) | केशाकेशि | ..................... | ..................... |
| (ङ) | दशरथपुत्रः | ..................... | ..................... |
| (च) | गोरक्षितम् | ..................... | ..................... |
| (छ) | वागर्थाविव | ..................... | ..................... |
| (ज) | अहोरात्रः | ..................... | ..................... |
| (झ) | स्त्रीप्रमाणः | ..................... | ..................... |
| (ञ) | महाराजः | ..................... | ..................... |
| (ट) | छत्रोपानहम् | ..................... | ..................... |

## योग्यता-विस्तारः

समानाधिकरणबहुव्रीहिः, व्यधिकरणबहुव्रीहिः इति बहुव्रीहि द्विविधः। समासान्तर्गतानां पूर्वोत्तरपदानां विभक्तिः समाना चेत् समानाधिकरणबहुव्रीहिः भवति। यथा पीताम्बरः।

समासान्तर्गतानां पदानां विभक्तिः भिन्ना चेत् व्यधिकरणबहुव्रीहिः। चक्रपाणिः।

| विग्रहवाक्यम् | समस्तपदं | समासः |
|---|---|---|
| चत्वारि मुखानि यस्य सः | चतुर्मुखः | ब्रह्मा |
| तपः एव धनं यस्य सः | तपोधनः | ऋषिः |
| वीणा पाणौ यस्याः सा | वीणापाणिः | सरस्वती |
| कोदण्डः पाणौ यस्य सः | कोदण्डपाणिः | रामः |

१. परस्परान्वितयोः सुबन्तयोः एव समासो भवति।

२. अर्थम् अनुसृत्य समासः भिन्नः भवति।

३. वृत्यर्थावबोधकं वाक्यं विग्रहः। कृत्-तद्धित-समास-एकशेष-सनाद्यन्ताः धातुरूपा वृत्तयः पञ्च। अतः यत्र यत्र विग्रहवाक्यं तत्र तत्र समासः इति न।

४. एकशेषः समासः न। सोऽपि पञ्चवृत्तिषु अन्यतमः माता च पिता च - पितरौ, हंसश्च हंसी च हंसौ, एवं स्त्रीलिङ्गपदेन सह उक्तं पुँल्लिङ्गपदम् उभयोर्द्योतकं भवति। तत्र पुँल्लिङ्गपदमेव शिष्यते।

५. यत्र सङ्ख्यावाचकं पूर्वपदं भवति तत्र सर्वत्र द्विगुसमासः इति न। त्रीणि लोचनानि यस्य सः त्रिलोचनः अत्र बहुव्रीहिः। तद्धितार्थः समाहारः वा दृश्यते चेदेव सङ्ख्यापूर्वः द्विगुः भवति। सङ्ख्यापूर्वो द्विगुः, तद्धितार्थोत्तरपदसमाहारे च इति सूत्रद्वयमत्र प्रमाणम्।

६. समाहारद्वन्द्वः सर्वत्र भवति। घटपटौ/घटपटम्। केषुचित् स्थलेषु समाहार एव उक्तः न तु इतरेतरद्वन्द्वः। द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्, अनुवादे चरणानाम्, इत्यादिसूत्रैः।

**विंशत्याद्याः सदैकत्वे संख्याः संख्येयसंख्ययोः।**
**संख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेः स्त्रियः॥**

**द्वन्द्वो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः।**
**तत्पुरुष कर्मधारय येनाहं स्यां बहुव्रीहिः॥**

कस्यचित् महाराजस्य सभां गत्वा कश्चन कविः एवं प्रार्थितवान्। अस्य अर्थः एवमस्ति - महाराज - अहं द्वन्द्वः अस्मि (अहं मम पत्नी च), अहं द्विगुः अस्मि (मम सविधे गावौ स्तः), मम गृहे नित्यम् अव्ययीभावः भवति (व्ययः एव न भवति, व्ययं कर्तुं धनमेव न भवति), तत्पुरुष ! कर्म धारय (कार्यं ददातु) येन अहं बहुव्रीहिः (बहुधान्यसम्पन्नः) स्याम्।

# दशमः पाठः

## श्रीरामवनगमनम्

काव्यं श्रव्यं दृश्यम् इति द्विधा विभक्तम्। यत् काव्यं पठितुं, द्रष्टुञ्च शक्यते तादृशं काव्यम् दृश्यकाव्यम्, यस्य साधारणतया नाटकम् इति प्रसिद्धं नाम। पाठ्यभागोऽयं महाकविभासविरचितस्य प्रतिमानाटकस्य प्रथमाङ्कात् सङ्गृहीतः। नाटकेऽस्मिन् सप्त अङ्काः वर्तन्ते। अमुष्मिन् १५७ (सप्तपञ्चाशताधिकैकशतम्) श्लोकाः सन्ति।

पात्रपरिचयः - काञ्चुकीयः, रामः, सीता, लक्ष्मणः

(प्रविश्य)

काञ्चुकीयः - परित्रायतां परित्रायतां कुमारः।

रामः - आर्य ! कः परित्रातव्यः ?

काञ्चुकीयः - महाराजः!

रामः - महाराजः इति। आर्य ! ननु वक्तव्यम्। एकशरीरसंक्षिप्ता पृथिवी रक्षितव्येति। अथ कुत उत्पन्नोऽयं दोषः ?

काञ्चुकीयः - स्वजनात् ।

रामः - स्वजनादिति। हन्त ! नास्ति प्रतीकाराः।

**शरीरेऽरिः प्रहरति हृदये स्वजनस्तथा।**
**कस्य स्वजनशब्दो मे लज्जामुत्पादयिष्यति॥ १॥**

काञ्चुकीयः - तत्र भवत्याः कैकेय्याः।

रामः - किमम्बायाः, तेन हि उदर्केण गुणेनात्र भवितव्यम्।

काञ्चुकीयः - कथमिव ?

रामः - श्रूयताम्

**यस्याः शक्रसमो भर्ता मया पुत्रवती च या।**
**फले कस्मिन् स्पृहा तस्या येनाकार्यं करिष्यति॥ २॥**

काञ्चुकीयः - कुमार! अलमुपहतासु, स्त्रीबुद्धिषु, स्वमार्जवमुपनिक्षेप्तुम्। तस्या एव खलु वचनात् भवदभिषेको निवृत्तः।

रामः - आर्य ! गुणाः खल्वत्र।

काञ्चुकीयः - कथमिव ?

रामः - श्रूयताम्,

**वनगमननिवृत्तिः पार्थिवस्यैव तावन्मम पितृपरवत्ता बालभावः स एव।**
**नवनृपतिविमर्शे नास्ति शङ्का प्रजानामथ च न परिभोगैर्वञ्चिता भ्रातरो मे॥३॥**

काञ्चुकीयः - अथ च तयाऽनाहूतोपसृतया भरतोऽभिषिच्यतां राज्य इत्युक्तम् अत्राप्यलोभः।

रामः - आर्य ! भवान् खल्वस्मत्पक्षपातादेव नार्थमवेक्षते। कुतः ?

**शुल्के विपणितं राज्यं पुत्रार्थे यदि याच्यते।**
**तस्या लोभोऽत्र नास्माकं भ्रातृराज्यापहारिणाम् ॥४॥**

काञ्चुकीयः - अथ -------

रामः - अतः परं न मातुः परिवादं श्रोतुमिच्छामि। महाराजस्य वृत्तान्तस्तावदभिधीयताम् ।

काञ्चुकीयः - ततस्तदानीम् ,

**शोकादवचनाद् राज्ञा हस्तेनैव विसर्जितः ।**
**किमप्यभिमतं मन्ये मोहं च नृपतिर्गतः ॥५॥**

रामः - कथं मोहमुपगतः।

(नेपथ्ये)

कथं कथं मोहमुपगत इति।
यदि न सहसे राज्ञो मोहं धनुः स्पृश मा दयाम्॥

रामः - (आकर्ण्य पुरतो विलोक्य)

**अक्षोभ्यः क्षोभितः केन लक्ष्मणो धैर्यसागर ।**
**येन रुष्टेन पश्यामि शताकीर्णमिवाग्रतः॥६॥**

(ततः प्रविशति धनुर्बाणपाणिर्लक्ष्मणः)

लक्ष्मणः - (सक्रोधम्) कथं कथं मोहमुपगत इति।

**यदि न सहसे राज्ञो मोहं धनुः स्पृश मा दयां**

**स्वजननिभृतः सर्वोप्येवं मृदुः परिभूयते।**

**अथ न रुचितं मुञ्च त्वं मामहं कृतनिश्चयो**

**युवतिरहितं लोकं कर्तुं यतश्छलिता वयम् ॥७॥**

सीता - आर्यपुत्र! रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम्। अपूर्वः खल्वस्यायासः।

रामः - सुमित्रामातः ! किमिदम् ?

लक्ष्मणः - कथं कथं किमिदं नाम।

**क्रमप्राप्ये हृते राज्ये भुवि शोच्यासने नृपे ।**

**इदानीमपि सन्देहः किं क्षमा निर्मनस्विता॥८॥**

रामः - सुमित्रामातः ! अस्मद्राज्यभ्रंशो भवत उद्योगं जनयति।

आः, अपण्डितः खलु भवान्।

**भरतो वा भवेद् राजा वयं वा ननु तत् समम्।**

**यदि तेऽस्ति धनुश्श्लाघा स राजा परिपाल्यताम् ॥९॥**

लक्ष्मणः - न शक्नोमि रोषं धारयितुम्। भवतु भवतु गच्छामस्तावत्।

(प्रस्थितः)

रामः - **त्रैलोक्यं दग्धुकामेव ललाटपुटसंस्थिता।**

**भृकुटिर्लक्ष्मणस्यैषा नियतीव व्यवस्थिता ॥१०॥**

लक्ष्मणः - आर्य ! अयमस्मि।

रामः - भवतः स्थैर्यमुत्पादयता मयैवमभिहितम्।

उच्यतामिदानीम्।

**ताते धनुर्न मयि सत्यमवेक्ष्यमाणे मुञ्चानि मातरि शरं स्वधनं हरन्त्याम्।**

**दोषेषु बाह्यमनुजं भरतं हनानि किं रोषणाय रुचिरं त्रिषु पातकेषु॥११॥**

लक्ष्मणः - (सवाष्पम्) हा धिक् ! अस्मान् अविज्ञायोपालभसे।

**यत्कृते महति क्लेशे राज्ये मे न मनोरथः ।**

**वर्षाणि किल वस्तव्यं चतुर्दश वने त्वया ॥१२॥**

रामः - अत्र मोहमुपगतस्तत्र भवान्। हन्त ! निवेदितमप्रभुत्वम्। मैथिलि !

मङ्गलार्थेऽनया दत्तान् वल्कलांस्तावदानय।
करोम्यन्यैर्नृपैर्धर्मं नैवाप्तं नोपपादितम्॥ १३॥

सीता - गृह्णात्वार्यपुत्रः।

रामः - मैथिलि ! किं व्यवसितम् ?

सीता - ननु सहधर्मचारिणी खल्वहम्।

रामः - मयैकाकिना किल गन्तव्यम्।

सीता - अतो नु खल्वनुगच्छामि।

रामः - वने खलु वस्तव्यम्।

सीता - तत् खलु मे प्रसादः।

रामः - श्वश्रूश्वशुरशुश्रूषापि च ते निर्वर्तयितव्या।

सीता - एनामुद्दिश्य देवतानां प्रणामः क्रियते।

रामः - लक्ष्मण ! वार्यतामियम्।

लक्ष्मणः - आर्य ! नोत्सहे श्लाघनीये काले वारयितुम् अत्र भवतीम्।

## शब्दार्थाः

| | |
|---|---|
| परित्रायताम् | रक्ष्यताम् |
| परित्रातव्यः | रक्षणीयः |
| वक्तव्यम् | कथयितव्यम् |
| एकशरीरसंक्षिप्ता | एकमात्रस्थिता |
| स्वजनात् | स्वसदस्यात्/ज्ञातिजनात् |
| प्रतीकारः | निवारणम् |
| शरीरेऽरिः | शरीरे शत्रुः |
| प्रहरति | प्रहारं करोति |
| उत्पादयिष्यति | जनयिष्यति |
| उदर्केण | उत्तरकाले भाविफलेन/शुभाशुभकर्मणा |
| शक्रसमः | इन्द्रतुल्यः |

| | |
|---|---|
| आर्जवम् | सारल्यम् |
| पितृपरक्ता | पितुरधीनता |
| अनाहूतोपसृतया | अनाहूता समीपं प्राप्तवती |
| अत्राप्यलोभः | अत्रापि लोभाभावः |
| खल्वस्मत्पक्षपातादेव | अस्मत् पक्षपाताद् एव |
| नार्थमवेक्षते | यथार्थं न पश्यति |
| भ्रातृराज्यापहारिणम् | भ्रातुः राज्यापहर्तुः |
| अक्षोभ्यः | अक्षुब्धः |
| शताकीर्णम् | शतजनैः व्याप्तम् |
| स्वजननिभृतः | स्वजने विनययुक्तः |
| परिभूयते | तिरस्क्रियते |
| युवतिरहितम् | महिलारहितम् |
| अपूर्व खल्वस्यायासः | आश्चर्यजनकः प्रयासः अस्य |
| अस्मद्राज्यभ्रंशः | अस्माकं राज्यस्य ध्वंसः |
| धनुः श्लाघा | धनुर्विद्यायाम् आत्मस्तुतिः। |
| दग्धुकामेव | भस्मसात्कर्तुकामा |
| अविज्ञायोपालभसे | अज्ञात्वा उपलभसे |
| मयैकाकिना | मया एकलेन |
| वार्यताम् | निवार्यताम् |

## अभ्यासः

१. **उच्चारणं कुरुत -**

स्वजनादिति, लज्जामुत्पादयिष्यति, स्वमार्जवमुपनिक्षेप्तुम्, वनगमननिवृत्तिः, परिभोगैर्वञ्चिता, भरतोऽभिषिच्यताम्, शताकीर्णमिवाग्रतः, भृकुटिर्लक्ष्मणस्यैषा, श्वश्रूश्वशुरशुश्रूषापि

## २. अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत -

(क) प्रतिमानाटकस्य रचयिता कः ?

(ख) परित्रायतां परित्रायतां कुमार इति कः कथयति?

(ग) कस्याः भर्ता शक्रसमः आसीत् ?

(घ) एकशरीरसंक्षिप्ता का रक्षितव्या ?

(ङ) शरीरे कः प्रहरति ?

(च) स्वजनः कुत्र प्रहरति ?

(च) रामः कस्य परिवादं न श्रोतुम् इच्छति ?

(छ) लज्जां कः उत्पादयिष्यति ?

## ३. रिक्तस्थानानि पूरयत -

(क) शरीरेऽरिः ........................ ......................... तथा।

(ख) ........................ ......................... उत्पादयिष्यति॥

(ग) यस्याः ........................ ......................... या।

(घ) ........................ ......................... करिष्यति।

(ङ) शुल्के ........................ ......................... याच्यते।

(च) ........................ ......................... अपहारिणाम् ।

(छ) ........................ ......................... राज्ञा हस्तेनैव विसर्जितः ।

(ज) किमप्याभिमतं ........................ .........................।

(झ) अक्षोभ्यः क्षोभित ........................ .........................।

........................ ......................... शताकीर्णमिवाग्रतः॥

(ञ) यत्कृते महति ........................ .........................।

........................ ......................... वने त्वया॥

## ४. अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत -

(क) रामः लक्ष्मणस्य रोषं कथं प्रतिपादयति ?

(ख) रामस्य अभिषेकः कथं निवृत्तः ?

(ग) दशरथस्य मोहं श्रुत्वा लक्ष्मणेन रोषेण किम् उक्तम् ?

(घ) रामेण त्रीणि पातकानि कानि उक्तानि ?

(ङ) लक्ष्मणेन किं कर्तुं निश्चयः कृतः ?

५. पाठमाश्रित्य रामस्य चारित्रिक-वैशिष्ट्यं संस्कृतभाषया/मातृभाषया/आंग्लभाषया लिखत।

६. अधोलिखितानां पदानां प्रकृति-प्रत्ययौ पृथक् कृत्वा लिखत -

| | शब्दः | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | परित्रातव्यः | | |
| (ख) | वक्तव्यम् | | |
| (ग) | रक्षितव्या | | |
| (घ) | भवितव्यम् | | |
| (ङ) | पुत्रवती | | |
| (च) | श्रोतुम् | | |
| (छ) | विसर्जितः | | |
| (ज) | गताः | | |
| (झ) | क्षोभितः | | |
| | धारयितुम् | | |

७. अधोलिखितानां पदानां सन्धिविच्छेदं कुरुत -

सन्धिविच्छेदः

(क) शरीरेऽरिः ................ + ................

(ख) येनाकार्यम् ................ + ................

(ग) स्वजनस्तथा ................ + ................

(घ) भरतोऽभिषिच्यताम् ................ + ................

(ङ) छायेव ................ + ................

(च) मनीषा ................ + ................

८. कोष्ठके विद्यमानानां पदानां विग्रहवाक्यं विलिख्य समासनिर्णयं कुरुत।

| | विग्रहवाक्यम् | समासनाम |
|---|---|---|
| (क) महाराजः | .................................. | ...................... |
| (ख) भवदभिषेकः | .................................. | ...................... |
| (ग) धनुर्बाणपाणिः | .................................. | ...................... |
| (घ) शताकीर्णम् | .................................. | ...................... |
| (ङ) अपण्डितः | .................................. | ...................... |
| (च) स्त्रीबुद्धिः | .................................. | ...................... |

९. रेखाङ्कितानि पदानि आदाय प्रश्ननिर्माणं कुरुत -

(क) रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम्।

(ख) अस्मद्राज्यभ्रंशो भवत उद्योगं जनयति।

(ग) एकशरीरसंक्षिप्ता पृथिवी रक्षितव्या।

(घ) ततः प्रविशति धनुर्बाणपाणिर्लक्ष्मणः।

(ङ) नोत्सहे श्लाघनीये काले वारयितुमत्र भवतीम्।

## योग्यता-विस्तारः

महाकविभासनाटकचक्रे त्रयोदश नाटकानि सन्ति। तद्यथा -

### श्रीमद्रामायणाधारितम् -

१. अभिषेकनाटकम् - किष्किन्धाकाण्डात् आरभ्य युद्धकाण्डान्ता रामकथा अत्र वर्णिता।

२. प्रतिमानाटकम् - रामवनवासात् आरभ्य रावणवधान्ता कथा वर्णिता।

### महाभारताधारितम् -

३. कर्णभारम् - ब्राह्मणवेषधारिणे शक्राय कर्णस्य कवचकुण्डलार्पणम्।

४. ऊरुभङ्गम् - पाञ्चाली परिभवप्रतिक्रियार्थं भीमेन गदायुद्धे दुर्योधनस्य ऊरुभञ्जनम् अत्र वर्णितमस्ति।

| | | | |
|---|---|---|---|
| ५. | दूतवाक्यम् | - | महाभारतयुद्धात् पूर्वं पाण्डवार्थं दुर्योधनः संसदि श्रीकृष्णस्य दूतत्वेन गमनं प्रयत्नवैकल्यं च अत्र वर्णितमस्ति। |
| 6. | पाञ्चरात्रम् | - | यज्ञान्ते द्रोणः दक्षिणारूपेण पाण्डवेभ्यः राज्यार्थं दुर्योधनं ययाचे। पञ्चरात्राभ्यन्तरे पाण्डवानाम् उदन्तः उपलभ्यते चेत् राज्यार्धं मया दास्यते इति दुर्योधनोक्तिः पञ्चरात्राभ्यन्तरे पाण्डवानां प्राप्तिः, दुर्योधनकृतराज्यार्धप्रदानं च। |
| ७. | दूतघटोत्कचम् | - | अभिमन्युनिधनानन्तरं श्रीकृष्णप्रेरणया दैत्यमाश्रित्य घटोत्कचस्य धृतराष्ट्रान्तिक-गमनम्। |
| ८. | मध्यमव्यायोगः | - | भीमः मध्यमनामानं ब्राह्मणकुमारम् एकं घटोत्कचात् अत्रायत। |
| ९. | प्रतिज्ञायौगन्धरायणम् | - | उदयनस्य वासवदत्तया सह प्रणयः (चरित्ररूपकात्) परिणयश्च अत्र वर्णितः। |
| १०. | बालचरितम् | - | बालस्य श्रीकृष्णस्य जन्मन आरभ्य कंसवधान्तं विद्यमानं श्रीकृष्णचरितम् अत्र वर्णितमस्ति। |
| ११. | स्वप्नवासवदत्तम् | - | वासवदत्ता अग्निदाहेन दग्धेति प्रवारस्य प्रचारः यौगन्धरायणः प्रयत्नात् पद्मावत्या सह उदयनस्य उपयमः अपहृतराज्यावाप्तिश्च अत्र वर्णिता। |
| १२. | अविमारकम् | - | राजकुमारस्य अविमारकस्य राज्ञः कुन्तिभोजस्य दुहित्रा (कल्पितकथा) कुरङ्ग्या सह प्रणयपरिणयः अत्र वर्णितः। |
| १३. | चारुदत्तम् | - | उदारचित्तेन चारुदत्तेन सह वसन्तसेनायाः प्रणयः अत्र वर्णितः अस्ति। |

# एकादशः पाठः

## अस्माकं राष्ट्रस्य गौरवम्

भारतवर्षम् अस्माकं प्रियः देशः अस्ति। एषा अस्माकं भारतभूमिः। अतो वयं सर्वे भारतीयाः प्रजाः, भारतमातुः सुपुत्राः स्मः। अथर्ववेदे ऋषिः शौनक उपदिदेश -

**माता भूमिः पुत्रोऽहं पृथिव्याः।**

*(अथर्ववेदः - १२.१.१२)*

**सा नो भूमिर्विसृजतां माता पुत्राय मे पयः।**

*(अथर्ववेदः - १२.१.१०)*

प्राचीनतमा विश्ववारा च संस्कृतिः अस्माकम् आस्ते। देशस्यास्य संस्कृतिः सनातनी। सहस्रशः वर्षेभ्यः पूर्वं यदा अन्यत्र देशेषु अक्षराणां ज्ञानमपि नासीत्, (जनानां ज्ञानलवलेशो नासीत्) तदा अस्माकं देशे विश्वस्य प्राचीनतमानां ज्ञानाधारभूतानां चतुर्णां वेदानाम्, शिक्षाकल्पादीनां वेदाङ्गानाम्, पुराणानाम्, उपपुराणानाम्, विविधानां शास्त्रग्रन्थानाम् अध्ययनम् अध्यापनं च प्रचलितम् आसीत्। अस्माकं देशम् अभिव्याप्य विविधविद्यानां कलानां च अध्यापनम् अध्ययनं च कर्तुम्, सनातनसंस्कृतेः संरक्षणार्थं च नैकानि गुरुकुलानि आसन्। तक्षशिला-नालन्दा-वाराणसी-मिथिला-तल्हरा-शारदापीठ-बल्लभी-काञ्ची-पुरी-धारा-अवन्तिका पुष्पगिरि-गुण्टूरु-ओदन्तपुरी-विक्रमशिला-सोमपुर-विक्रमपुर-कन्थल्लूरु-जगद्दल-नडिया-बनवासि-कल्याण-श्रीपत्तन-पैठणादिस्थानेषु आधुनिकविश्वविद्यालयसदृशानि महान्ति गुरुकुलानि आसन्। अपि च वसिष्ठादीनां महर्षीणाम्, द्रोणादीनाम् आचार्याणां च अधुनापि जनैः स्तुत्यानि गुरुकुलानि आसन्। तेषु गुरुकुलेषु सामान्य-जनानाम्, राजपुत्राणाम्, राजपुत्रीणाम्, ऋषिपुत्राणाम्, ऋषीकाणाम्, विविधावतारभूतानां श्रीराम-श्रीकृष्णादीनां च सममेव अध्ययनं भवति स्म, तेषु अन्यतमः भगवान् श्रीकृष्णः महर्षेः सान्दीपनेः गुरोः सन्निधौ चतुष्षष्टेः(६४) कलानाम् अध्ययनम् अकरोत्। प्राचीनकालिकीं गुरुकुलपरम्पराम् अनुसृत्य वेदानां सस्वरपरम्पराम्, वेदाङ्गानि च संरक्षितुं भगवतो निःश्वसितस्य वेदस्य सर्वतोमुखं प्रसारं च कर्तुम् उज्जयिन्यां स्थितं "महर्षि-सान्दीपनि-राष्ट्रिय-वेद-विद्या-प्रतिष्ठानम्" वेदानाम्, पारम्परिकविद्यानां च अध्ययन-अध्यापनादिशैक्षिकं कार्यम्, वेदसम्मेलनादिमुखेन वेदप्रचारादिकं च सम्पादयति।

देशेऽस्मिन् बहूनि तीर्थस्थलानि सन्ति। काश्यां श्रीविश्वनाथः, अयोध्यायां श्रीरामः, उज्जयिन्यां श्रीमहाकालः, वैद्यनाथे श्रीवैद्यनाथेश्वरः, श्रीरामेश्वरे ईश्वरः, तिरुपतौ श्रीवेङ्कटेश्वरः, काञ्च्यां कामाक्षी, मथुरायां श्रीकृष्णः, द्वारकायां श्रीकृष्णः, पुर्यां श्रीजगन्नाथः, पुष्करे ब्रह्मा, शृङ्गगिरौ श्रीशारदादेवी च भारतभुवं पावयन्ति, भक्तानाम् अभीष्टं पूरयन्ति च।

भारतदेशस्य प्राकृतिकी शोभा अनुपमा अस्ति। असंख्यैः उच्चैः शिखरैः शोभितः हिमालयः भारतदेशस्य उत्तरसीमानं रक्षति, कैलासगिरिगौरो राजते। हिमालयपरिसरे हरिद्वारम्, ऋषिकेशः, बदरीनाथ-केदारनाथ-यमुनोत्री-गङ्गोत्री च इत्यादीनि रम्याणि तीर्थस्थलानि सन्ति। एतेषु तीर्थस्थानेषु पवित्राणि नद्यः वहन्ति, गङ्गा काशीनगरे, यमुना मथुरायाम्, सरयूः अयोध्यायाम्, तुङ्गभद्रा शृङ्गगिरौ, नासिकप्रदेशे गोदावरी च वहति। प्रतिदिनं परस्सहस्रं भक्ताः एतानि क्षेत्राणि प्रति आगच्छन्ति। पुण्यसलिलायां नद्यां स्नानं कृत्वा पवित्रमनसः भूत्वा देवानां दर्शनं कुर्वन्ति। पुण्यभाजो भवन्ति च।

वसिष्ठ-विश्वामित्रप्रभृतयः मन्त्रद्रष्टारः ऋषयः, याज्ञवल्क्यादयः ब्रह्मज्ञाः, जनकादयः राजर्षयः, मैत्रेयी, गार्गी, लोपमुद्रा इत्याद्याः च विदुष्यः, व्यास-बाल्मीकि-कालिदासादयः कवयः पाणिनि-कात्यायन-पतञ्जल्यादयो महान्तो वैयाकरणाश्च, कणाद-बोधायन-आर्यभट्ट-ब्रह्मगुप्त-वराहमिहिर-भास्कराचार्य-महावीराचार्य-नागार्जुन- विद्या-विज्ञानविशारदाः, आचार्याः देशभक्ताः, वैज्ञानिकाः, वीरमहिलाश्च जन्म अलभन्त। श्रीशङ्कराचार्यः केरले, श्रीरामानुजाचार्यः तमिलनाडुराज्ये, श्रीमध्वाचार्यः कर्णाटके च जन्म लब्ध्वा देशे सर्वत्र आत्मदर्शनस्य अद्वैत-विशिष्टाद्वैत-द्वैतमार्गोपदेशं कृत्वा जनान् उदधरन्। विश्वप्रसिद्धौ गुरुशिष्यौ श्रीरामकृष्णपरमहंसः, स्वामिविवेकानन्दः च, गुजरातप्रदेशे लब्धजन्मा वेदव्रती महर्षिः दयानन्दः च राष्ट्रगौरवं विश्वे अवर्धयन्। वीरमहिलाः झांसी राज्ञी लक्ष्मीबाई-माता, कित्तूरु-चेन्नम्मा, अहल्याबाई-होल्कर प्रभृतयः देशरक्षणम् अकुर्वन्। व्यूढोरस्काः दृढस्कन्धाः महान्तः योद्धारः सेनानायकाः महाराष्ट्रे वीरशिवाजी, राजस्थाने महाराणाप्रतापः इत्यादयः परमदेशभक्ताः भारतमातुः रक्षाम् कृतवन्तः। श्रीप्रह्लाद-श्रीरामानुज-श्रीसन्तज्ञानेश्वर-सन्तनामदेव-रामानन्द-कबीर-रविदास-गुरुनानक-वल्लभाचार्य-श्रीजयदेव-चैतन्यमहाप्रभु-आळ्वार-मीराबाई-आण्डाल इत्याद्याः भक्ताग्रेसराः आत्मदर्शने भक्तिः गरीयसी इति भक्तेः परां काष्ठां मेनिरे। भारतमातुः सुपुत्राः नेताजी सुभाषचन्द्रबोसः, राष्ट्रियस्वयंसेवकसङ्घस्य संस्थापकः डॉ.

केशवबलिरामहेडगेवारमहोदयः, अहिंसापथप्रदर्शकः महात्मगान्धिमहोदयः एवं गुजरातप्रदेशीयः भारतरत्नं श्रीसरदारवल्लभभाईपटेलः राजाधिराजक्रमेण शतशः विभिन्नं भारतभूप्रदेशम् एकीकृत्य देशे भावैक्यं देशगौरवं च समवर्धयत्। ते सर्वे, ताः सर्वाः च भारतमातुः सुपुत्राः, सुपुत्र्यः च।

प्राचीनान् कवीन्, आचार्यान्, वैज्ञानिकान्, नीतिविशारदान् अद्य वयं आधुनिकराज्यैः अपि संयोज्य अनेकेषु ऐक्यं भावयामः, गरिमाणम् अनुभवामः। पाटलिपुत्रे अर्थशास्त्रकृत् विष्णुगुप्तः चाणक्यः, आर्यभट्टः, भामहः च; गुजरातराज्ये नागार्जुनः, भरद्वाजः, कणादश्च, मध्यप्रदेशे वराहमिहिरः इत्यादयः वैज्ञानिकाः विज्ञानस्य महत्त्वं प्रसारितवन्तः। काश्मीरेषु आनन्दवर्धनः, अभिनवगुप्तः, क्षेमेन्द्रः, कल्हणः च, एवमन्ये च कविशेखराः, उत्तरप्रदेशे वेदव्यासः, अवन्तिकायाम् उज्जयिन्यां कालिदासः, मध्यप्रदेशे बाणभट्टः, राजशेखरः, धारानगर्यां भोजराजः इत्यादयः महाकवयः अपि भारतमातुः सुपुत्राः संस्कृतसरस्वतीसमाराधका एव। सर्वासु भारतीयासु भाषासु तत्तद्भाषाशब्दजालम्, तत्तद्भाषाव्याकरणसंरचना, तत्तद्भाषासु नवीनशब्दनिर्माणं च संस्कृतभाषाम् अवलम्बते। एतत् अस्माकं सौभाग्यं यत् वयम् अपि भारतमातुः पुत्राः पुत्र्यश्च स्मः, वेदं संस्कृतं पठामः, अभ्यस्यामश्च।

॥ साञ्जलिबन्धं सदा प्रणमामो वयं भारतमातरम् ॥

## शब्दार्थाः

| | |
|---|---|
| तीर्थस्थानम् | पुण्यभूमिः |
| विशालः | बृहत् |
| स्वमतम् | स्वस्य मतम् |
| सुपुत्राः | शोभनाः पुत्राः |
| वैज्ञानिकाः | विज्ञानविदः |
| सौभाग्यम् | कर्मफलम् |
| विश्ववारा | विश्वपूज्या |
| आस्ते | भवति |
| ज्ञानलवलेशः | किञ्चिदपि ज्ञानम् |

| | |
|---|---|
| अभिव्याप्य | व्याप्तीकृत्य |
| अनुसृत्य | अनुसरणं कृत्वा |
| निःश्वसितस्य | निःसृतस्य |
| अनुपमा | अतुलनीया |
| राजते | दीप्यते |
| परस्सहस्रम् | अधिकसहस्राः |
| अलभन्त | प्राप्नुवन् |
| उदधरन् | उद्धारं कृतवन्तः |
| व्यूढोरस्काः | बलवन्तः |
| योद्धारः | युद्धं कुर्वन्ति ये |
| एकीकृत्य | सङ्घटनं कृत्वा |
| गरिमानम् | गौरवम् |
| अवलम्बते | आश्रयते |

## अभ्यासः

### १. उच्चारणं कुरुत -

माता भूमिः पुत्रोऽहं पृथिव्याः, सा नो भूमिर्विसृजतां माता पुत्राय मे पयः, श्रृङ्गगिरिप्रदेशे, वैज्ञानिकाः, व्यूढोरस्काः, परस्सहस्रम्, निःश्वसितस्य, ज्ञानलवलेशः।

### २. प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत -

(क) अस्माकं देशस्य प्रमुखाः आचार्याः के ?

(ख) भारतस्य वीरमहिलानां नामानि लिखत।

(ग) भारतस्य पवित्रनद्यः काः ?

(घ) हिमालये कानि कानि तीर्थस्थानानि सन्ति ?

(ङ) प्रसिद्धाः कवयः के ?

(च) कामाक्षी, मीनाक्षी, शारदा इमा देव्यः कुत्र कुत्र सन्ति ?

(छ) कति वेदाः वर्तन्ते?

(ज) महर्षि-सान्दीपनि-राष्ट्रिय-वेदविद्याप्रतिष्ठानं कुत्र विद्यते?

### ३. रिक्तस्थानं पूरयत -

१. माता ..................... पुत्रोऽहं पृथिव्याः।

२. ..................... ऋतवः सन्ति।

३. ..................... वैज्ञानिका आसन्।

४. तिरुपतिनगरे ..................... विद्यते।

५. वयमपि ..................... पुत्राः स्मः।

### ४. पाठस्य आधारेण एतेषु राज्येषु कः आसीत् इति लिखत -

(क) केरलराज्ये .....................

(ख) कर्णाटकराज्ये .....................

(ग) महाराष्ट्रराज्ये .....................

(घ) तामिलनाडुराज्ये .....................

(ङ) गुजरातराज्ये .....................

(च) आन्ध्रप्रदेशराज्ये .....................

### ५. अधोलिखितवाक्यानि संयोजयत।

| | |
|---|---|
| (क) तमिलनाडुराज्यम् | शङ्कराचार्यः |
| (ख) केरलराज्यम् | शिवाजी |
| (ग) कर्णाटकराज्यम् | रामानुजाचार्यः |
| (घ) महाराष्ट्रम् | मध्वाचार्यः |
| (ङ) मध्यप्रदेशः | वराहमिहिरः |

६. **उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्तकथनानां समक्षं 'न' इति लिखत -**

**यथा - प्राचीनतमा विश्ववारा च संस्कृतिः अस्माकम् अस्ति।** **आम्**

(क) अथर्ववेदे शौनकर्षिः "माता भूमिः पुत्रोऽहं पृथिव्यः" इति नोपदिदेश।

(ख) महर्षि-सान्दीपनि-राष्ट्रिय-वेदविद्या-प्रतिष्ठानं मध्यप्रदेशे विद्यते।

(ग) श्रीसरदारवल्लभाईपटेलः भारतभूप्रदेशम् एकीकृत्य देशे भावैक्यं देशगौरवं च समवर्धयत्।

(घ) महर्षि-वेदव्यासः उत्तरप्रदेशे जन्म अलभत।

(ङ) अर्थशास्त्रकृत् विष्णुगुप्तः चाणक्यः आसीत्।

७. **कोष्ठकात् समुचितं पदं चित्वा रिक्तस्थानं पूरयत -**

(क) वैदिककाले .................... विदुष्यः आसन्। (मैत्रेयी, गार्गी/द्रौपदी/लोपामुद्रा)

(ख) देशेऽस्मिन् .................... तीर्थस्थलानि सन्ति। (बहूनि/एकम्)

(ग) अद्वैतदर्शनस्य उपदेष्टा .................... वर्तते। (रामानुजाचार्यः/शङ्कराचार्यः)

(घ) विशिष्टाद्वैतदर्शनस्य उपदेष्टा .................. अस्ति। (मध्वाचार्यः/रामानुजाचार्यः)

(ङ) द्वैतदर्शनस्य उपदेष्टा .................... विद्यते। (शङ्कराचार्यः/मध्वाचार्यः)

(च) आधुनिकविश्वविद्यालयसदृशानि महन्ति गुरुकुलानि ........................ स्थानेषु आसन्। (तक्षशीला-नालन्दा-वाराणसीमिथिलादयः/गङ्गोत्री-यमुनोत्री-कावेरी-गङ्गा-यमुना इत्यादयः।)

८. **अधोलिखितवाक्येभ्यः कर्ता, कर्म, तयोः विभक्तीः तथा क्रियापदानि पृथक्कृत्वा लिखत।**

(क) वयं सर्वे भारतीयाः स्म।

(ख) वयं वेदं पठेम।

(ग) श्रीकृष्णः गुरोः सन्निधौ चतुष्षष्टेः कलानाम् अध्ययनम् अकरोत्।

(घ) प्राक् महान्ति गुरुकुलानि आसन्।

(ङ) भक्ताः नद्यां स्नात्वा देवानां दर्शनं कुर्वन्ति।

(च) भारतमातुः सुपुत्रैः सुपुत्रीभिश्च देशसेवा अक्रियत।

९. **महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानं वेदशास्त्रस्य संरक्षणार्थं संवर्धनार्थञ्च कानि कानि कार्याणि सम्पादयति इति लिखत -**

१. ...............................................................।

२. ...............................................................।

३. ...............................................................।

४. ...............................................................।

५. ...............................................................।

## योग्यताविस्तारः

अस्माकं देशे एकोनत्रिंशत् (२९) प्रदेशाः वर्त्तन्ते।

चत्वारः वेदाः - ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः।

उत्तरदिशि हिमालयस्य शृङ्गारपूर्वकं वसन्तः, ग्रीष्मः, वर्षा, हेमन्तः, शिशिरः, शीतश्चैते षड् ऋतवः यथासमयम् आगत्य अस्य शोभाम् अभिवर्धयन्ति।

“माता भूमिः पुत्रोऽहं पृथिव्याः” इयमेव भूमिः अस्माकं माता, वयम् अस्याः पुत्राः।

अस्माकं देशे विविधधर्मावलम्बिनः सम्प्रदायिनः निवसन्ति। यथा - सनातनानुयायिनः (हिन्दवः), सिखाः, बौद्धाः, जैनाः, यवनाः, क्रैस्तवाः इत्यादयः।

**केन्द्रशासितप्रदेशाः -** १. देहली २. अण्डमान्-निकोबर-द्वीपसमूहः ३. चण्डीगडः ४. दादरा-नगरहवेली ५. दमन-दीवौ ६. लाक्षाद्वीपः ७. पुदुचेरी ८. जम्मूकश्मीरौ ९. लद्दाखः

# द्वादशः पाठः

# नमस्त्रिमूर्तये तुभ्यम्

संस्कृतसाहित्यजगति अन्यतमः प्रतिभावान् महाकविः कालिदासः। असौ कविकुलगुरुः इत्युपधिना प्रसिद्धः। संस्कृतजगति तथा कोऽपि नास्ति येन प्रथितयशसः अस्य कालिदासस्य नाम न श्रुतम्। कालिदासः इत्यनेन न केवलं व्यक्तिः द्योत्यते अपितु प्राचीनभारतीयसंस्कृतेः सुवर्णयुगं द्योत्यते। प्रस्तुतः पाठोऽयं महाकविकालिदासप्रणीतस्य कुमारसम्भवस्य द्वितीयसर्गात् केचन श्लोकाः सङ्गृहीताः। कुमारसम्भवमहाकाव्ये सप्तदश (१७) सर्गाः सन्ति।



**तस्मिन् विप्रकृताः काले तारकेण दिवौकसः।**
**तुरासाहं पुरोधाय धाम स्वायंभुवं ययुः॥ १॥**

**अन्वयः -** तस्मिन् काले तारकेण विप्रकृताः दिवौकसः तुरासाहं पुरोधाय स्वायंभुवं धाम ययुः।

**भावार्थः -** पार्वतीसुश्रूषाकाले तारकेण वज्राङ्गतनयेनासुरेण उपद्रुताः सन्तः दिवौकसः देवाः तुरासाहम् इन्द्रं पुरोधाय अग्रेकृत्य स्वायंभुवं ब्रह्मलोकं जग्मुः।

**तेषामाविरभूद् ब्रह्मा परिम्लानमुखश्रियाम्।**
**सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव॥ २॥**

**अन्वयः-** परिम्लानमुखश्रियां तेषां ब्रह्मा सुप्तपद्मानां सरसां प्रातः दीधितिमान् इव आविरभूत्।

**भावार्थः -** तारकविप्रकृतत्वात् परिम्लानमुखश्रियां नष्टवक्त्रकान्तीनां तेषां देवानां विरिञ्चिः सुप्तपद्मानां संकुचितारविन्दानां तोयाशयानां प्रभाते रविराविर्भवतीव ।

**अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम्।**

**वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे॥३॥**

**अन्वयः -** अथ ते सर्वे सर्वतोमुखं वागीशं सर्वस्य धातारं प्रणिपत्य अर्थ्याभिः वाग्भिः उपतस्थिरे।

**भावार्थः -** आविर्भावानन्तरं ते सर्वे देवाः सर्वतोमुखं चतुर्मुखं विद्यानामीशं सर्वस्य जगतः स्रष्टारं ब्रह्माणं नमस्कृत्य अर्थयुक्ताभिः गीर्भिः उपतस्थिरे स्तुतिमारभत।

**नमस्त्रिमूर्त्तये तुभ्यं प्राक्सृष्टेः केवलात्मने।**

**गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे॥४॥**

**अन्वयः -** हे भगवन् ! सृष्टेः प्राक् केवलात्मने पश्चाद् गुणत्रयविभागाय भेदम् उपेयुषे त्रिमूर्तये तुभ्यं नमः।

**भावार्थः -** हे भगवन्! सृष्टेः प्राक् केवलात्मने अभिन्नरूपाय पश्चात् सृष्टिप्रवृत्तिकाले सत्त्वरजस्तमोलक्षणस्य विभागाय भेदं प्राप्तवते त्रिमूर्तये ब्रह्मविष्णुरुद्ररूपिणे तुभ्यं नमः ।

**यदमोघमपामन्तरुप्तं बीजमज त्वया।**

**अतश्चराचरं विश्वं प्रभवस्तस्य गीयसे॥५॥**

**अन्वयः -** हे अज ! अपामन्तः त्वया यद् अमोघं बीजमुप्तम्, अतः चराचरं विश्वं (जातम्), तस्य प्रभवः गीयसे।

**भावार्थः -** हे अज ! सनातनस्वरूप ! यत् त्वया तोयमध्ये अमोघम् अबन्ध्यं कार्यजनकं बीजं वीर्यम् उप्तं प्रक्षिप्तम्, अतः बीजात् चराचरं स्थावरजङ्गात्मकं विश्वं जातम्। अतः तस्य विश्वस्य त्वं प्रभवः कारणं गीयसे मुनिभिरुच्यते।

**तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन्।**

**प्रलयस्थितिसर्गाणामेकः कारणतां गतः॥६॥**

**अन्वयः -** एकः त्वं तिसृभिः अवस्थाभिः महिमानम् उदीरयन् प्रलयस्थितिसर्गाणां कारणतां गतः।

**भावार्थः -** एकः सृष्टेः प्राक् केवलः त्वमेकमेव तिसृभिः अवस्थाभिः त्रैगुण्यमयीभिः हरिहरब्रह्मरूपाभिः दशभिः माहात्म्यं कथयन् प्रलयस्य स्थितेः उत्पत्तेः संहाररक्षासृष्टीनां कारणतां निदानत्वं प्राप्तः।

**स्त्रीपुंसावात्मभागौ ते भिन्नमूर्तेः सिसृक्षया।**
**प्रसूतिभाजः सर्गस्य तावेव पितरौ स्मृतौ॥७॥**

**अन्वयः -** सिसृक्षया भिन्नमूर्तेः ते स्त्रीपुंसौ आत्मभागौ स्तः। तौ एव प्रसूतिभाजः सर्गस्य पितरौ स्मृतौ।

**भावार्थः -** यदा भगवता स्त्रष्टुमिच्छया द्विविधाकृतवपुषः तौ एव प्रसूतिभाजौ (उत्पत्तिभाजः) योनिजस्य सरलकारणभूतस्य सृष्टेः मातापितरौ स्मृतौ उक्तौ।

**स्वकालपरिमाणेन व्यस्तरात्रिन्दिवस्य ते।**
**यौ तु स्वप्नावबोधौ तौ भूतानां प्रलयोदयौ॥८॥**

**अन्वयः -** स्वकालपरिमाणेन व्यस्तरात्रिन्दिवसस्य ते यौ तु स्वप्नावबोधौ तौ एव भूतानां प्रलयोदयौ स्तः।

**भावार्थः -** स्वकालपरिमाणेन निजसमयमानेन व्यक्तं विभागीकृतं, रात्रिन्दिवम् दिवानिशं येन तस्य, ते तव यौ तु स्वप्नावबोधौ तावेव भूतानां प्रलयोदयौ विनाशाविभावौ स्तः।

**जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः।**
**जगदादिरनादिस्त्वं जगदीशो निरीश्वरः॥९॥**

**अन्वयः -** हे भगवन् ! त्वं जगद्योनिः (किन्तु स्वयम्) अयोनिः, जगदन्तः (किन्तु स्वयम्) निरन्तकः, त्वं जगदादिः (किन्तु स्वयम्) अनादिः, त्वं जगदीशः स्वयं निरीश्वरः असि।

**भावार्थः -** हे भगवन् ! त्वं जगद्योनिः जगत्कारणं तव तु न कश्चिद् योनिरजत्वात्, तथा त्वं रुद्ररूपेण संहारात् विश्वस्यान्तकः (जगदन्तः), किन्तु स्वयं निरन्तकः नित्यत्वादन्तरहितः, तथा त्वं जगदादिः, त्वं पुराणपुरुषत्वात्, किन्तु स्वयम् आदिरहितः, त्वं जगतामीशः नियन्ता, स्वयं निरीश्वरः, तव तु न कश्चिदीश्वरः परिपूर्णत्वात् इत्यर्थः।

**उद्घातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम्।**
**कर्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिराम्॥१०॥**

**अन्वयः -** हे भगवन् ! यासां गिराम् उद्घातः प्रणवः यासां त्रिभिः न्यायैरुदीरणम्, यासां कर्म यज्ञः। फलं स्वर्गः तासां गिरां प्रभवः असि।

**भावार्थः -** हे भगवन् ! यासां गिरां वाचाम् उद्घातः उत्पत्तिस्थानं प्रणवः ओङ्कारात्मकः उद्गीथाख्यः, यासाञ्च त्रिभिः न्यायैः व्यवस्थाभिः तारमन्द्रमध्यैः उदात्तानुदात्तस्वरितैर्वा, यासां कर्म यज्ञः ज्योतिष्टोमादिरिति, फलं स्वर्गः, तासां श्रुतीनां गिरां वेदानां प्रभवः कारणम् असि।

**त्वमेव हव्यं होता च भोज्यं भोक्ता च शाश्वतः।**
**वेद्यं च वेदिता चासि ध्याता ध्येयं च यत्परम्॥ ११ ॥**

**अन्वयः -** हे भगवन् ! शाश्वतः त्वमेव हव्यं होता चासि। भोज्यं भोक्ता चासि, वेद्यं वेदिता चासि, ध्याता यच्च परं ध्येयं तच्चासि।

**भावार्थः -** हे भगवन् ! शाश्वतः अनीश्वरः त्वमेव हव्यं जुहोति, यश्च होता यजमानश्चासि, विधिवद् भुङ्क्ते, यश्च भोज्यं भुज्यते यः अभ्यवहार्यमन्नं चासि, वेत्ति यच्च वेदिता गेयं चासि, यः ध्याता यच्च परमुत्कृष्टं ध्येयं तत् सर्वात्मकं त्वमेव ब्रह्म इति।

## शब्दार्थाः

| | |
|---|---|
| दिवौकसः | देवाः |
| विप्रकृताः | उपप्लुताः |
| पुरोधाय | अग्रेकृत्य |
| परिम्लानमुखश्रियाम् | नष्टवक्त्रकान्तीनाम् |
| दीधितिमान् | दीप्तिमान् |
| उपतस्थिरे | उपातिष्ठन्त |
| उपेयुषे | प्राप्तवते |
| अमोघम् | अबन्ध्यम् |
| उप्तम् | रोपितम् |
| सिसृक्षया | स्रष्टुमिच्छया |
| प्रसूतिभाजः | उत्पत्तिभाजः |
| स्वप्नावबोधौ | संहारसर्गौ |

| | |
|---|---|
| निरन्तकः | अन्तरहितः |
| उद्घातः | उत्पत्तिस्थानम् |
| उदीरणम् | उच्चारणम् |
| वेदिता | ज्ञापयिता |

## अभ्यासः

### १. उच्चारणं कुरुत -

परिम्लानमुखश्रियाम्, सुप्तपद्मानाम्, दीधितिमान्, उपतस्थिरे, गुणत्रयविभागाय, त्रिमूर्तये, प्रलयस्थितिसर्गाणाम्, सिसृक्षया, प्रसूतिभाजः, व्यस्तरात्रिन्दिवस्य, स्वप्नावबोधौ, प्रलयोदयौ, जगद्योनिः।

### २. अधोलिखितानां प्रश्नानाम् एकपदेन उत्तराणि लिखत -

(क) कुमारसम्भवमहाकाव्यस्य रचयिता कः ?

(ख) कुमारसम्भवमहाकाव्ये कति सर्गाः सन्ति ?

(ग) चतुर्मुखः कः ?

(घ) कं वागीशं मन्यते ?

(ङ) कुमारसम्भवमहाकाव्ये 'कुमार' इति शब्दस्य कोऽर्थः ?

### ३. पूर्णवाक्येन उत्तरं लिखत -

(क) तिस्रः मूर्त्तयः काः ?

(ख) चराचरं विश्वं कस्य प्रभवः गीयसे ?

(ग) प्रलयस्थितिसर्गाणां कारणतां कः गतः ?

(घ) जगद्योनिः का ?

(ङ) ते सर्वे कं प्रणिपत्य अर्थ्याभिः वाग्भिः उपतस्थिरे ?

### ४. रिक्तस्थानानि पूरयत -

(क) जगद्योनिरयोनिस्त्वं ..............................................।

.............................................. निरीश्वरः॥

(ख) त्वमेव .................................................. ।

............................................ ध्येयञ्च यत्परम् ।।

(ग) उद्घातः प्रणवो ............................................।

............................................ प्रभवो गिराम्॥

(घ) स्वकालपरिमाणेन ........................................... ।

................................................ प्रलयोदयौ ॥

(ङ) नमस्त्रिमूर्त्तये ..................................... ।

................................................ पश्चाद्भेदमुपेयुषे ॥

## ५. समुचितमेलनं कुरुत -

| | |
|---|---|
| (क) तेषामाविरभूद् ब्रह्मा | कारणतां गतः |
| (ख) नमस्त्रिमूर्तये तुभ्यं | पश्चाद्भेदमुपेयुषे |
| (ग) गुणत्रयविभागाय | प्राक्सृष्टेः केवलात्मने |
| (घ) प्रलयस्थितिसर्गाणामेकः | परिम्लानमुखश्रियाम् |

## ६. अधोलिखितानां श्लोकानाम् अर्थम् मातृभाषया/आंग्लभाषया/संस्कृतभाषया लिखत -

(क) नमस्त्रिमूर्त्तये तुभ्यं प्राक्सृष्टेः केवलात्मने।
गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे॥

(ख) स्त्रीपुंसावात्मभागौ ते भिन्नमूर्तेः सिसृक्षया।
प्रसूतिभाजः सर्गस्य तावेव पितरौ स्मृतौ॥

## ७. अधोलिखितां शब्दानां रूपाणि लिखत -

(क) तद्-शब्दस्य पुँल्लिङ्गे रूपाणि लिखत।

(ख) त्रि-शब्दस्य त्रिषु लिङ्गेषु रूपाणि लिखत।

(ग) पितृ-शब्दस्य रूपाणि लिखत।

(घ) युष्मद्-शब्दस्य रूपाणि लिखत।

(ङ) आत्मन्-शब्दस्य रूपाणि लिखत।

८. समासनामोल्लेखपूर्वकं विग्रहवाक्यं लिखित -

| | | विग्रहवाक्यम् | समासनाम |
|---|---|---|---|
| (क) | सर्वतोमुखम् | ................................. | ...................... |
| (ख) | वागीशम् | ................................. | ...................... |
| (ग) | त्रिमूर्त्तये | ................................. | ...................... |
| (घ) | चराचरम् | ................................. | ...................... |
| (ङ) | प्रलयस्थितिसर्गाणाम् | ................................. | ...................... |
| (च) | जगद्योनिः | ................................. | ...................... |
| (छ) | जगदीशः | ................................. | ...................... |

९. सन्धिविच्छेदपूर्वकं सन्धिसूत्राणि लिखत -

| | | सन्धिविच्छेदः | सन्धिसूत्राणि |
|---|---|---|---|
| (क) | कोऽपि | ................ + ................ | ................ |
| (ख) | इत्यनेन | ................ + ............... | ................ |
| (ग) | वागीशम् | ................ + ................ | ................ |
| (घ) | चराचरम् | ................ + ................ | ................ |
| (ङ) | तावेव | ................ + ................ | ................ |

## योग्यता-विस्तारः

## कविपरिचयः

### कविकुलगुरुः

कालिदासः 'कविकुलगुरुः' इति प्रसिद्धः। अनेन रचिताः सप्त ग्रन्थाः सन्ति। यथा - 'रघुवंशम्, कुमारसम्भवम्' इति महाकाव्यद्वयम्, 'ऋतुसंहारः', 'मेघदूतम्' इति खण्डकाव्यद्वयम्, 'मालविकाग्निमित्रम्', 'विक्रमोर्वशीयम्', अभिज्ञानशाकुन्तलम् इति त्रीणि नाटकानि च।

### देशः

कालिदासस्य देश-कालयोः विषये विदुषां नैकं मतं विद्यते। परं महाकविना मेघदूते 'उज्जयिनी' श्रीविशाला वा इति विशेषरूपेण वर्णिता। अतः 'कालिदासः' उज्जयिनीनिवासी आसीत् इति विदुषां मतं वर्तते।

### कालः

प्रायः मन्यते यत् कालिदासः उज्जयिनीनरेशस्य विक्रमादित्यस्य नवरत्नेषु श्रेष्ठः आसीत्। विक्रमसंवत्-प्रवर्तकस्य विक्रमादित्यस्य राज्याभिषेककालः ईशातः पूर्वम् ५७ वर्षाणि मन्यते। अतः कालिदासस्य कालः ई.पू. प्रथमशताब्दी इति निश्चितः भवति।

## कृतिपरिचयः

### कुमारसम्भवम्

प्रस्तुतपाठः अस्मादेव महाकाव्यात् उद्धृतः। अस्मिन् महाकाव्ये सप्तदश (१७) सर्गाः सन्ति। तत्र हिमालयवर्णनम्, पार्वतीविवाहः, कुमारजन्म, तारकासुरवधः च मुख्यकथाः अन्यास्तु प्रासङ्गिककथाः सन्ति।

### रघुवंशम्

अस्मिन् महाकाव्ये एकोनविंशतिः (१९) सर्गाः सन्ति। दिलीपतः अग्निवर्णपर्यन्तं राज्ञां वर्णनं विद्यते। इयम् उत्कृष्टरचना कालिदासस्य।

### ऋतुसंहारम्

इयं कालिदासस्य प्रथमा कृतिः। अत्र षण्णाम् ऋतूनां सरलं, सरसं, मनोरमं च वर्णनं विद्यते। इह षट् सर्गाः सन्ति।

### मेघदूतम्

प्राकृतिकसौन्दर्येण मानसिकभावोद्गाराणां अभिव्यक्तिः। शापवशात् विरहाकुलस्य यक्षस्य स्वप्रियां प्रति प्रेषितः भावपूर्णः सन्देशः अस्ति।

## मालविकाग्निमित्रम्

नाटकेऽस्मिन् विदिशायाः नृपस्य अग्निमित्रस्य विदर्भस्य च राजकुमार्याः मालविकायाः प्रणयकथा अस्ति। नाटके पञ्च अङ्कास्सन्ति।

## विक्रमोर्वशीयम्

नाटकेऽस्मिन् पञ्च अङ्काः सन्ति। नाटके राज्ञः पुरूरवसः अप्सरसः उर्वश्याः च प्रेमकथानकम् अस्ति ।

## अभिज्ञानशाकुन्तलम्

नाटके सप्ताङ्काः सन्ति। अस्मिन्नाटके राज्ञः दुष्यन्तस्य शकुन्तलायाः च प्रणयकथायाः मनोहारि चित्रणमस्ति। 'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला' इति प्रसिद्धिः।

# त्रयोदशः पाठः

## प्रयोगपरिचयः, लट्-लङ्-लोटः

प्रयोगः त्रिविधः कर्तरि, कर्मणि, भावे चेति। सकर्मकधातूनां कर्तरि कर्मणि च प्रयोगो भवति। यथा -

बालः पाठं पठति। (कर्तरि) बालेन पाठः पठ्यते। (कर्मणि)

अकर्मकधातूनां कर्तरि, भावे च प्रयोगो भवति।

यथा -

बालः हसति। (कर्तरि) बालेन हस्यते। (भावे)

**लः कर्मणि च भावे चाकर्मकेभ्यः (३.४.६०)**

**वृत्तिः** - लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि च।

### १. कर्तरि प्रयोगः

**नियमाः -**

- अस्मिन् कर्तृपदार्थस्य प्राधान्यम्भवति।
- कर्तृपदं प्रथमाविभक्त्यन्तं भवति।
- कर्मपदं द्वितीयाविभक्त्यन्तं भवति।
- क्रियापदं कर्तृपदस्य पुरुषं वचनं च अनुसरति।

यथा -

| **कर्तृपदम्** | **कर्मपदम्** | **क्रियापदम्** |
|---|---|---|
| बालकः | पाठं | पठति |
| शिशुः | कपीन् | पश्यति |
| माता | जलम् | आनयति |
| राणाप्रतापः | प्रतिज्ञां | करोति |

### २. कर्मणि प्रयोगः

**नियमाः -**

- अत्र कर्मपदार्थस्य प्राधान्यम्।
- कर्मणि प्रयोगे कर्तृपदं तृतीयाविभक्त्यन्तं भवति।
- कर्मपदं प्रथमाविभक्त्यन्तं भवति।
- क्रियापदं कर्मपदस्य लिङ्गं वचनं च अनुसरति ।
- आत्मनेपदान्तमेव क्रियापदं भवति।
- मूलधातुना सह 'य' इति योज्यते।

यस्याः क्रियायाः कर्माकाङ्क्षा भवति तादृशक्रियावाचकः धातुः सकर्मकः। अयं प्रयोगः सकर्मकधातूनामेव सम्भवति। यथा -

| **कर्तृपदम्** | **कर्मपदम्** | **क्रियापदम्** |
|---|---|---|
| बालकेन | पाठः | पठ्यते (पठ्+य+ते) |
| बालकेन | पाठौ | पठ्येते |
| बालकेन | पाठाः | पठ्यन्ते |

## ३. भावेप्रयोगः

- अत्र भावस्यैव (धात्वर्थस्यैव) प्राधान्यं भवति।
- अस्मिन् कर्तृपदं तृतीयाविभक्त्यन्तं भवति।
- कर्मपदं न सम्भवति।
- क्रियापदं सर्वदा आत्मनेपदिनि प्रथमपुरुषे एकवचने भवति।

अयं प्रयोगः अकर्मकधातूनामेव सम्भवति। भावो नाम शुद्धो धात्वर्थः।

**यथा - छात्रेण धाव्यते**

| प्रयोगः | कर्तृपदम् | कर्मपदम् | क्रियापदम् | प्राधान्यम् |
|---|---|---|---|---|
| कर्तरि | प्रथमान्तम् | द्वितीयान्तम् | कर्तृपदानुसारम् | कर्तृपदार्थस्य |
| कर्मणि | तृतीयान्तम् | प्रथमान्तम् | कर्मपदानुसारम्(आत्मनेपदी) | कर्मपदार्थस्य |
| भावे | तृतीयान्तम् | न भवति | आत्मनेपदिनि, प्रथमपुरुषैकवचने | धात्वर्थस्य भावस्य |

| कर्तरिप्रयोगः | | |
|---|---|---|
| कर्तृपदम् | कर्मपदम् | क्रियापदम् |

| कर्मणिप्रयोगः | | |
|---|---|---|
| कर्तृपदम् | कर्मपदम् | क्रियापदम् |

| | | | | | | |
|---|---|---|---|---|---|---|
| रामः | प्रश्नं | लिखति | | रामेण | प्रश्नः | लिख्यते |
| सीता | वीणां | वादयति | | सीतया | वीणा | वाद्यते |
| गौरी | घटं | नयति | | गौर्या | घटः | नीयते |
| एषः | अश्वं | पश्यति | | एतेन | अश्वः | दृश्यते |
| सः | मां | पश्यति | | तेन | अहं | दृश्ये |
| सा | गीतां | वाचयति | | तया | गीता | उच्यते |
| त्वं | महादेवं | नमसि | | त्वया | महादेवः | नम्यते |
| अहं | पाठं | पठामि | | मया | पाठः | पठ्यते |
| राजा | राक्षसं | प्रबोधितवान् | | राज्ञा | राक्षसः | प्रबोधितः |
| कश्यपः | तान् | प्रेषितवान् | | कश्यपेन | ते | प्रेषिताः |

| कर्तरि प्रयोगः | भावे प्रयोगः |
|---|---|
| सूर्यः प्रकाशते । | सूर्येण प्रकाश्यते। |
| शिशुः स्वपिति । | शिशुना सुप्यते। |
| मयूरः नृत्यति । | मयूरेण नृत्यते । |
| अहं अस्मि । | मया भूयते । |
| बालिकाः हसन्ति । | बालिकाभिः हस्यते । |

आज्ञाद्यर्थेषु वर्तमानभूतभविष्यत्कालेषु प्रयोगपरिवर्तनम्। यथा -

| प्रयोगाः | वर्तमानकालः (लट्) | भूतकालः (लङ्) | भविष्यत्कालः (लृट्) | आज्ञा (लोट्) |
|---|---|---|---|---|
| कर्तरि | छात्रः पाठं पठति। | छात्रः पाठम् अपठत्। | छात्रः पाठं पठिष्यति । | छात्रः पाठम् पठतु । |
| | भक्तः देवं वन्दते। | भक्तः देवम् अवन्दत। | भक्तः देवम् वन्दिष्यते । | भक्तः देवं वन्दताम् । |
| | रामः हसति। | रामः अहसत्। | रामः हसिष्यति। | रामः हसन्तु । |
| कर्मणि | छात्रेण पाठः पठ्यते । | छात्रेण पाठः अपठ्यत। | छात्रेण पाठः पठिष्यते । | छात्रेण पाठः पठ्यताम् । |

| | | | | |
|---|---|---|---|---|
| | भक्तेन देवः वन्द्यते । | भक्तेन देवः अवन्द्यत । | भक्तेन देवः वन्दिष्यते । | भक्तेन देवः वन्द्यताम् । |
| भावे | रामेण हस्यते। | रामेण अहस्यत। | रामेण हसिष्यते। | रामेण हस्यताम्। |

## शब्दार्थाः

| | |
|---|---|
| त्रिविधः | त्रिप्रकारकः |
| अकर्मकः | न कर्म विद्यते यस्य |
| सकर्मकः | यस्य कर्म विद्यते |
| अनुसरति | अनुसरणं करोति |
| कर्माकाङ्क्षा | कर्मणः आकाङ्क्षा |
| धात्वर्थः | धातोः अर्थः |

## अभ्यासः

१. **उच्चारणं कुरुत -**

विभक्त्यन्तम्, धात्वर्थः, बोधितवान्, स्वपिति, परस्मैपदी, आत्मनेपदी, कर्मणि, कर्तरि।

२. **संस्कृतभाषायाम् उत्तराणि लिखत -**

(क) संस्कृतभाषायां कति प्रयोगाः सन्ति, ते च के ?

(ख) कस्मिन् प्रयोगे कर्मपदं प्रथमाविभक्तौ भवति ?

(ग) भावेप्रयोगे कर्तृपदं कस्यां विभक्तौ भवति ?

(घ) कस्मिन् प्रयोगे क्रियापदं नित्यं प्रथमपुरुषैकवचने भवति ?

(ङ) कर्तरि प्रयोगे कर्मपदस्य का विभक्तिः भवति ?

३. **द्वित्रैः वाक्यैः उत्तरं लिखत -**

(क) कर्तरिप्रयोगस्य नियमं सोदाहरणं विवृणुत ।

(ख) भावेप्रयोगस्य नियमः कः ?

(ग) कर्मणिप्रयोगस्य नियमः कः ?

## ४. प्रयोगपरिवर्तनं कुरुत -

(क) बालिकाः धावन्ति ।

(ख) हरिः श्लोकान् पठति ।

(ग) छात्रैः गुरवः नम्यन्ते ।

(घ) पुष्पाणि विकसन्ति ।

(ङ) अस्माभिः कथाः लिख्यन्ते ।

(च) यूयं कदलीफलं खादथ ।

(छ) गणेशः चित्रम् आलिखति ।

(ज) अहं गुरुं नमामि ।

(झ) राधा पाठं पठति ।

## ५. अधोलिखितानि क्रियापदानि अकर्मकं सकर्मकम् इति पृथक् कुरुत -

| अकर्मकम् | | सकर्मकम् |
|---|---|---|
| ................ | वर्धते, वन्दते, पठति, | ................ |
| ................ | पृच्छति, शोभते, हसति, | ................ |
| ................ | भवति, लिखति, धावति, | ................ |
| ................ | खादति, कम्पते | ................ |
| ................ | | ................ |
| ................ | | ................ |

## ६. रिक्तस्थानं पूरयत

(क) .................... धातुभ्यः कर्तरि भावे च प्रयोगौ भवतः ।

(ख) भावेप्रयोगे कतृपदं .................... विभक्त्यन्तं भवति ।

(ग) यस्याः क्रियायाः कर्माकांक्षा भवति तादृशः क्रियावाचकः धातुः.............।

(घ) ............ अकर्मकधातूनामेव सम्भवति।

(ङ) कर्मणिप्रयोगे कर्म ............ भवति।

## ७. शुद्धं पदं चित्वा शुन्यस्थानं पूरयत -

(क) कश्यपेन ते ..........। (प्रेषितम्/प्रेषिताः/प्रेषिता)

(ख) कर्तरिप्रयोगे कर्तृपदं ............. भवति। (प्रथमाविभक्तौ/तृतीयाविभक्तौ/द्वितीयाविभक्तौ)

(ग) ........... क्रियापदं सर्वदा आत्मनेपदिनि प्रथपुरुषे एकवचने भवति।

(भावेप्रयोगे/कर्मणिप्रयोगे/कर्तरिप्रयोगे)

(घ) ज्योतिर्मय्या ............ वीणा। (वाद्येते/वाद्यते/वाद्यन्ते)

(ङ) कर्तरिप्रयोगे क्रियापदं ............ अनुसरति। (कर्मपदम्/कर्तृपदम्/उभयपदम्)

## योग्यता-विस्तारः

धातुः यदा सकर्मकः तदा कर्तरि कर्मणि च प्रयोगौ सम्भवतः। धातुः यदि अकर्मकः तर्हि कर्तरि भावे च प्रयोगौ सम्भवतः । यथा -

| कर्तरिप्रयोगः | कर्मणिप्रयोगः | भावेप्रयोगः |
|---|---|---|
| रामः फलं खादति । | रामेण फलं खाद्यते । | |
| गोपालः गुरुं नमति । | गोपालेन गुरुः नम्यते । | |
| छात्राः पाठान् पठन्ति । | छात्रैः पाठाः पठ्यन्ते । | |
| सः तिष्ठति । | | तेन स्थीयते । |
| सा शेते। | | तया शय्यते । |
| अश्वाः धावन्ति । | | अश्वैः धाव्यते । |

**लज्जा-सत्ता-स्थिति-जागरणं वृद्धि-क्षय-भय-जीवित-मरणम्।**
**शयन-क्रीडा-रुचि-दीप्त्यर्थं धातुगणं तेऽकर्मकमाहुः॥**

उपर्युक्ते श्लोके येऽर्था उक्ताः, तदर्थकाः धातवः अकर्मकाः भवन्ति । यथा - लज्जार्थकाः - लज्ज् (लज्जते), ह्री (जिह्रेति)। सत्तार्थकाः - भू, अस्, विद्, वृतु। स्थित्यर्थकाः - स्था, जागरणार्थकाः - जागृ, वृद्ध्यर्थकाः - वृध् (वर्धते), एध् (एधते), प्याय् (प्यायते) क्षयार्थकाः - क्षि (क्षयति), भयार्थकाः - भी (बिभेति), जीवनार्थकाः - जीव् (जीवति), अन् (अनिति),

मरणार्थकाः - मृङ् (म्रियते), शयनार्थकाः - शीङ् (शेते), स्वप् (स्वपिति), सस् (सस्ति), नि-द्रा (निद्राति), क्रीडार्थकाः - क्रीड्, खेल्, रम् (रमते), रुच्यर्थकाः - रुच् (रोचते), दीप्त्यर्थकाः - दीप् (दीप्यते), ज्वल् (ज्वलति)

**विशेषः -** कृदन्तपदानां प्रयोगे अपि प्रयोगपरिवर्तनं भवति।

**'प्रयोगाः पञ्चविधाः'**

कर्तृकर्मक्रियायुक्तः प्रयोगः स्यात्सकर्मकः।
अकर्मकः कर्मशून्यः कर्मद्वन्द्वो द्विकर्मकः॥
सकर्मकप्रयोगो यथा - कृष्णो भक्तान् रक्षति।
अकर्मकप्रयोगो यथा - कृष्णस्तिष्ठति।
कर्मणिप्रयोगो यथा - कृष्णेन क्रियते।
भावेप्रयोगो यथा - कृष्णेन भूयते।
द्विकर्मकप्रयोगो यथा - नृपो धराम् अन्नं दुदोह।
आदौ कर्तृपदं वाच्यं द्वितीयादिपदं ततः।
त्त्वातुमुन्ल्यप्च मध्ये कुर्यादन्ते क्रियापदम्॥
यस्मिन्नर्थे विधीयन्ते त्यादितव्यादितद्धिताः।
समासो वा भवेद्यत्र स उक्तः प्रथमा ततः॥

'पठँ व्यात्तायां वाचि', कर्मणि, लट्-लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | पठ्यते | पठ्येते | पठ्यन्ते |
| **मध्यमपुरुषः** | पठ्यसे | पठ्येथे | पठ्यध्वे |
| **उत्तमपुरुषः** | पठ्ये | पठ्यावहे | पठ्यामहे |

'गम्लृ गतौ', कर्मणि, लोट्-लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | गम्यताम् | गम्येताम् | गम्यन्ताम् |
| **मध्यमपुरुषः** | गम्यस्व | गम्येथाम् | गम्यध्वम् |
| **उत्तमपुरुषः** | गम्यै | गम्यावहै | गम्यामहै |

'डुकृञ् करणे', कर्मणि, लङ्-लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अक्रियत | अक्रियेताम् | अक्रियन्त |
| **मध्यमपुरुषः** | अक्रियथाः | अक्रियेथाम् | अक्रियध्वम् |
| **उत्तमपुरुषः** | अक्रिये | अक्रियावहि | अक्रियामहि |

# चतुर्दशः पाठः

## मन्त्रद्रष्टारः ऋषयः

वैदिकवाङ्मये, संस्कृतवाङ्मये च ऋषीणां महत्त्वपूर्णं स्थानं वर्तते। केषाञ्चन प्रसिद्धर्षीणां वर्णनम् अत्र उपस्थाप्यते -

तद्यथा -

**कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः।**

**जमदग्निर्वसिष्ठश्च इति सप्तर्षयः स्मृताः॥**

वशिष्ठ-भरद्वाज-विश्वामित्र-गौतम-अत्रि-कश्यप-जमदग्नयः एते सप्त ऋषयः।

भारतीयपरम्परायां श्रुतिग्रन्थानां (वेदमन्त्राणां) यथावत् दर्शनं कृतम्, अतः ते ऋषयो मन्त्राणां द्रष्टारः कथ्यन्ते।

**ऋषयो मन्त्रद्रष्टारः।**

मन्त्रद्रष्टारः ऋषयः तपोबलेन विलक्षणैकाग्रताबलेन ध्यानेन च विलक्षणशब्दान् सम्यक्तया ज्ञातुं समर्थाः भवन्ति। तथा च प्राणिनां जनानां च कल्याणार्थं शब्दान् विलिख्य प्रकटितवन्तः इति।

**ऋषयस्तु मन्त्रद्रष्टारो न तु रचयितारः।**

ऋषति प्राप्नोति सर्वान् मन्त्रान् ज्ञानेन पश्यति संसारपारं वा इत्यस्मिन् अर्थे ऋष् धातोः ‘इगुपधात् कित्’ इति उणादिसूत्रेण इन्-प्रत्यये ऋषिशब्दो निष्पद्यते। ऋषिभिः प्रकाशितग्रन्थाः आर्षग्रन्थेन ज्ञायन्ते।

### वशिष्ठः -

वशिष्ठो वैदिककालस्य अन्यतमः ऋषिः आसीत्। महर्षिवशिष्ठस्य पत्नी अरुन्धती आसीत्। महर्षिवशिष्ठः अयोध्यायाः राज्ञः दशरथस्य कुलगुरुः बभूव। महर्षिवशिष्ठो ब्रह्मणः मानसपुत्रो बभूव। त्रिकालज्ञः, तत्त्वदर्शी, क्षमाशीलः, उदारचरितः, तपोनिष्ठः, ब्रह्मनिष्ठः, सत्यवादी, परमविवेकी, ज्ञानवान् चैष बभूव। त्रेतायुगस्यान्ते स ब्रह्मलोकं प्रतिजगाम।

**भरद्वाजः -**

महर्षिभरद्वाजः ऋग्वेदस्य षष्ठमण्डलस्य द्रष्टा बभूव। मण्डलेऽस्मिन् भरद्वाजरचिताः सप्तशतोत्तरपञ्चषष्टिः (७६५) मन्त्राः सन्ति। अथर्ववेदे अपि महर्षिभरद्वाजस्य त्रयोविंशतिः (२३) मन्त्राः प्राप्यन्ते। वैदिकर्षीणां मध्ये महर्षिभरद्वाजो विशिष्टं स्थानं भजते। भरद्वाजस्य पितुः नाम बृहस्पतिः तथा मातुः नाम ममता आसीत्। भारद्वाजस्मृतिं भारद्वाजसंहिताञ्च महर्षिभरद्वाजो रचयामास। "यन्त्र-सर्वस्वम्" नाम बृहद्ग्रन्थस्यापि रचना महर्षिभरद्वाजेन अक्रियत। किञ्चित्कालानन्तरं स एव 'यन्त्र-सर्वस्वम्' नाम ग्रन्थो विमानशास्त्रत्वेन ख्यातिमाप्नोत्।

**विश्वामित्रः -**

वैदिककालस्य लब्धख्यातिर्विश्वामित्रः सप्तर्षिष्वन्यतमः। विश्वामित्रः प्रतापी, तेजस्वी महापुरुषश्चासीत्। ऋषिरयं जन्मना क्षत्रियो बभूव। कुशिकवंशे गाधिराज इति सुप्रसिद्धो महाराज आसीत्, तस्य पुत्रः कौशिकः। स एकदा सेनाभिस्सह भूभ्रमणं करोति स्म। प्रयाणसमये स ब्रह्मर्षेर्वसिष्ठस्य आश्रमं जगाम। कौशिकेन वशिष्ठः प्रणम्यते। वशिष्ठेन कौशिकस्य सकलपरिवारस्यातिथ्यम् व्यधीयत। तेभ्यः सबला नाम कामधेनुः स्वादुभोजनं साधयति। समे भोजनं कृत्वा सन्तुष्यन्ति। कौशिकः आश्रमस्य कामधेनुर्दीयताम् इति वशिष्ठं प्रार्थयते। वशिष्ठस्तत्प्रार्थनं नाङ्गीकरोति। कौशिकेन बलात् कामधेनुं स्वीकर्तुं महान् प्रयत्नो विधीयते। किन्तु प्रयत्नस्तस्य व्यर्थो भवति। तदनु खिन्नः कौशिकः राज्यं त्यक्त्वा हिमालयं याति। तपश्चर्यया विविधानि शस्त्राणि तेन लभ्यन्ते। स दर्पेण पुनः वसिष्ठाश्रमं प्रत्यागच्छति। आश्रममाक्रामति। आश्रमवास्तव्या भीता भवन्ति। किन्तु वशिष्ठः प्रशान्तचित्तस्तिष्ठति। स ब्रह्मदण्डं गृहीत्वा आश्रमस्य मध्यभागे तिष्ठति। कौशिको विफलप्रयत्नो भवति। अन्ते स ब्रह्मास्त्रं प्रयुङ्क्ते। परन्तु ब्रह्मदण्डमभितः तच्छस्त्रमपि विफलीभवति। तदा जागरितविवेकः कौशिको नष्टाहङ्कारो भूत्वा चिन्तयति तत्समीपे ब्रह्मबलं विद्यते, तदग्रे शस्त्रबलं व्यर्थमिति। अतः स पुनः भीषणतपसा ब्रह्मर्षिः भवति तदारभ्य एव कौशिको विश्वामित्र इति प्रसिद्धः।

**कश्यपः (कण्वः) -**

महर्षिकण्वः वैदिकः ऋषिः आसीत्। स च ऋग्वेदस्य अष्टममण्डलस्य द्रष्टा बभूव। तस्य आश्रमः मालिनीनद्याः तटे आसीत्। 'सोमयाग' इत्यस्य कर्त्तृरूपेण लब्धख्यातिरयं महर्षिकण्वः। आश्रमस्य समीपमेव हस्तिनापुरस्य राज्ञः दुष्यन्तस्य भार्यायाः शकुन्तलायाः एवं

तस्याः पुत्रस्य भरतस्य लालनादिकं कृतम्। महर्षिकण्वस्य अपरं नाम 'कश्यपः' इति अभिज्ञानशाकुन्तले लभ्यते।

**अत्रिः -**

ऋग्वेदस्य पञ्चममण्डलस्य द्रष्टा महर्षिः अत्रिः ब्रह्मणः पुत्रः, सोमस्य पिता, कर्दमप्रजापतिदेवहूत्योः पुत्र्याः अनुसूयायाः पतिः च आसीत्। अनुसूया भगवतीं सीतां पतिव्रताधर्ममुपदिष्टवती।

**गौतमः -**

महर्षिः गौतमः सप्तर्षिष्वेकोऽन्यतमर्षिः। स मन्त्रद्रष्टा आसीत्। ऋग्वेदे एतन्नाम्नि नैकानि सूक्तानि लभ्यन्ते। तस्य पत्नी अहल्या बभूव। अयं न्यायसूत्राणां रचयिता आसीत्। अस्यापरं नाम अक्षपादः इति।

**जमदग्निः -**

जमदग्निः भृगुवंशस्य ऋचीकस्य पुत्र आसीत्। अस्य माता आसीत् गाधिराजस्य पुत्री सत्यवती। अस्य पत्नी प्रसेनजितः पुत्री रेणुका। एषोऽपि सप्तर्षिषु परिगण्यते। एतस्य पुत्रः परशुरामो बभूव।

## शब्दार्थाः

| | |
|---|---|
| मन्त्रद्रष्टारः | मन्त्रस्य द्रष्टारः |
| ज्ञायन्ते | प्रतीयन्ते |
| सप्तशतोत्तरपञ्चषष्टिः | पञ्चषष्ट्याधिकसप्तशतम् |
| कल्याणार्थम् | मङ्गलाय/कल्याणाय |
| किञ्चित्कालानन्तरम् | कस्यचित् कालस्यानन्तरम् |
| त्रिकालज्ञः | त्रिकालं यः जानाति |
| जागरितविवेकः | यस्य विवेकः जागरितः |
| नष्टाहङ्कारः | यस्य अहङ्कारो नष्टो जातः |

# अभ्यासः

१. **उच्चारणं कुरुत -**

जमदग्निर्वसिष्ठश्च, विश्वामित्रोऽथ, कश्यपोऽत्रिर्भरद्वाजः, प्रसिद्धर्षीणाम्, सप्तशतोत्तर-पञ्चषष्टिः, पतिव्रतधर्ममुपदिष्टवती।

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत -**

(क) वैदिकवाङ्मये लौकिकवाङ्मये च ऋषीणां कीदृक् स्थानम् अस्ति ?

(ख) पाठेऽस्मिन् कतीनाम् ऋषीणां वर्णनम् अस्ति ?

(ग) मन्त्रद्रष्टारः के ?

(घ) ऋषिशब्दस्य व्युत्पत्तिः का ?

(ङ) ऋषिभिः प्रकाशितग्रन्थाः केन रूपेण ज्ञायन्ते ?

(च) भारद्वाजस्मृतिः भारद्वाजसंहिता च इत्यनयोः ग्रन्थयोः रचयिता कः ?

(छ) ऋग्वेदस्य षष्ठमण्डलस्य द्रष्टा कः ?

(ज) षष्ठमण्डले महर्षिभरद्वाजस्य कति मन्त्राः सन्ति ?

(झ) महर्षिभरद्वाजस्य पित्रोः नाम किम् ?

३. **रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -**

(क) 'यन्त्र-सर्वस्वम्' इति ग्रन्थस्य रचयिता महर्षिः भरद्वाजः।

(ख) 'यन्त्र सर्वस्वम्' इत्यस्य ग्रन्थस्य अपरं नाम विमानशास्त्रम्।

(ग) महर्षिवसिष्ठः ब्रह्मणपुत्रः आसीत्।

(घ) वसिष्ठः दशरथस्य कुलगुरुः आसीत्।

(ङ) विश्वामित्रः ऋषिः जन्मना क्षत्रियः आसीत्।

(च) कश्यपः ऋषिः सोमयागकर्तृरूपेण लब्धख्यातिः।

(छ) ऋग्वेदस्य पञ्चममण्डलस्य द्रष्टा ऋषिः अत्रिः।

४. **अधोलिखितानां प्रश्नानां समाधानं संस्कृतभाषया कुरुध्वम् -**

(क) कः ऋषिः कुशिकवंशे अजायत ?

(ख) श्रीरामलक्ष्मणौ कस्मात् शास्त्रम् अध्यैयाताम् ?

(ग) विश्वामित्रः केन कारणेन ऋषित्वं प्राप्तवान् ?

(घ) विश्वामित्रस्य तपोभङ्गार्थं मघवा कां प्रेषितवान् ?

(ङ) परशुरामः कस्य पुत्र आसीत् ?

## ५. रिक्तस्थानं भरध्वम् -

(क) महर्षिकण्वस्य आश्रमः ............ ............ आसीत्।

(ख) 'सोमयाग' इत्यस्य कर्त्तृरूपेण ........................... ।

(ग) कश्यपोऽत्रिर्भरद्वाजो .............................. स्मृताः।

(घ) महर्षिकण्वस्य अपरं नाम .......................... आसीत्।

(ङ) सबलाकामधेनुः ............................ आसीत् ।

## ६. समुचितं मेलयत -

| | |
|---|---|
| (क) भरद्वाजर्षिः | यन्त्रसर्वस्वम् |
| (ख) दशरथस्य कुलगुरुः | गौतमः |
| (ग) कण्वः | ऋग्वेदस्य |
| (घ) पञ्चममण्डलस्य | द्रष्टा |
| (ङ) अत्रिः | कश्यपः |
| (च) न्यायशास्त्रम् | वसिष्ठः |

## ७. अधोलिखितपदेषु प्रकृतिप्रत्ययविभागं कुरुत -

**प्रकृतिः + प्रत्ययः**

(क) ज्ञातुम् ................+................।

(ख) ऋषिः ................+................।

(ग) योगः ................+................।

(घ) स्थानम् ................+................।

(ङ) लब्धवान् ................+................।

(च) रचयिता ................+................।

(छ) कृतवान्  ................+................।

८. **कोष्ठके विद्यमानानां समस्तपदानां विग्रहवाक्यं लिखत -**

**विग्रहवाक्यम्**

(क) जागरितविवेकः ................................।

(ख) मन्त्रद्रष्टारः ................................।

(ग) नष्टाहङ्कारः ................................।

(घ) कुलगुरुः ................................।

(ङ) महर्षिगौतमः ................................।

(च) पतिव्रतधर्मः ................................।

९. **अधोलिखितपदानां सन्धिं कुरुत -**

(क) कश्यपः+अत्रि ................................।

(ख) ऋषयः+तु ................................।

(ग) च+एषः ................................।

(घ) बृहत्+ग्रन्थः ................................।

(ङ) प्रति+आगच्छति ................................।

(च) तत्+शस्त्रम् ................................।

१०. **प्रयोगपरिवर्तनं कुरुत।**

(क) सप्तभिः ऋषिभिः भूयते।

(ख) ऋषयो मन्त्राणां द्रष्टारः न तु कर्तारः।

(ग) त्रेतायुगस्यान्ते स ब्रह्मलोकं प्रत्यगच्छत्।

## योग्यता-विस्तारः

मन्त्र इति पदं 'मत्रि गुप्तभाषणे' इति धातोः घञ्-प्रत्ययेन निष्पन्नम्, ऋषिभिः दृष्टानाम् आनुपूर्वाप्रधानानाम् ऋग्यजुस्सामाथर्वाख्यानां सामान्येन बोधकम्। प्रत्येकं वेदे अन्तर्गतानां मन्त्राणां बोधकतया विविधाः शब्दाः प्रयुज्यन्ते। केवलम् ऋङ्मन्त्राणां कृते 'ऋच्' इति साममन्त्राणां 'साम' इति यजुर्मन्त्राणां 'यजूंषि' इति अथर्वमन्त्राणां 'आथर्वा' इति च संज्ञा ।

ज्ञानार्थकात् 'मन' इति धातोः अपि मन्त्रशब्दस्य व्युत्पत्तिः प्रदश्यते। ध्यानावस्थायां मन्त्रान् ऋषयः अपश्यन् इति कारणात् ते 'मन्त्रद्रष्टार' इत्युच्यन्ते। सर्वदा मननं कुर्वन्ति, ध्यानमग्ना भवन्ति इति कारणात् ऋषयः मन्त्रकृत इत्यपि उच्यन्ते ।

| | | |
|---|---|---|
| १. | ऋग्वेदे मन्त्रसंख्या | १०५५२ (द्विपञ्चाशतुत्तरपञ्चशताधिकदशसहस्रम्) |
| २. | शुक्लयजुर्वेदे मन्त्रसंख्या | १९७५ (पञ्चसप्तत्युत्तरनवदशशतम्) |
| ३. | सामवेदे मन्त्रसंख्या | १८७५ (पञ्चसप्तत्यधिकाष्टादशशतम्) |
| ४. | अथर्ववेदे मन्त्रसंख्या | ५९७७ (सप्तसप्तत्युत्तरनवशताधिकपञ्चसहस्रम्) |

**अर्घ्यम्**

अर्घ्यम् इति पदेन अतिथिसत्कारार्थं संग्राह्यं द्रव्यम् अभिधीयते। भारतीयपरम्परायाम-तिथिसत्कारार्थमस्य द्रव्याणीमानि सुतरां महत्त्वमावहन्ति। एतानि द्रव्याणि दूरादागतस्य अतिथेः अध्वश्रममपनेतुं समर्थानि, अत एव तानि द्रव्याणि अर्घ्यद्रव्येषु स्थानं भजन्ते। तानि अर्घ्यद्रव्याणि दूर्वा, अक्षतान्, सर्षपाः, पुष्पाणि, सुगन्धीनि चन्दनादीनि, सुगन्धिद्रव्याणि, स्वादुशीतलं जलञ्च अर्घ्यम् अतिथीनामुपचारार्थमादरार्थं वा विधीयते इति याज्ञवल्क्यः प्राह -

**दूर्वा सर्षपपुष्पाणां दत्त्वार्घं पूर्णमञ्जलिम् ।**

# शब्दरूपाणि

| १. पकारान्तस्त्रीलिङ्गः अप्-शब्दः (अम्भः) | | |
|---|---|---|
| | | आपः |
| | | अपः |
| | | अद्भिः |
| | | अद्भ्यः |
| | | अद्भ्यः |
| | | अपाम् |
| | | अप्सु |
| | | हे आपः! |

| २. भकारान्तस्त्रीलिङ्गः ककुभ्-शब्दः(दिक्) | | |
|---|---|---|
| ककुप्, ककुब् | ककुभौ | ककुभः |
| ककुभम् | ककुभौ | ककुभः |
| ककुभा | ककुब्भ्याम् | ककुब्भिः |
| ककुभे | ककुब्भ्याम् | ककुब्भ्यः |
| ककुभः | ककुब्भ्याम् | ककुब्भ्यः |
| ककुभः | ककुभोः | ककुभाम् |
| ककुभि | ककुभोः | ककुप्सु |
| हे ककुप्! ब् | हे ककुभौ! | हे ककुभः! |

| ३. मकारान्तपुँल्लिङ्गः प्रशाम्-शब्दः (शान्तः) | | |
|---|---|---|
| प्रशान् | प्रशामौ | प्रशामः |
| प्रशामम् | प्रशामौ | प्रशामः |
| प्रशामा | प्रशान्भ्याम् | प्रशान्भिः |
| प्रशामे | प्रशान्भ्याम् | प्रशान्भ्यः |
| प्रशामः | प्रशान्भ्याम् | प्रशान्भ्यः |
| प्रशामः | प्रशामोः | प्रशामाम् |
| प्रशामि | प्रशामोः | प्रशान्त्सु, प्रशान्सु |
| हे प्रशान्! | हे प्रशामौ! | हे प्रशामः! |

| ४. दकारान्तस्त्रीलिङ्गः उपनिषद्-शब्दः | | |
|---|---|---|
| उपनिषद् | उपनिषदौ | उपनिषदः |
| उपनिषदम् | उपनिषदौ | उपनिषदः |
| उपनिषदा | उपनिषद्भ्याम् | उपनिषद्भिः |
| उपनिषदे | उपनिषद्भ्याम् | उपनिषद्भ्यः |
| उपनिषदः | उपनिषद्भ्याम् | उपनिषद्भ्यः |
| उपनिषदः | उपनिषदोः | उपनिषदाम् |
| उपनिषदि | उपनिषदोः | उपनिषत्सु |
| हे उपनिषद् ! | उपनिषदौ ! | उपनिषदः ! |

| ५. रेफान्तपुँल्लिङ्गः प्रियचतुर्-शब्दः | | |
|---|---|---|
| प्रियचत्वाः | प्रियचत्वारौ | प्रियचत्वारः |
| प्रियचत्वारम् | प्रियचत्वारौ | प्रियचतुरः |
| प्रियचतुरा | प्रियचतुर्भ्याम् | प्रियचतुर्भिः |
| प्रियचतुरे | प्रियचतुर्भ्याम् | प्रियचतुर्भ्यः |
| प्रियचतुरः | प्रियचतुर्भ्याम् | प्रियचतुर्भ्यः |
| प्रियचतुरः | प्रियचतुरोः | प्रियचतुराम् |
| प्रियचतुरि | प्रियचतुरोः | प्रियचतुर्षु |
| हे प्रियचत्वः! | हे प्रियचत्वारौ! | हे प्रियचत्वारः! |

| ६. रेफान्तस्त्रीलिङ्गः गिर्-शब्दः (वाणी) | | |
|---|---|---|
| गीः | गिरौ | गिरः |
| गिरम् | गिरौ | गिरः |
| गिरा | गीर्भ्याम् | गीर्भिः |
| गिरे | गीर्भ्याम् | गीर्भ्यः |
| गिरः | गीर्भ्याम् | गीर्भ्यः |
| गिरः | गिरोः | गिराम् |
| गिरि | गिरोः | गीर्षु |
| हे गीः! | हे गिरौ! | हे गिरः! |

| ७. रेफान्तस्त्रीलिङ्गः पुर्-शब्दः (नगरम्) | | |
|---|---|---|
| पूः | पुरौ | पुरः |
| पुरम् | पुरौ | पुरः |
| पुरा | पूर्भ्याम् | पूर्भिः |
| पुरे | पूर्भ्याम् | पूर्भ्यः |
| पुरः | पूर्भ्याम् | पूर्भ्यः |
| पुरः | पुरोः | पुराम् |
| पुरि | पुरोः | पूर्षु |
| हे पूः! | हे पुरौ! | हे पुरः! |

| ८. रेफान्तनपुंसकलिङ्गः वार्-शब्दः (वारि) | | |
|---|---|---|
| वाः | वारी | वारि |
| वाः | वारी | वारि |
| वारा | वार्भ्याम् | वार्भिः |
| वारे | वार्भ्याम् | वार्भ्यः |
| वारः | वार्भ्याम् | वार्भ्यः |
| वारः | वारोः | वाराम् |
| वारि | वारोः | वार्षु |
| हे वाः! | हे वारी! | हे वारि! |

| ९. वकारान्तपुँल्लिङ्गः सुदिव्-शब्दः (शोभना द्यौर्यस्मिन्दिवसे स सुद्यौः) | | |
|---|---|---|
| सुद्यौः | सुदिवौ | सुदिवः |
| सुदिवम् | सुदिवौ | सुदिवः |
| सुदिवा | सुद्युभ्याम् | सुद्युभिः |

| १०. वकारान्तस्त्रीलिङ्गः दिव्-शब्दः (स्वर्गो नभश्च) | | |
|---|---|---|
| द्यौः | दिवौ | दिवः |
| दिवम् | दिवौ | दिवः |
| दिवा | द्युभ्याम् | द्युभिः |

| | | | | | | |
|---|---|---|---|---|---|---|
| सुदिवे | सुद्युभ्याम् | सुद्युभ्यः | | दिवे | द्युभ्याम् | द्युभ्यः |
| सुदिवः | सुद्युभ्याम् | सुद्युभ्यः | | दिवः | द्युभ्याम् | द्युभ्यः |
| सुदिवः | सुदिवोः | सुदिवाम् | | दिवः | दिवोः | दिवाम् |
| सुदिवि | सुदिवोः | सुद्युषु | | दिवि | दिवोः | द्युषु |
| हे सुद्यौः! | हे सुदिवौ! | हे सुदिवः! | | हे द्यौः! | हे दिवौ! | हे दिवः! |

| ११. शकारान्तपुँल्लिङ्गः विश्-शब्दः (वणिज) | | |
|---|---|---|
| विट्/ड् | विशौ | विशः |
| विशम् | विशौ | विशः |
| विशा | विड्भ्याम् | विड्भिः |
| विशे | विड्भ्याम् | विड्भ्यः |
| विशः | विड्भ्याम् | विड्भ्यः |
| विशः | विशोः | विशाम् |
| विशि | विशोः | विट्सु |
| हे विट्! /ड् | हे विशौ! | हे विशः! |

| १२. शकारान्तपुँल्लिङ्गः तादृश्-शब्दः | | |
|---|---|---|
| तादृक् | तादृशौ | तादृशः |
| तादृशम् | तादृशौ | तादृशः |
| तादृशा | तादृग्भ्याम् | तादृग्भिः |
| तादृशे | तादृग्भ्याम् | तादृग्भ्यः |
| तादृशः | तादृग्भ्याम् | तादृग्भ्यः |
| तादृशः | तादृशोः | तादृशाम् |
| तादृशि | तादृशोः | तादृक्षु |
| हे तादृक्! | हे तादृशौ! | हे तादृशः! |

इत्थं यादृश् (जैसा), मादृश् (मेरे समान), , त्वादृश् (तुम्हारे समान), एतादृश् (इसके समान) इत्यादीनां रूपाणि चलन्ति। भवादृश, यादृश् इत्यादयः स्त्रीलिङ्गे भवादृशी, यादृशी, मादृशी रूपाणि भवन्ति।

| १३. शकारान्तनपुंसकलिङ्गः तादृश् -शब्दः | | |
|---|---|---|
| तादृक् | तादृशी | तादृंशि |
| तादृक् | तादृशी | तादृंशि |
| तादृशा | तादृग्भ्याम् | तादृग्भिः |
| तादृशे | तादृग्भ्याम् | तादृग्भ्यः |
| तादृशः | तादृग्भ्याम् | तादृग्भ्यः |
| तादृशः | तादृशोः | तादृशाम् |

| १४. शकारान्तस्त्रीलिङ्गः दिश्-शब्दः (दिशा) | | |
|---|---|---|
| दिक् / दिग् | दिशौ | दिशः |
| दिशम् | दिशौ | दिशः |
| दिशा | दिग्भ्याम् | दिग्भिः |
| दिशे | दिग्भ्याम् | दिग्भ्यः |
| दिशः | दिग्भ्याम् | दिग्भ्यः |
| दिशः | दिशोः | दिशाम् |

| | | |
|---|---|---|
| तादृशि | तादृशोः | तादृक्षु |
| हे तादृक्! | हे तादृशौ! | हे तादृशः! |

| | | |
|---|---|---|
| दिशि | दिशोः | दिक्षु |
| हे दिक् / ग्! | हे दिशौ! | हे दिशः! |

भवादृश्,मादृश्,त्वादृश् इत्यादयः।अकारान्तभवादृशः, तादृशः, मादृशः, त्वादृशः अपि भवन्ति।

| १५. षकारान्तपुँल्लिङ्गः रत्नमुष्-शब्दः (रत्नचौरः) | | |
|---|---|---|
| रत्नमुट्,ड् | रत्नमुषौ | रत्नमुषः |
| रत्नमुषम् | रत्नमुषौ | रत्नमुषः |
| रत्नमुषा | रत्नमुड्भ्याम् | रत्नमुड्भिः |
| रत्नमुषे | रत्नमुड्भ्याम् | रत्नमुड्भ्यः |
| रत्नमुषः | रत्नमुड्भ्याम् | रत्नमुड्भ्यः |
| रत्नमुषः | रत्नमुषोः | रत्नमुषाम् |
| रत्नमुषि | रत्नमुषोः | रत्नमुट्त्सु |
| हे रत्नमुट्ड्! | हे रत्नमुषौ! | हे रत्नमुषः! |

| १६. षकारान्तपुँल्लिङ्गः पिपठिष्-शब्दः (पठितुमिच्छुः) | | |
|---|---|---|
| पिपठीः | पिपठिषौ | पिपठिषः |
| पिपठिषम् | पिपठिषौ | पिपठिषः |
| पिपठिषा | पिपठीर्भ्याम् | पिपठीर्भिः |
| पिपठिषे | पिपठीर्भ्याम् | पिपठीर्भ्यः |
| पिपठिषः | पिपठीर्भ्याम् | पिपठीर्भ्यः |
| पिपठिषः | पिपठिषोः | पिपठिषाम् |
| पिपठिषि | पिपठिषोः | पिपठिःषु/ष्षु |
| हे पिपठीः! | हे पिपठिषौ! | हे पिपठिषः! |

| १७. षकारान्तपुँल्लिङ्गः द्विष्-शब्दः (शत्रुः) | | |
|---|---|---|
| द्विट् | द्विषौ | द्विषः |
| द्विषम् | द्विषौ | द्विषः |
| द्विषा | द्विड्भ्याम् | द्विड्भिः |
| द्विषे | द्विड्भ्याम् | द्विड्भ्यः |
| द्विषः | द्विड्भ्याम् | द्विड्भ्यः |
| द्विषः | द्विषोः | द्विषाम् |
| द्विषि | द्विषोः | द्विड्ढु |
| हे द्विट्! | हे द्विषौ! | हे द्विषः! |

| १८. षकारान्तस्त्रीलिङ्गः प्रावृष्-शब्दः (वर्षा-ऋतुः) | | |
|---|---|---|
| प्रावृट्, प्रावृड् | प्रावृषौ | प्रावृषः |
| प्रावृषम् | प्रावृषौ | प्रावृषः |
| प्रावृषा | प्रावृड्भ्याम् | प्रावृड्भिः |
| प्रावृषे | प्रावृड्भ्याम् | प्रावृड्भ्यः |
| प्रावृषः | प्रावृड्भ्याम् | प्रावृड्भ्यः |
| प्रावृषः | प्रावृषोः | प्रावृषाम् |
| प्रावृषि | प्रावृषोः | प्रावृड्ढु |
| हे प्रावृट्,ड्! | हे प्रावृषौ! | हे प्रावृषः! |

| १९. सकारान्तपुँल्लिङ्गः चन्द्रमस्-शब्दः | | |
|---|---|---|
| चन्द्रमाः | चन्द्रमसौ | चन्द्रमसः |
| चन्द्रमसम् | चन्द्रमसौ | चन्द्रमसः |
| चन्द्रमसा | चन्द्रमोभ्याम् | चन्द्रमोभिः |
| चन्द्रमसे | चन्द्रमोभ्याम् | चन्द्रमोभ्यः |
| चन्द्रमसः | चन्द्रमोभ्याम् | चन्द्रमोभ्यः |
| चन्द्रमसः | चन्द्रमसोः | चन्द्रमसाम् |
| चन्द्रमसि | चन्द्रमसोः | चन्द्रमःसु-स्सु |
| हे चन्द्रमः! | हे चन्द्रमसौ! | हे चन्द्रमसः! |

| २०. सकारान्तपुँल्लिङ्गः मास्-शब्दः | | |
|---|---|---|
| | | |
| | | मासः |
| मासा | माभ्याम् | माभिः |
| मासे | माभ्याम् | माभ्यः |
| मासः | माभ्याम् | माभ्यः |
| मासः | मासोः | मासाम् |
| मासि | मासोः | मास्सु |
| | | |

इत्थम् - जलौकस् (रक्तपा), महौजस् (तेजस्वी), नचिकेतस्, दिवौकस्, दुर्वासस्, सुमनस्, महायशस्, वनौकस् इत्येतेषां रूपाणि चन्द्रमस्-शब्दस्येव प्रचलन्ति।

| २१. सकारान्तपुँल्लिङ्गः वेधस्-शब्दः (ब्रह्मा) | | |
|---|---|---|
| वेधाः | वेधसौ | वेधसः |
| वेधसम् | वेधसौ | वेधसः |
| वेधसा | वेधोभ्याम् | वेधोभिः |
| वेधसे | वेधोभ्याम् | वेधोभ्यः |
| वेधसः | वेधोभ्याम् | वेधोभ्यः |
| वेधसः | वेधसोः | वेधसाम् |
| वेधसि | वेधसोः | वेधःसु, स्सु |
| हे वेधः! | हे वेधसौ! | हे वेधसः! |

| २२. सकारान्तपुँल्लिङ्गः अनेहस्-शब्दः (समयः) | | |
|---|---|---|
| अनेहाः | अनेहसौ | अनेहसः |
| अनेहसम् | अनेहसौ | अनेहसः |
| अनेहसा | अनेहोभ्याम् | अनेहोभिः |
| अनेहसे | अनेहोभ्याम् | अनेहोभ्यः |
| अनेहसः | अनेहोभ्याम् | अनेहोभ्यः |
| अनेहसः | अनेहसोः | अनेहसाम् |
| अनेहसि | अनेहसोः | अनेहःसु, स्सु |
| हे अनेहः! | हे अनेहसौ! | हे अनेहसः! |

| २३. सकारान्तपुँल्लिङ्गः पुम्स्-शब्दः (पुरुषः) | | |
|---|---|---|
| पुमान् | पुमांसौ | पुमांसः |

| २४. सकारान्तपुँल्लिङ्गः विद्वस्-शब्दः (विपश्चित्) | | |
|---|---|---|
| विद्वान् | विद्वांसौ | विद्वांसः |

| | | |
|---|---|---|
| पुमांसम् | पुमांसौ | पुंसः |
| पुंसा | पुम्भ्याम् | पुम्भिः |
| पुंसे | पुम्भ्याम् | पुम्भ्यः |
| पुंसः | पुम्भ्याम् | पुम्भ्यः |
| पुंसः | पुंसोः | पुंसाम् |
| पुंसि | पुंसोः | पुंसु |
| हे पुमन्! | हे पुमांसौ! | हे पुमांसः! |

| | | |
|---|---|---|
| विद्वांसम् | विद्वांसौ | विदुषः |
| विदुषा | विद्वद्भ्याम् | विद्वद्भिः |
| विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः |
| विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः |
| विदुषः | विदुषोः | विदुषाम् |
| विदुषि | विदुषोः | विद्वत्सु |
| हे विद्वन्! | हे विद्वांसौ! | हे विद्वांसः! |

| २५. सकारान्तपुँल्लिङ्गः लघीयस्-शब्दः | | |
|---|---|---|
| लघीयान् | लघीयांसौ | लघीयासः |
| लघीयासम् | लघीयांसौ | लघीयसः |
| लघीयसा | लघीयोभ्याम् | लघीयोभिः |
| लघीयसः | लघीयोभ्याम् | लघीयोभ्यः |
| लघीयसः | लघीयोभ्याम् | लघीयोभ्यः |
| लघीयसः | लघीयासोः | लघीयसाम् |
| लघीयसि | लघीयासोः | लघीयःसु |
| हे लघीयन्! | हे लघीयांसौ! | हे लघीयांसः! |

| २६. सकारान्तपुँल्लिङ्गः श्रेयस्-शब्दः (प्रशंसनीयः) | | |
|---|---|---|
| श्रेयान् | श्रेयांसौ | श्रेयांसः |
| श्रेयांसम् | श्रेयांसौ | श्रेयसः |
| श्रेयसा | श्रेयोभ्याम् | श्रेयोभिः |
| श्रेयसेः | श्रेयोभ्याम् | श्रेयोभ्यः |
| श्रेयसः | श्रेयोभ्याम् | श्रेयोभ्यः |
| श्रेयसः | श्रेयसोः | श्रेयसाम् |
| श्रेयसि | श्रेयसोः | श्रेयःसु, श्रेयस्सु |
| हे श्रेयन्! | हे श्रेयांसौ! | हे श्रेयांसः! |

इत्थम् - गरीयस्, द्रढीयस्, प्रथीयस्, द्रधीयस्, इत्यादयः ईयस् प्रत्ययेन व्युत्पन्नानां शब्दानां रूपाणि श्रेयस्-शब्दस्य इव भवन्ति। लघीयस्, गरीयस् इत्यादीनां स्त्रीलिङ्गे लघीयसी, गरीयसी, द्रढियसी, द्राधीयसी इत्यादीनां रूपाणि नदीवत् भवन्ति।

| २७. सकारान्तस्त्रीलिङ्गः अप्सरस्-शब्दः (अप्सराः) | | |
|---|---|---|
| अप्सराः | अप्सरसौ | अप्सरसः |
| अप्सरसम् | अप्सरसौ | अप्सरसः |
| अप्सरसा | अप्सरोभ्याम् | अप्सरोभिः |
| अप्सरसे | अप्सरोभ्याम् | अप्सरोभ्यः |
| अप्सरसः | अप्सरोभ्याम् | अप्सरोभ्यः |
| अप्सरसः | अप्सरसोः | अप्सरसाम् |

| २८. सकारान्तस्त्रीलिङ्गः आशिस्-शब्द (आशीर्वादः) | | |
|---|---|---|
| आशीः | आशिषौ | आशिषः |
| आशिषम् | आशिषौ | आशिषः |
| आशिषा | आशीर्भ्याम् | आशीर्भिः |
| आशिषे | आशीर्भ्याम् | आशीर्भ्यः |
| आशिषः | आशीर्भ्याम् | आशीर्भ्यः |
| आशिषः | आशिषोः | आशिसाम् |

| | | |
|---|---|---|
| अप्सरसि | अप्सरसोः | अप्सरःसु , स्सु |
| हे अप्सरः! | हे अप्सरसौ! | अप्सरसः! |

| | | |
|---|---|---|
| आशिषि | आशिषोः | आशीःषु , ष्षु |
| हे आशीः! | हे आशिषौ! | आशिसः! |

| २९. सकारान्तनपुंसकलिङ्गः मनस्-शब्दः | | |
|---|---|---|
| मनः | मनसी | मनांसि |
| मनः | मनसी | मनांसि |
| मनसा | मनोभ्याम् | मनोभिः |
| मनसे | मनोभ्याम् | मनोभ्यः |
| मनसः | मनोभ्याम् | मनोभ्यः |
| मनसः | मनसोः | मनसाम् |
| मनसि | मनसोः | मनःसु, मनस्सु |
| हे मनः! | हे मनसी! | हे मनांसि! |

| ३०. सकारान्तनपुंसकलिङ्गः यजुस्-शब्दः(यजुर्वेदः) | | |
|---|---|---|
| यजुः | यजुषी | यजूंषि |
| यजुः | यजुषी | यजूंषि |
| यजुषा | यजुर्भ्याम् | यजुर्भिः |
| यजुषे | यजुर्भ्याम् | यजुर्भ्यः |
| यजुषः | यजुर्भ्याम् | यजुर्भ्यः |
| यजुषः | यजुषोः | यजुषाम् |
| यजुषि | यजुषोः | यजुःषु , यजुष्षु |
| हे यजुः! | हे यजुषी! | हे यजूंषि! |

इत्थम् - नभस् (आकाशम्), अम्भस् (सलिलम्) आगस्(पापम्), उरस् (वक्षः), पयस्, रजस् (धुलिः), वयस्, वक्षस्, अयस् (लौहः) तमस् (अन्धकारः) वचस्, यशस्, तपस् (तपस्या), सरस् (तडागः), शिरस् (मस्तकम्), धनुष्।

| ३१. सकारान्तनपुंसकलिङ्गः हविस्-शब्द (हवनीयद्रव्यम्) | | |
|---|---|---|
| हविः | हविषी | हवींषि |
| हविः | हविषी | हवींषि |
| हविषा | हविर्भ्याम् | हविर्भिः |
| हविषे | हविर्भ्याम् | हविर्भ्यः |
| हविषः | हविर्भ्याम् | हविर्भ्यः |
| हविषः | हविषोः | हविषाम् |
| हविषि | हविषोः | हविःषु, हविष्षु |
| हेहविः! | हे हविषी! | हे हवीषि! |

| ३२. षकारान्तत्रिलिङ्गः सजुष्-शब्दः (सुहृद्) | | |
|---|---|---|
| सजूः | सजुषौ | सजुषः |
| सजुषम् | सजुषौ | सजुषः |
| सजुषा | सजूर्भ्याम् | सजूर्भिः |
| सजुषे | सजूर्भ्याम् | सजूर्भ्यः |
| सजुषः | सजूर्भ्याम् | सजूर्भ्यः |
| सजुषः | सजुषोः | सजुषाम् |
| सजुषि | सजुषोः | सजुःषु,सजुष्षु |
| हे सजूः! | हे सजुषौ! | हे सजुषः! |

इत्थम् - चक्षुस्, वपुस् इत्यादीनां शब्दानां रूपाणि यजुस्-शब्दवद् भवन्ति।

